ॐ दधिक्क्राव्ण्णोऽअकारिषंजिष्ण्णोरश्वस्यवाजिनः॥ सुरभिनोमुखाकरत्प्रणऽआयूꣳषितारिषत्॥

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देव! स्नानार्थं प्रतिगृह्यताम्॥

दूध से समुत्पन्न (निर्मित) मीठा-अम्लयुक्त चन्द्रमा के समान धवल दही मेरे द्वारा आपके स्नान के लिए लाया गया है, हे देव! आपको स्नान के लिए समर्पित है।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः दधिस्नानं समर्पयामि।

घृतस्नानम्—दोनों हाथों से घृतपात्र लेकर समर्पित करे।

ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम॥ अनुष्ष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम्॥

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥

नवनीत (मक्खन) से उत्पन्न सभी को सन्तोष प्रदान करनेवाला घी हे देव! आपको समर्पित करता हूँ, स्नान के लिए ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः घृतस्नानं समर्पयामि।

मधुस्नानम्—दोनों हाथों से मधुपात्र लेकर समर्पित करे।

ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवः॥ माद्ध्वीर्न्नःसन्त्वोषधीः॥ मधुनक्तमुतोषसोमधुमत्त्पार्त्थिवꣳरजः॥ मधुद्यौरस्तुनःपिता॥ मधुमान्नोव्वनस्प्पतिर्म्मधुमाँऽअस्तुसूर्य्यः॥ माद्ध्वीर्ग्गावोभवन्तुनः॥

पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्॥

पुष्प कणों से उत्पन्न, सुन्दर मधुर स्वादवाला, पुष्टि तथा दिव्य तेज प्रदान करनेवाला, शहद स्नान के लिए अपके सम्मुख समर्पित है, हे देव! ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः मधुस्नानं समर्पयामि।

शर्करास्नानम्—दोनों हाथों से शर्करापात्र लेकर समर्पित करे।

ॐ अपाꣳरसमुद्द्वयसꣳसूर्य्येसन्तꣳसमाहितम्॥ अपाꣳरसस्ययोरसस्तंव्वो गृह्णाम्म्युत्तममुपयामगृहीतोऽसीन्द्रायत्त्वाजुष्टंगृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टतमम्॥

इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम्।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम्॥

ईख के रस से निर्मित, सभी प्रकार के मल को नष्ट करनेवाला, शुभ और पुष्टि को प्रदान करनेवाला, दिव्यशर्करा आपके प्रति स्नान के लिए समर्पित है, हे देव! ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः शर्करास्नानं समर्पयामि।

पञ्चामृतस्नानम्—दोनों हाथ से पञ्चामृतपात्र लेकर समर्पित करे।

ॐ पञ्चनद्यःसरस्वतीमपियन्तिसस्रोतसः॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित्॥

पञ्चामृतं मयाऽऽनीतं पयो दधि घृतं मधु।
शर्करा च समायुक्तं स्नानार्थं प्रतिगृह्यताम्॥

दूध-दही-घृत-मधु और शर्करा से निर्मित पञ्चामृत स्नान के लिए मैं लाया हूँ, हे देव! स्नान के लिए ग्रहण करे।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः मिलितपञ्चामृतस्नानं समर्पयामि।

शुद्धोदकस्नानम्—दोनों हाथों से जलपात्र लेकर समर्पित करे।

ॐ शुद्धवालःसर्व्वशुद्धवालोमणिवालस्तऽआश्विनाःश्येतःश्येताक्षोरुणस्तेरुद्राय

पशुपतयेकर्ण्णायामाऽअवलिप्तारौद्रानभोरूपाःपार्ज्जन्न्याः॥

गङ्गे च यमुने चैव गोदावरि सरस्वती।
नर्मदासिन्धुकावेरि स्नानार्थं प्रतिगृह्यताम्॥

गङ्गा-यमुना-गोदावरी-सरस्वती-नर्मदा-सिन्धु तथा कावेरी दिव्य नदियों का दिव्य जल स्नान के लिए समर्पित है, हे देव! ग्रहण करे।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः शुद्धोदकस्नानं समर्पयामि।

वस्त्रनिवेदनम्—दोनों हाथों से वस्त्र लेकर समर्पित करे।

ॐ तस्मादश्श्वाऽअजायन्तयेकेचोभयादतः॥ गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः॥

ॐ युवासुवासाः परिवीतऽआगात्सऽउत्श्रेयान्भवतिजायमानः।
तंधीरासः कवयऽउन्नयन्ति स्वाध्योमनसा देवयन्तः॥

शीतवातोष्णसन्त्राणं लज्जाया रक्षणं परम्।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे॥

शीतल और उष्ण वायु के ताप और शैत्य से रक्षा के लिए तथा परमलज्जा के रक्षार्थ, शरीर को अलंकृत करने के लिए वस्त्र समर्पित है, हे देव! यह वस्त्र आपको प्रसन्न करे, आप हमें शान्ति प्रदान करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः वस्त्रं समर्पयामि।

वस्त्राङ्गाचमनीयजलम्—दोनों हाथों से आचमनीय लेकर समर्पित करे।

ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन॥ महेरणायचक्षसे॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः वस्त्रान्ते आचमनीयं समर्पयामि।

उपवस्त्रनिवेदनम्—दोनों हाथों से उपवस्त्र लेकर समर्पित करे।

ॐ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः॥ तेनदेवाऽअयजन्तसाध्याऽऋषयश्श्च्ये॥ ॐ सुजातोज्ज्योतिषासहशर्म्मवरूथमासदत्स्वः॥ व्वासोअग्ग्नेव्विश्श्वरूपꣳ संव्ययस्वव्विभावसो॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः उपवस्त्रं समर्पयामि।

उपवस्त्राङ्गाचमनीयजलम्—दोनों हाथों से आचमनीय जल लेकर समर्पित करे।

ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः॥ उशतीरिवमातरः॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः उपवस्त्रान्ते आचमनीयं समर्पयामि।

यज्ञोपवीतनिवेदनम्—दोनों हाथों से यज्ञोपवीत पकड़कर समर्पित करे।

ॐ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन्॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽ

उच्च्येते॥ ॐ यज्ञोदेवानाम्प्रत्त्यैतिसुम्म्नमादित्त्यासोभवतामृडयन्त्तः॥ आवोर्व्वाची सुमतिर्व्ववृत्त्यादृꣳहोश्चिद्याव्वरिवोवित्त्तरासदादित्त्येब्भ्यस्त्वा॥

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥

पूर्व काल में प्रजापति ब्रह्मा ने सहज ही परम पवित्र यज्ञोपवीत का निर्माण किया था, वह शुभ्र यज्ञोपवीत शरीर में बल, मन में तेज तथा ओज और सबसे पहले आयुष्य प्रदान करता है, वह यज्ञोपवीत हे देव! आपको प्रसन्नता के लिए समर्पित है।

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्।
उपवीतं मया दत्तं गृहाण गणनायक॥

नव तन्तुओं से निर्मित, त्रिगुण (त्रिरावृत्तिवाला) देवतामय यज्ञ में पहने जानेवाला उपवीत मैं आपको समर्पित करता हूँ, हे गणनायक! प्रसन्नतापूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः यज्ञोपवीतं समर्पयामि।

यज्ञोपवीताङ्गाचमनीयम्—दोनों हाथों से आचमनीय लेकर समर्पित करे।

ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्न्वथ॥ आपोजनयथाच नः॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः यज्ञोपवीतान्ते आचमनीयं समर्पयामि।

सुगन्धिद्रव्यसमर्पणम्—दोनों हाथों से सुगन्धिद्रव्य लेकर समर्पित करे।

ॐ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः॥ त्वामोषधेसोमोराजाविद्वान्यक्ष्मादमुच्च्यत॥

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥

दिव्य सुमनोहर सुगन्धित श्रीखण्ड से युक्त चन्दन लेप आपके विलेपन के लिए है, यह आपके प्रसन्नता के लिए अपको समर्पित है, हे देवश्रेष्ठ! ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः गन्धानुलेपनं समर्पयामि।

अक्षतसमर्पणम्—दोनों हाथों से अक्षत लेकर समर्पित करे।

ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत॥ अस्तोषतस्वभानवोव्विप्प्रानविष्ठयामती योजान्विन्द्रतेहरी॥

अक्षताश्च सुरश्रेष्ठा कुङ्कुमाक्ताः सुशोभिताः।
मया निवेदिता भक्त्या गृहाण परमेश्वर!॥

कुङ्कुम से सुशोभित अक्षत आपको निवेदित करता हूँ, हे सुरश्रेष्ठ परमेश्वर गणेश! प्रसन्नतापूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः अलङ्करणार्थे अक्षतान् समर्पयामि।

पुष्पमालासमर्पणम्—दोनों हाथों से पुष्पमाला लेकर समर्पित करे।

ॐ ओष॑धीः॒प्प्रति॑मोदद्ध्वं॒पुष्प्प॑वतीःप्र॒सूव॑रीः॥ अश्श्वा॑ऽइवस॒जित्त्व॑रीर्व्वी॒रुध॑ः पारयि॒ष्ण्णव॒ः॥

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो!।
मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्॥

मालती आदि के सुगन्धित पुष्पों के द्वारा निर्मित माला आपकी पूजा के लिए लाया हूँ, हे देव! प्रसन्नतापूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः पुष्पमालां परिधापयामि।

दूर्वासमर्पणम्—दोनों हाथों से दूर्वा लेकर समर्पित करे।

ॐ काण्डा॑त्काण्डात्प्र॒रोह॑न्ती॒परु॑षःपरु॒षष्प्परि॑॥ ए॒वानो॑दूर्व्वे॒प्प्रत॑नुस॒हस्रे॑णश॒तेन॑ च॥

दूर्वाङ्कुरान्सुहरितान् अमृतान्मङ्गलप्रदान्।
आनीतांस्तव पूजार्थं गृहाण गणनायक!॥

अमृतरूपी मङ्गल प्रदान करनेवाले सुन्दर हरे-हरे दूर्वा के अङ्कुर आपकी पूजा के लिए लाया हूँ, हे गणनायक देव! ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः दूर्वाङ्कुरान् समर्पयामि।

नानापरिमलद्रव्यसमर्पणम्—दोनों हाथों से अबीरबुक्का लेकर समर्पित करे।

ॐ अहि॑रिवभो॒गैःपर्य्ये॑तिबा॒हुंज्याया॑हे॒तिंप्परि॒बाध॑मानः॥ ह॒स्त॒घ्नोविश्श्वा॑व॒युना॑निवि॒द्वान्पुमा॒न्पुमा॑ꣳसं॒परि॑पातुवि॒श्वत॑ः॥

अबीरं च गुलालं च चोवा चन्दनमेव च।
अबीरेणार्चितो देवमतः शान्तिं प्रयच्छ मे॥१॥
नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम्।
अबीरनामकं चूर्णं गन्धं चारु प्रगृह्यताम्॥२॥

शान्ति प्रदान करनेवाला अबीर-गुलाल चन्दनादि से निर्मित विभिन्न सुगन्धित द्रव्य नाना प्रकार के दिव्य द्रव्यों से निर्मित उत्तम अबीर नाम का सुगन्धित सुरुचिकर चूर्ण समर्पित है, हे देव! ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः नानापरिमलद्रव्याणि समर्पयामि।

सिन्दूरसमर्पणम्—दोनों हाथों से सिन्दूर लेकर समर्पित करे।

ॐ सिन्धो॑रिवप्प्राद्ध्व॒नेशू॒घ॒नासो॒व्वात॑प्प्रमियःपतय॑न्तिय॒ह्वाः। घृ॒तस्य॒धारा॑ऽअरु॒षोनव्वा॒जीकाष्ठा॑भि॒न्दन्नू॒र्म्मिभि॒ःपिन्व॑मानः॥

सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्धनम्।
शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम्॥

सर्व शोभायमान रक्तसिन्दूर, सभी सौभाग्य तथा सुख का वर्धन करनेवाला, सभी प्रकार के शुभ की कामना के लिए सिन्दूर समर्पित करता हूँ, हे देव! ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः सिन्दूराभरणं समर्पयामि। ततः नैवेद्यं पुरतः संस्थाप्य धूपदीपौ प्रज्वाल्य। धूपदीप जला करके नैवेद्य समर्पित करे।

धूपसमर्पणम्—दोनों हाथों से धूपपात्र लेकर समर्पित करे।

ॐ ब्राह्मणोऽस्यमुखंमासीद्बाहूराजन्न्यःकृतः॥ ऊरूतदस्ययद्वैश्यःपद्भ्याꣳ शूद्रोऽअजायत॥ ॐ धूरसिधूर्व्वधूर्व्वन्तंय्योऽस्मान्धूर्व्वतितंधूर्व्वयंव्वयंधूर्व्वामः॥ देवानामसि वह्नितमꣳसस्नितमंपप्रितमंजुष्ट्टतमंदेवहूतमम्॥

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्धमुत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

विभिन्न वनस्पतियों के रसों से निर्मित गन्धो में अत्युत्तम गन्धयुक्त धूप सभी देवताओं को सुगन्धि प्रदान के लिए है, हे देव! अपको समर्पित है।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः धूपं समर्पयामि।

दीपसमर्पणम्—दोनों हाथों से दीपपात्र लेकर समर्पित करे।

ॐ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत॥ ॐ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निःस्वाहासूर्य्योज्ज्योतिर्ज्ज्योतिःसूर्य्यः स्वाहा॥ अग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चःस्वाहासूर्य्योव्वर्च्चोज्ज्योतिर्व्वर्च्चःस्वाहा॥ ज्ज्योतिः सूर्य्यःसूर्य्योज्ज्योतिःस्वाहा॥

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥१॥
भक्त्या दीपं प्रयच्छामि देवाय परमात्मने।
त्राहि मां निरयाद् घोराद् दीपज्योतिर्नमोऽस्तु ते॥२॥

तीनों लोकों के अन्धकार को दूर करनेवाला, घृतयुक्त बत्तियों को अग्नि से प्रज्वलित किया है, हे देवेश! प्रसन्नता के लिए ग्रहण करें, भक्तिपूर्वक परमात्मदेव आपको समर्पित है, इसे ग्रहण करके इस घोरतम अज्ञानान्धकार से हमारी रक्षा करें, दीपज्योति को नमस्कार है।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः दीपज्योतिः समर्पयामि।

नैवेद्यसमर्पणम्—दोनों हाथों से नैवेद्यपात्र लेकर समर्पित करे।

ॐ नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत॥ पद्भ्याम्भूमिर्द्दिशःश्रोत्रा

त्तथालोकाँ२॥ऽअंकल्प्पयन्॥ ॐ अन्नपतेऽन्नस्यनोदेह्यनमीवस्यंशुष्मिमणंः॥ पप्र दातारंतारिषऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे॥

नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु।
ईप्सितं मे वरं देहि परत्र च परां गतिम्॥१॥
शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च।
आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्॥२॥

शर्कराखण्ड खाद्य दधि-दूध एवं घृत से युक्त भक्ष्य-भोज्य आहाररूपी नैवेद्य ग्रहण करके हमारी भक्ति को अचल करें और हमारी समस्त कामनाओं की पूर्ति करे तथा अन्त में परमगति प्रदान करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः नैवेद्यं समर्पयामि। ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ व्यानाय स्वाहा। मध्ये पानीयं जलं उत्तरापोशनं समर्पयामि।

करोद्वर्तनसमर्पणम्—दोनों हाथ से करोद्वर्तन लेकर समर्पित करे।

ॐ अद्दशुनातेअद्दशुःपृच्च्यतांपरुंषापरुंः॥ गन्धस्तेसोममवतुमदायरसोऽ अच्च्युतः॥

चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम्।
करोद्वर्तनकं देव! गृहाण परमेश्वर!॥

मलयाचल में उत्पन्न श्वेत चन्दन कस्तूरी इत्यादि गन्धों से युक्त हाथों को शुद्ध करने के लिए उद्वर्तन के रूप में ग्रहण कर प्रसन्न हों।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः करोद्वर्तनार्थे चन्दनानुलेपनं समर्पयामि।

ताम्बूलादिसमर्पणम्—दोनों हाथों सें ताम्बूल लेकर समर्पित करे।

ॐ यत्पुरुंषेणहुविषादेवायज्ञमतंतन्वत॥ व्वसन्तोऽस्यासीदाज्ज्यंग्गीष्मऽइध्मः शरद्धविः॥

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।
एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

महादिव्य पूगीफल (सुपाड़ी) नागवल्लीदल (पान के पत्ते से) युक्त एलादिचूर्ण (इलाइची इत्यादि) से सम्पृक्त ताम्बूल ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः मुखशुद्ध्यर्थे पूङ्गीफलमेलालवङ्गादि-सहित ताम्बूलपत्राणि समर्पयामि।

फलादिसमर्पणम्—दोनों हाथों से फलपात्र लेकर समर्पित करे।

ॐ याःफलिनीर्य्याऽअफलाऽअपुष्प्यायाश्श्चपुष्प्पिणींः॥ बृहस्प्पतिंप्प्रसूतास्तानो मुञ्चत्वंहसः॥

इदं फलं मया देव स्थापितं पुरतस्तव।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥

हे देव! हमने यह फल आपके सम्मुख स्थापित किया है, जिसे ग्रहण करके जन्म-जन्मान्तरों तक हमारी समस्त कामनाओं की पूर्ति करें तथा हमें यज्ञफलवान् करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः ऋतुकालोद्भवफलानि समर्पयामि।

दक्षिणासमर्पणम्—दोनों हाथों से दक्षिणा लेकर समर्पित करे।

ॐ हि॒र॒ण्य॒ग॒र्ब्भःसम॑वर्त्त॒ताग्ग्रे॑भू॒तस्य॑जा॒तःपति॒रेक॑ऽआसीत्॥ सदा॑धारपृथि॒वीं-द्यामु॒तेमांकस्मै॑दे॒वाय॑ह॒विषा॑विधेम्॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

हिरण्यगर्भ से निकले हेमबीज के समान (सुवर्ण के सदृश) शोभायमान अनन्त पुण्य फल को प्रदान करनेवाला, शान्ति प्रदान करनेवाली, सुवर्णमयी दक्षिणा ग्रहणकर शान्ति प्रदान करें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।

नीराजनसमर्पणम्—दोनों हाथों से नीराजन लेकर घुमाये।

ॐ आरा॑त्रि॒पार्थि॑व॒ꣳरजः॑पि॒तुर॑प्प्रायि॒धाम॑भिः॥ दि॒वःसदा॑ꣳसिबृह॒तीवि॒तिष्ठ॒स॒ऽआत्त्वे॒षंब्बर्त्तते॒तमः॑॥ ॐ इ॒दꣳह॒विःप्र॒जन॑नंमे॒ऽअस्तु॒दश॑वीर॒ꣳसर्व्व॑गण॒ꣳस्व॒स्तये॑॥ आ॒त्म॒सनि॑प्प्रजा॒सनि॑पशु॒सनि॑लोक॒सन्न्य॑भय॒सनि॑॥ अ॒ग्निःप्प्र॒जांब॑हु॒लांमे॑करो॒त्वन्नं॒पयो॒रेतो॑ऽअ॒स्मासु॑धत्त॥

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम्।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव॥

कदली (केला) के गर्भ से उत्पन्न (निर्मित) कर्पूर (जलता हुआ) से आरती करता हूँ, हमें कृपापूर्वक दृष्टि से देख करके वर प्रदानकर्ता बनें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः कर्पूरनीराजनं समर्पयामि।

पुष्पाञ्जलिसमर्पणम्—दोनों हाथों से पुष्प लेकर समर्पित करे।

ॐ य॒ज्ञेन॑य॒ज्ञम॑यजन्तदे॒वास्तानि॒धर्म्मा॑णिप्प्रथ॒मान्न्या॑सन्॥ तेह॒नाक॑म्महि॒मानः॑ सचन्त॒यत्र॒पूर्व्वे॑सा॒द्ध्याःसन्ति॑दे॒वाः॥

नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च।
पुष्पाञ्जलिर्मयादत्त गृहाण परमेश्वर!॥

अपने-अपने ऋतुओं में उत्पन्न नाना प्रकार के सुगन्धित पुष्पों से युक्त पुष्पाञ्जलि प्रदान करता हूँ, हे परमेश्वर! ग्रहणकर प्रसन्न हों।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः मन्त्रपुष्पाञ्जलिं समर्पयामि।

परिक्रमासमर्पणम्—दोनों हाथों सें पुष्प लेकर समर्पित करे।

ॐ स॒प्तास्या॑सन्परि॒धय॒स्त्रिःस॒प्तस॒मिधः॑कृ॒ताः॥ दे॒वायद्य॒ज्ञन्त॑न्वा॒नाऽअब॑ध्न॒न्पुरु॑षम्प॒शुम्॥

यानि कानि च पापानि जन्मान्तरकृतानि च।
तानि सर्वाणि नश्यन्ति प्रदक्षिणपदे पदे॥१॥

जन्म-जन्मान्तर में किये हुए सभी प्रकार के पाप एक-एक कदम देव प्रदक्षिणा करने से नष्ट हो जाते है॥१॥

पदे पदे या परिपूजकेभ्यः सद्योऽश्वमेधादिफलं ददाति।
तां सर्वपापक्षयहेतुभूतां प्रदक्षिणां ते परितः करोमि॥२॥

पूजन करने के बाद एक-एक कदम जो यज्ञकर्ता देव की परिक्रमा करता है, वह निश्चय ही अश्वमेधादि यज्ञों का फल प्राप्त करता है। अतः अपने जन्म-जन्मान्तरकृत समस्त पापों के क्षय के लिए आपकी परिक्रमा करता हूँ॥२॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः परिक्रमां समर्पयामि।

परिक्रमा के पश्चात् जल, गन्ध, अक्षत्, फल, पुष्प, दूर्वा, कुशा, दधि, दुग्ध, सर्षपादि द्रव्यों को अर्घ्यपात्र में लेकर विशेषार्घ्य प्रदान करे।

विशेषार्घ्यसमर्पणम्—दोनों हाथों में विशेषार्घ्य लेकर समर्पित करे।

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक!।
भक्तानामभयं कर्ता त्राता भव भवार्णवात्॥१॥

हे गणों के अध्यक्ष! रक्षा करें-रक्षा करें, हे त्रिलोकी के रक्षक! हमारी रक्षा करें, भक्तों को अभय प्रदान करनेवाले हमारे लिए इस भवसागर से त्राता हो जायें॥१॥

द्वैमातुर कृपासिन्धो षाण्मातुरग्रज प्रभो!।
वरदस्त्वं वरं देहि वांच्छितं वांच्छितार्थद॥२॥

हे कृपासिन्धु, दो माताओं से उत्पन्न, हे छः माताओं वाले स्कन्द के अग्रज! वर प्रदान करने वाले वरदाता! हमारी वांछित कामनाओं के लिए वांछित वर प्रदान करें॥२॥

अनेन सफलार्घ्येण फलदोऽस्तु सदा मम।

इस प्रकार फल के सहित अर्घ्य ग्रहण करके कामनापूर्ति रूपी फलप्रदाता सदा हमारे लिए हो जायें।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः विशेषार्घ्यं समर्पयामि।

प्रार्थनासमर्पणम्—दोनों हाथों सें पुष्प लेकर समर्पित करे।

ॐ विघ्नेश्वराय वरदाय सुरप्रियाय,
लम्बोदराय सकलाय जगद्धिताय।

नागाननाय श्रुतियज्ञविभूषिताय,
गौरीसुताय गणनाथ नमो नमस्ते॥१॥

हे विघ्नों को नष्ट करनेवाले विघ्नेश्वर! वरप्रदान करनेवाले वरदाता, देवताओं के प्रिय, लम्बे पेटवाले लम्बोदर, समस्त जगत् का हित करनेवाले, हाथी के आनन (सिर) वाले, श्रुतियों में वर्णित यज्ञवाले श्रुतियज्ञ, विभिन्न शोभाओ से विभूषित, गौरी के पुत्र गणों के स्वामी आपको नमस्कार है, नमस्कार है, नमस्कार है॥१॥

भक्तार्तिनाशनपराय गणेश्वराय,
सर्वेश्वराय शुभदाय सुरेश्वराय।
विद्याधराय विकटाय च वामनाय,
भक्तप्रसन्नवरदाय नमो नमस्ते॥२॥

भक्तों के आर्त (दीनता) को नाश करनेवाले, परब्रह्म गणेश्वर, सर्वेश्वर, समस्त शुभों के प्रदाता, देवताओं के ईश्वर, समस्त विद्याओं को धारण करनेवाले विद्याधर, विकट वामस्वरूप, भक्तों पर प्रसन्न रहने वाले वर प्रदान करनेवाले गणेश्वर आपको नमस्कार है, नमस्कार है, नमस्कार है॥२॥

नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः।
नमस्ते रुद्ररूपाय करिरूपाय ते नमः॥३॥

हे गणेश्वर! आपको ब्रह्मरूप में नमस्कार है, विष्णुरूप में नमस्कार है, रुद्ररूप में नमस्कार है तथा हस्तिमुखरूप (हाथी के मुख के रूप) में नमस्कार है॥३॥

विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे।
भक्तप्रियाय देवाय नमस्तुभ्यं विनायक!॥४॥

विश्वरूप के स्वरूपवाले गणेश आपको नमस्कार, ब्रह्मचारी रूपवाले गणेश आपको नमस्कार, भक्तों का प्रिय करनेवाले देव, विनायक गणेश आपको नमस्कार है॥४॥

लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय!।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥५॥

सदैव मोदकप्रिय (खाने में लड्डू से प्रेम करनेवाले) लम्बोदर गणेश नमस्कार है, आप सदैव सभी कार्यों में सर्वदा हमें निर्विघ्न करें॥५॥

त्वां विघ्नशत्रुदलनेति च सुन्दरेति,
भक्तप्रियेति सुखदेति फलप्रदेति।
विद्याप्रदेत्यघहरेति च ये स्तुवन्ति,
तेभ्यो गणेश वरदो भव नित्यमेव॥६॥

हे गणेश! आप विघ्नों का विनाश करनेवाले हैं, शत्रुओं का दलन करनेवाले हैं, सुन्दरों में सुन्दर, भक्तों का प्रिय करनेवाले हैं, भक्तों को सदैव सुख प्रदान करनेवाले हैं,

समस्त यज्ञफलों को प्रदान करनेवाले हैं, विद्या (ज्ञान) प्रदान करने वाले हैं, समस्त अघों का हरण करनेवाले हैं, आपका जो स्तवन करते हैं, उनको नित्य ही वर प्रदान करनेवाले होते हैं॥६॥

गणेशपूजने कर्म यन्न्यूनमधिकं कृतम्।
तेन सर्वेण सर्वात्मा प्रसन्नोऽस्तु सदा मम॥७॥

गणेश के पूजन में जो कर्म कम अथवा अधिक किया गया हो, उन सभी कर्मों से सर्वात्मा गणेश हमारे ऊपर सदैव प्रसन्न हो।

देवि प्रपन्नार्तिहरे प्रसीद, प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि! पाहि विश्वं, त्वमीश्वरी देवि! चराचरस्य॥१॥

शरण में आये हुए भक्तों के पीड़ा का निवारण करनेवाली देवी हमारे ऊपर प्रसन्न होइये, सम्पूर्ण जगत् की जननी हम पर प्रसन्न हो जाइये। हे विश्वेश्वरी! विश्व का त्राण करें। हे देवी! तुम्हीं चराचर विश्व की अधिष्ठात्री हो॥१॥

रक्षांसि यत्रोग्रविषाश्च नागा, यत्राऽरयो दस्युबलानि यत्र।
दावानलो यत्र तथाऽब्धिमध्ये, तत्र स्थिता त्वं परिपासि विश्वम्॥२॥

हे देवी! जहाँ दैत्य, भयंकर विषधर सर्प, शत्रुओं, लुटेरों के समुदाय और दावाग्नि हो, वहाँ तथा समुद्र के बीच मे नित्य निरन्तर साथ रहकर निरन्तर कल्याण करती हो, वैसे ही हमारा कल्याण करो॥२॥

मुखे ते ताम्बूलं नयनयुगले कज्जलकला,
ललाटे काश्मीरं विलसति गले मौक्तिकलता।
स्फुरत्काञ्ची-शाटी पृथुकटितटे हाटकमयी,
भजामि त्वां गौरीं नगपतिकिशोरीमविरतम्॥३॥

मुख में ताम्बूल, दोनों आँखों में काजल धारण की हुई, गले में मौक्तिक मणि की माला धारण की हुई, सुवर्ण के समान साड़ी धारण की हुई, कमर में करधनी शोभित करती हुई, पर्वत की पुत्री महागौरी को सतत (बिना विराम किये) भजता हूँ॥३॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः प्रार्थनापूर्वकस्तुतिपाठं समर्पयामि।

पूजन समर्पण के बाद अथर्वशीर्ष का पाठ करे।

गणेशाऽथर्वशीर्षः

ॐ लँ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासि। त्वमेव केवलं हर्तासि। त्वमेव सर्वं खल्विदं ब्रह्मासि। त्वं साक्षदात्मासि नित्यम्। ऋतं वच्मि। सत्यं वच्मि। अव त्वं माम्। अव वक्तारम्। अव श्रोतारम्। अव दातारम्। अव धातारम्। अवानूचानम्। अव शिष्यम्। अव

पश्चात्तात्। अव पुरस्तात्। अव चोत्तरात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात्। त्वं वाङ्मयः। त्वं चिन्मयः। त्वमानन्दमयः। त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि। सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोऽनिलोनभः। त्वं चत्वारि वाक्पदानि। त्वं गुणत्रयातीतः। त्वं कालत्रयातीतः। त्वं देहत्रयातीतः। त्वं मूलाधारस्थितोऽसि नित्यम्। त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्मा। त्वं विष्णुः। त्वं रुद्रः। त्वं इन्द्रः। त्वं अग्निः। त्वं वायुः। त्वं सूर्यः। त्वं चन्द्रमा। त्वं ब्रह्म भूर्भुवः स्वरोम्। गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम्। अनुस्वारः परतरः। अर्धेन्दुलसितम्। तारेण रुद्धम्। एतत्तव मनुस्वरूपम्। गकारः पूर्वरूपम्। अकारो मध्यमरूपम्। अनुस्वारश्चान्त्य रूपम्। बिन्दुरुत्तररूपम्। नादः सन्धानम्। संहिता सन्धिः। सैषा गणेशविद्या। गणक ऋषिः। निचृद्गायत्री छन्दः। श्रीमहागणपतिः देवता। ॐ गं गणपतये नमः। एकदन्ताय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात्। एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम्। अभयं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम्। रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम्। रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्। भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्। आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्। एवं ध्यायति यो नित्यं स योगी योगिनां वरः। नमो व्रातपतये। नमो गणपतये। नमः प्रमथपतये। नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्नविनासिने शिवसुताय श्रीवरदमूर्तये नमः॥

ॐ लँ (पृथ्वीतत्त्व) स्वरूपवाले गणपति के लिए नमस्कार है, तुम्हीं प्रत्यक्ष तत्त्व स्वरूप हो, एक तुम्हीं संसार के कर्त्ता हो, एक तुम्हीं संसार के धर्ता हो, एक तुम्हीं संसार का संहार करनेवाले हो, एक तुम्हीं सभी में ब्रह्मरूप हो, एक तुम्हीं साक्षात् आत्मस्वरूप हो। एक तुम्हीं नित्य हो, ऋत कहता हूँ, सत्य कहता हूँ, तुम ही मुझमें हो, तुम ही वक्त्र में हो। तुम ही श्रोत्र में हो, तुम ही दाता हो, तुम ही धारण करते हो, तुम ही नीचें में हो, तुम ही शिष्य में हो, तुम ही बाद में हो, तुम ही चारो तरफ हो, तुम ही उत्तर दिशा में हो। तुम ही दक्षिण दिशा में हो, तुम ही उपर की तरफ हो, तुम ही आधार में हो, सर्वत्र सभी तरफ से हमारी रक्षा करो, पूर्णरूप से रक्षा करो, तुम ही वाणीरूप हो, तुम ही चिन्मय रूप हो, तुम ही आनन्दस्वरूप हो, तुम ही ब्रह्मस्वरूप हो, तुम हीं अद्रितीय सच्चिदानन्द स्वरूप हो, तुम ही प्रत्यक्ष ब्रह्मा हो, तुम ही ज्ञानस्वरूप, विज्ञानस्वरूप हो, तुम से ही समस्त जगत् तत्त्वस्वरूप से उत्पन्न होता है, तुममें ही समस्त जगत् अवस्थित है, तुममें ही समस्त जगत् का लय होता है, समस्त जगत् तुममें ही प्रतीत होता है, तुम ही भूमि, जल, अग्नि, वायु तथा आकाशस्वरूप हो, तुम ही परा-पश्यन्ती-मध्यमा-वैखरी—चार वाणी स्वरूप हो, तुम ही सत्त्व-रज-तम तीनों गुणों से अतीत (त्रिगुणों के पूर्व के) हो,

तुम ही काल से भी (अतीत) पहले के हो, तुम ही तीनों शरीर (सूक्ष्म, कारण, स्थूल) से (अतीत) पहले के हो, तुम ही नित्य मूलाधार में स्थित हो, तुम ही तीन प्रकार की शक्तियाँ सत्त्व-रज-तमात्मक महाकाली-महालक्ष्मी-महासरस्वत्यात्मक तथा ओज, तेज, बलस्वरूप हो, तुम्हारा ही योगीजन नित्य ध्यान करते हैं, तुम ही ब्रह्मा हो, तुम ही विष्णु हो, तुम ही रुद्र हो, तुम ही इन्द्र हो, तुम ही अग्नि हो, तुम ही वायु हो, तुम ही सूर्य हो, तुम ही चन्द्रमा हो, तुम ही ब्रह्म भूर्भुवः स्वः हो, तुम ही गणों में पूर्व उच्चार्य हो (वर्णों में सर्व प्रथम उच्चारण होता है अर्थात् ॐकारस्वरूप), तुम ही अनुस्वार तथा अनुस्वार के बाद आने वाले विसर्ग स्वरूप हो, तुम ही अर्धेन्दु से लसित (अर्धचन्द्र स्वरूप से युक्त अर्द्धचन्द्र अर्थात् सानुनासिकानुस्वार) हो, तुम ही तार (प्रणव) से रुद्ध (युक्त) हो, इस प्रकार तुम ही मनुष्य स्वरूप हो, गं बीज में तुम ही गकार वर्णरूपी पूर्व (आगे आनेवाले प्रथम वर्ण) स्वरूप हो, गं बीज में तुम ही अकारस्वरूप मध्यम वर्णरूप हो, गं बीज में अनुस्वार वर्णरूपी तुम ही अनुस्वारस्वरूप (अन्त्य में आने वाला वर्ण) हो, तुम ही उत्तररूप विन्दु स्वरूप हो, तुम ही नादस्वरूप सन्धानयोग्य हो, तुम ही संहिता में सन्धिस्वरूप हो, तुम ही वह इस प्रकार की गणेश विद्या हो, तुम ही गणकसंज्ञक ऋषि हो, तुम ही निचिद् गायत्री (गायत्री छन्द से पहले का छन्द) स्वरूप हो, तुम ही महागणपति देवता हो, तुम ही ॐ गं गणपतये मन्त्रस्वरूप हो, तुम ही एकदन्ताय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात् गायत्री मन्त्रस्वरूप हो, तुम ही एकदन्त (एक दाँतवाले अर्थात् एक वचनवक्ता), चतुर्हस्त (चार हाथों-वाले) हो, तुम ही चारों हाथों में पाश, अंकुश, अभय और वरद धारण करनेवाले हो, तुम ही मूषक ध्वजा से शोभायमान हो, तुम ही लाल, लम्बे उदरवाले, सूप के समान कर्ण वाले और लाल वस्त्र धारण करने वाले हो, तुम ही अंगों में रक्त गन्ध का अनुलेपन करने-वाले हो, तुम ही रक्त पुष्पों से सुपूजित हो, तुम ही भक्तों पर अनुकम्पा करनेवाले हो, तुम ही जगत्कारणस्वरूप अच्युत देव हो, तुम ही सर्वप्रथम सृष्टि के आदि में आविर्भूत होकर प्रकृति-पुरुष स्वरूप हो, इस प्रकार जो योगी नित्य ध्यान करता है, वह योगी योगियों में वरण योग्य होता है, व्रतों (तपस्या के नियमों) के पति तुम्हें नमस्कार है, गणों के स्वामी तुम्हें नमस्कार है, प्रमथादि गणों के मालिक तुम्हें नमस्कार है, लम्बोदर को नमस्कार है, एकदन्त को नमस्कार है, हे विघ्नों के विनाशक शिव के पुत्र श्रीवरदमूर्ति नमस्कार है, पुनः नमस्कार है, बारम्बार नमस्कार है।

पाठ के बाद फलश्रुति का पाठ अवश्य करे।

गणेशाथर्वशीर्षमाहात्म्यम्

एतदथर्वशिरो योऽधीते स ब्रह्मभूयाय कल्पते। स सर्वविघ्नैर्न बाध्यते। स सर्वतः सुखमेधते। स पञ्चमहापातकोपपातकात् प्रमुच्यते। सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानो

अपापो भवति। सर्वत्राधीयानोऽपविघ्नो भवति। धर्मार्थ-काम-मोक्षं च विन्दति। इदमथर्वशीषमशिष्याय न देयम्। यो यदि मोहाद्दास्यति स पापीयान्भवति। सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत्। अनेन गणपतिमभिषिञ्चति स वाग्मी भवति। चतुर्थ्यामनश्नन् जपति स विद्यावान्भवति। इत्यथर्वणमंहावाक्यम्। ब्रह्माद्याचरणं विद्यात्। न बिभेति कदाचनेति। यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति। यो लाजैर्यजति स यशोवान्भवति स भेधावान्भवति। यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति। यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते। अष्टौ ब्राह्मणान्सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति। सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति। महाविघ्नात् प्रमुच्यते। महापापात् प्रमुच्यते। महादोषात् प्रमुच्यते। स सर्वविद्भवति। य एवं वेद॥

इस प्रकार अथर्वशीर्ष का जो पाठ करता है, वह ब्रह्मत्व की कल्पना करके ब्रह्मरूप हो जाता है, उसे कोई भी विघ्न-बाधा नहीं पहुँचाते, वह सर्वत्र ही सुख पाता है, वह पाँच प्रकार के महापातक (महापाप), पातक (पाप), उपपातक (उपपाप) से छूट जाता है, सायंकाल पाठ करने से दिन भर का किया हुआ पाप नष्ट हो जाता है, प्रात:काल पाठ करने से रात्रिकाल में किये गये पाप नष्ट हो जाते हैं, इस अर्थर्वशीर्ष का सायंप्रान: पाठ करने से पाठकर्ता अपाप (निष्पाप) हो जाता है, सदा सर्वत्र पाठ करनेवाला सभी विघ्नों से मुक्त हो जाता है और उसे धर्म, अर्थ, काम तथा मोक्ष चारो पुरुषार्थ प्राप्त होता है, इस अथर्वशीर्ष को अशिष्य को कभी नही देना चाहिए, यदि मोहवश कोई अशिष्य को देता है तो वह पापी होता है, सहस्र आवृत्ति पाठ करने से जो-जो कामनाएँ होती हैं, उन-उन कामनाओं की पूर्ति होती है, इस प्रकार से जो महागणपति का अभिसिंचन करता है वह वाणी का पति हो जाता है, चतुर्थी तिथि को सूर्योदय से सूर्योदयपर्यन्त अनवरत जपने से जप करने वाला विद्यावान् (ज्ञानवान्) हो जाता है, इस अथर्वशीर्ष का महावाक्य-ब्रह्मविद्या (ब्रह्मत्व प्राप्ति) आचरण की विद्या है, इसमें भेद कभी नही मानना चाहिये, जो दूर्वाङ्कुरों से अर्चन करते है वे वैश्रवणोपम होते है, जो लाजा (लावा) से अर्चन करता है वह यशोवान् होता है वह मेधावान् होता है, जो सहस्र मोदक (लड्डूओं) से अर्चन करते हैं वे अपनी अभिलषित कामनाओं की पूर्ति करते हैं, जो घी के साथ समिधा से हवन करते हैं वे सभी कुछ प्राप्त कर लेते हैं, आठ ब्राह्मणों को पूर्णरूपेण ग्रहण कराने से सूर्य के वर्चस्व वाला होता है, सूर्यग्रहण के समय में महानदी में (समुद्रगामिनी नदी में) प्रतिमा (मूर्ति) के सांनिध्य में जपने से मन्त्र सिद्ध होता है, वह महाविघ्नों से छूट जाता है, वह महापापों से भी छूट जाता है, वह महादोषों से छूट जाता है, वह सर्वज्ञ हो जाता है, यही परम महाज्ञान है।

ॐ भूर्भुवः स्वः गणेशाय नमः स्तुतिपाठं समर्पयामि।

देव्याथर्वशीर्षः

ॐ सर्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवीति॥१॥

सभी देवता देवी के समीप जाकर पूछने लगे, हे महादेवि! तुम कौन हो?॥१॥

साब्रवीत्—अहं ब्रह्मस्वरूपिणी। मत्तः प्रकृतिपुरुषात्मकं जगत्। शून्यं चाशून्यं च॥२॥

इस प्रश्न के उत्तर में महादेवी ने कहा—मैं ब्रह्मस्वरूपा हूँ, मुझसे प्रकृति-पुरुषरूप सद्रूप और असद्रूप जगत् उत्पन्न हुआ है॥२॥

अहमानन्दानानन्दौ। अहं विज्ञानाविज्ञाने। अहं ब्रह्मा ब्रह्मणीवेदितव्ये। अहं पञ्चभूतान्यपञ्चभूतानि। अहमखिलं जगत्॥३॥

मैं आनन्द और अनानन्दरूपा हूँ, मैं विज्ञान और अविज्ञानरूपा हूँ, अवश्य जानने योग्य ब्रह्म और अब्रह्म (ब्रह्म से भिन्न माया) भी मैं ही हूँ, मैं ही पञ्चमहाभूत तथा विश्व में व्याप्त पञ्चभूत हूँ, मैं ही सम्पूर्ण जगत् स्वरूप हूँ॥३॥

वेदोऽहमवेदोऽहम्। विद्याहमविद्याहम्। अजाहमनजाहम्। अधश्चोर्ध्वं च तिर्यक्चाहम्॥४॥

वेद (ज्ञान) और अवेद (अज्ञान) मैं ही हूँ, विद्या (ब्रह्मज्ञान) और अविद्यारूप (माया) भी मैं ही हूँ। मैं अजा (जन्म न लेनेवाली मूलप्रकृति) और अनजा (जन्म लेनेवाली माया) भी हूँ, नीचे ऊपर तथा अगल-बगल भी मैं ही हूँ॥४॥

अहं रुद्रेभिः वसुभिश्चरामि। अहमादित्यैरुत विश्वदेवैः। अहं मित्रावरुणावुभौ बिभर्मि। अहमिन्द्राग्नी अहमश्विनावुभौ॥५॥

मैं रुद्रों और वसुओं के रूप में सञ्चार करती हूँ, मैं आदित्यों और विश्वेदेवों के रूपों में विचरण करती हूँ, मैं मित्र और वरुण दोनों देवताओं का भरण-पोषण करती हूँ, मैं ही इन्द्र, अग्नि तथा दोनों अश्विनीकुमारों का भी भरण-पोषण करती हूँ॥५॥

अहं सोमं त्वष्टारं पूषणं भगं दधामि। अहं विष्णुमुरुक्रमं ब्रह्माणमुत प्रजापतिं दधामि॥६॥

मैं सोम, त्वष्टा, पूषा और भग देवता को भी धारण करती हूँ। त्रैलोक्य को आक्रान्त करनेवाले विस्तीर्ण पादप्रच्छेप करनेवाले विष्णु, ब्रह्मदेव और प्रजापति को मैं ही धारण करती हूँ॥६॥

अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते। अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्। अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे। य एवं वेद। स दैवीं सम्पदमाप्नोति॥७॥

मैं ही यजमान के द्वारा अग्नि में दिये गये विधिपूर्वक हवि को तथा सोमरस निकालने

वाले यजमान के लिए धन को धारण करती हूँ, मैं ही सम्पूर्ण (राष्ट्र) जगत् स्वरूपा हूँ, वसुओं की कामनाओं से यजन करनेवालों को धन प्रदान करती हूँ, मैं ही ब्रह्मरूप और यज्ञार्हों में मुख्य रूपा हूँ, मैं ही आत्मस्वरूपपर आकाशादि निर्माण करती हूँ, मेरा स्थान आत्मस्वरूप को धारण करनेवाली बुद्धि-वृत्तियों में है, ऐसा इस प्रकार से जो जानता है, वह दैवी सम्पत्ति (समस्त सिद्धियों समस्त निधियों) को प्राप्त करता है॥७॥

ते देवा अब्रुवन्—तब उन देवताओं ने कहा—

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥८॥

देवी को नमस्कार है, महादेवी को नमस्कार है, शिव की पराशक्ति शिवा को नमस्कार है, मूलप्रकृति देवी को नमस्कार है, सबका कल्याण करने वाली भद्रा देवी को नमस्कार है, नियति देवी (जगत् को नियन्त्रित करनेवाली) को नमस्कार है, सभी रूपोंवाली देवी को बारबार प्रणाम है। गुणसाम्यावस्थारूपिणी मङ्गलमयी देवी को नमस्कार है, नियमयुक्त होकर प्रणाम करते हैं॥८॥

तामग्निवर्णां तपसा ज्वलन्ती वैरोचनी कर्मफलेषु जुष्टाम्।
दुर्गां देवीं शरणं प्र पद्यामहेऽसुरान्नाशयित्र्यै ते नमः॥९॥

उस अग्निवर्ण वाली, तपस्या से उद्दीप्तमान दीप्तिमती कर्मफल की कामना से यजन की जानेवाली दुर्गा देवी की हम शरण में है, असुरों का नाश करनेवाली देवी को नमस्कार है॥९॥

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु॥१०॥

जिस विश्वरूपा देवी के कारण देवता लोग वाणीवान् होते हैं अर्थात् जिसे वैखरीरूप से बोलते हैं वह कामधेनुसदृश आनन्ददायक और अन्न तथा बल देनेवाली वाग्रूपिणी भगवती उत्तम स्तुति से सन्तुष्ट होकर हमारे समीप आकर दर्शन दे॥१०॥

कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम्।
सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम्॥११॥

काल का भी नाश करने वाली, वेदों द्वारा स्तुति की गयी विष्णुशक्ति, स्कन्दमाता (शिवशक्ति), सरस्वती (ब्रह्मशक्ति), देवमाता (अदिति) और दक्षकन्या (सती), पापनाशिनी कल्याणकारिणी भगवती को हम प्रणाम करते हैं॥११॥

महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि।
तन्नो देवी प्रचोदयात्॥१२॥

हम उस महालक्ष्मी को जानते है और उस सर्वशक्तिस्वरूपिणी का ही ध्यान करते हैं। वह ही देवी हमें उस विषय (ब्रह्मज्ञानादिध्यान) में प्रवृत्त करे॥१२॥

अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव।
तां देवा अन्वजायन्त भद्रा अमृतबान्धवः॥१३॥

हे दक्ष! आपकी जो कन्या अदिति है वे प्रसूता हुई और उनसे मृत्युरहित कल्याणमय देव उत्पन्न हुए हैं॥१३॥

कामोयोनिः कमला वज्रपाणिः गुहा हसा मातरिश्वाभ्रमिन्द्रः।
पुनर्गुहा सकला मायया च पुरूच्यैषा विश्वमातादिविद्योम्॥१४॥

काम (क), योनि (ए), कमला (ई), वज्रपाणि (ल), गुहा (ह्रीं) ह-स वर्ण, मातरिश्वा वायु (क), अभ्र (ह), इन्द्र (ल), पुनः गुहा (ह्रीं), स, क, ल, वर्ण और माया (ह्रीं) यह सर्वात्मिका जगन्माता की मूल विद्या है और वह ब्रह्मस्वरूपिणी है॥१४॥

एषाऽऽत्मशक्तिः। एषा विश्वमोहिनी। पाशाङ्कुशधनुर्बाणधरा। एषा श्रीमहाविद्या। य एवं वेद स शोकं तरति॥१५॥

इस प्रकार की यही आत्मशक्ति है, ये ही विश्वमोहिनी महामाया है, ये पाश, अंकुश, धनुष और बाण धारण करनेवाली है, ये ही श्रीसंज्ञक महाविद्या है, जो ऐसा जानता है, वह शोकों को पार कर जाता है॥१५॥

नमस्ते अस्तु भगवति मातरस्मान् पाहि सर्वतः॥१६॥

हे भगवति! तुम्हें नमस्कार है, हे मातः! हम सभी की सभी प्रकार से सर्वत्र रक्षा करें॥१६॥

सैषाष्टौ वसवः। सैषैकादश रुद्राः। सैषा द्वादशादित्याः। सैषा विश्वेदेवाः सोमपा असोमपाश्च। सैषा यातुधाना असुरारक्षांसि पिशाचाः यक्षाः सिद्धाः। सैषा प्रजापतीन्द्रमनवः। सैषा ग्रहनक्षत्रज्योतीषि। कलाकाष्ठादिकालरूपिणी। तामहं प्रणौमि नित्यम्॥१७॥

वे ही अष्टवसु हैं, वे ही एकादशरुद्र हैं, वे ही द्वादशआदित्य हैं, वे ही विश्वेदेव हैं, वे ही सोमरस पान करनेवाले देवता हैं, वे ही सोम रस का पान न करने वाले असुर हैं, वे ही यातुधानों, असुरों, पिशाचों, यक्षों और सिद्धों से रक्षा करती हैं, वे ही सत्व-रज-तम त्रिगुणरूप हैं, वे ही ब्रह्म-विष्णु-रुद्ररूप हैं, वे ही प्रजापति, इन्द्र तथा मनु हैं, वे ही ग्रहनक्षत्रज्योतिस्वरूप हैं, वे ही कलाकाष्ठादियों में कालरूप हैं, उन सार्वभौम सर्वव्याप्त देवी को नित्य सदैव ही प्रणाम करता हूँ॥१७॥

पापापहारिर्णी देवीं भुक्तिमुक्तिप्रदायिनीम्।
अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवाम्॥१८॥

वे ही पाप से छुटकारा दिलानेवाली हैं, वे ही देवी भुक्ति और मुक्ति दोनों को प्रदान करती हैं, उन अन्तरहित, विजयाधिष्ठात्री, निर्दोष, शरण लेने योग्य, कल्याणदात्री और मङ्गलरूपिणी देवी को नित्य सदैव ही प्रणाम करता हूँ॥१८॥

वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम्।
अर्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम्॥१९॥

वियत्-आकाश (ह) तथा (ई) कार से संयुक्त वीतिहोत्र-अग्नि (र) सहित, अर्धचन्द्र (ँ) से अलंकृत जो देवी का बीज है, वह सब कामनाओं तथा मनोरथों को पूर्ण करनेवाला है॥१९॥

एवमेकाक्षरं ब्रह्म यतयः शुद्धचेतसः।
ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः॥२०॥

इस प्रकार इस एकाक्षर (ह्रीं) स्वरूप का यतिमुनि साधक जन ध्यान करते हैं, जिनका चित्त शुद्ध है, जो निरतिशयानन्दपूर्ण और ज्ञान के सागर हैं। (यह मन्त्र देवी का प्रणव कहा जाता है। ॐकार के समान ही यह भी व्यापक है। संक्षेप में इसका अर्थ इच्छा-ज्ञान-क्रिया के आधार अद्वैत, अखण्ड, सच्चिदानन्द, समरसीभूत, शिवशक्त्यात्मक है)॥२०॥

वाङ्मया ब्रह्मसूस्तस्मात् षष्ठं वक्त्रसमन्वितम्।
सूर्योऽवामश्रोत्रबिन्दुसंयुक्ताष्टात्तृतीयकः ॥२१॥
नारायणेन सम्मिश्रो वायुश्चाधरयुक् ततः।
विच्चे नवार्णकोऽर्णः स्यान्महदानन्ददायकः॥२२॥

वाणी (ऐं), माया (ह्रीं), ब्रह्मसू काम (क्लीं), इसके बाद छठवां व्यञ्जन अर्थात् (च) वर्ण, वही वक्त्र अर्थात् आकार से युक्त (चा), सूर्य (म), अवाम श्रोत्र अर्थात् दक्षिण कर्ण (उ), और विन्दु अर्थात् (आ) से मिश्रित (डा), वायु (य) अधर अर्थात् (ऐं) से युक्त (यै) और विच्चे यह नवार्ण मन्त्र उपासकों को आनन्द और ब्रह्मसायुज्य देनेवाला है। (इस मन्त्र का अर्थ यह है कि हम चित्स्वरूपिणीमहासरस्वती-सद्रूपिणीमहालक्ष्मी-आनन्दरूपिणीमहाकाली, ब्रह्मविद्या पाने के लिए सदैव समय ध्यान करते हैं। हे महाकाली-महालक्ष्मी-महासरस्वती स्वरूपिणी चण्डिका देवी! तुम्हें नमस्कार है। अविद्यारूपी रज्जु की दृढ़ ग्रन्थि को खोलकर मुझे मुक्त करो)॥२१-२२॥

हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम्।
पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम्॥२३॥
त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे।

हृत्कमल के मध्य में रहनेवाली, प्रातःकालीन सूर्य के समान प्रभाववाली, पाश और अङ्कुश धारण करनेवाली, मनोहर रूपोंवाली, वरद और अभयमुद्रा धारण किये हुए हाथों वाली, तीन नेत्रों से युक्त, रक्त वस्त्र परिधान करनेवाली और कामधेनु के समान भक्तों के मनोरथ पूर्ण करनेवाली महादेवी को भजता हूँ॥२३॥

नमामि त्वां महादेवीं महाभयविनाशिनीम्॥२४॥
महादुर्गप्रशमनीं महाकारुण्यरूपिणीम्।

हे महादेवी! महाभय का नाश करने वाली, महासङ्कट को शान्त करनेवाली और महान् करुणा की साक्षात् मूर्ति को नमस्कार करते हैं।।२४।।

यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यते अज्ञेया। यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्ता। यस्या लक्ष्यं नोपलक्ष्यते तस्मादुच्यते अलक्ष्या। यस्या जननं नोप लभ्यते तस्मादुच्यते अजा। एकैव सर्वत्र वर्तते तस्मादुच्यते एका। एकैव विश्वरूपिणी तस्मादुच्यते नैका। अत एवोच्यते अज्ञेयानन्तालक्ष्या-जैका नैकेति।।२५।।

जिसका स्वरूप ब्रह्मादि नहीं जानते इसलिए अज्ञेया कहते हैं, जिसका अन्त कभी नही होता इसलिए जिसे अनन्ता कहते हैं, जिसका लक्ष्य दीख नहीं पाता इसलिए अलक्ष्या कहते है, जिसका जनन नही होता है इसलिये अजा कहते हैं, एक ही सर्वत्र उपस्थित है (एक ही रूप में) इसलिए एका कहते है, जो सर्वत्र अकेली ही विश्वरूप है इसलिए नैका कहते है, वह इसीलिए अज्ञेया, अनन्ता, अलक्ष्या, अजा, एका और नैका कहलाती है।।२५।।

मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी।
ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी।।२६।।

जो महादेवी सभी मन्त्रों में मातृका रूप (मूलाक्षर) है, शब्दों मे ज्ञान (अर्थ) रूप से जो व्याप्त है, ज्ञानों में जो चिन्मयातीता है, शून्यों में शून्यसाक्षिणी हैं।।२६।।

यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता।
तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम्।।२७।।
नमामि भवभीतोऽहं संसारार्णवतारिणीम्।

जिनसे कुछ भी अन्य श्रेष्ठ नहीं है, वही दुर्गा नाम से प्रसिद्ध हैं, उस दुर्विज्ञेय (बहुत कठिनाई से जाना जाता है), दुराचारनाशक (अव्यवहारों को नष्ट करनेवाली), संसार सागर से तारनेवाली देवी को संसार से डरे हुए हम नमस्कार करते है।।२७।।

देव्याथर्वशीर्षमाहात्म्यम्

इदमथर्वशीर्षं योऽधीते स पञ्चाथर्वशीर्षजपफलमाप्नोति। इदमथर्वशीर्षमज्ञात्वा योऽर्चां स्थापयति शतलक्षंप्रजप्त्वापि सोऽर्चासिद्धिं न विन्दति, शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः।।२८।।

इस अथर्वशीर्ष का जो अध्ययन तथा पाठ करता है, वह पाँचों अथर्वशीर्ष के पाठ-जपादि का फल प्राप्त करता है। इस अथर्वशीर्ष को विना जाने जो अर्चनापूजनादि करता है, वह सैकड़ों-लाखों बार भी अर्चन-पूजन करता है तो भी उसे सिद्धि नहीं मिलती है। एक सौ आठ बार पाठ करना ही इस अथर्वशीर्ष का पुरश्चरण कहा गया है।।२८।।

दशवारं पठेद्यस्तु सद्यः पापं प्रमुच्यते।
महादुर्गाणि तरति महादेव्या प्रसादतः॥२९॥

इस अथर्वशीर्ष का दश बार पाठ जो करता है, वह पूर्ण रूप से पापों से मुक्त हो जाता है और महादेवी का कृपाप्रसाद प्राप्त करके महानतम दुर्गम कठिनाइयों को भी पार कर जाता है॥२९॥

सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानो अपापो भवति। निशीथे तुरीयसंध्यायां जप्त्वा वाक् सिद्धिर्भवति। नूतनायां प्रतिमायां जप्त्वा देवतासान्निध्यं भवति। प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति। भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति। स महामृत्युं तरति य एवं वेद॥२९॥

सायंकाल जो इस अथर्वशीर्ष का पाठ करता है वह दिन भर के किये गये पापों से छूट जाता है। प्रातः काल जो इस अथर्वशीर्ष का पाठ करता है वह रात्री कालीन किये गये पापों से छूट जाता है। जो इस अथर्वशीर्ष का सायंकाल तथा प्रातःकाल पाठ करता है, वह पूर्णतः पापों से हीन हो कर पुण्यवान् हो जाता है। निशाकाल में तुरीय सन्ध्या के समय (अर्धरात्रि के समय) जो इस अथर्वशीर्ष का पाठ करता है उसके वाणी की सिद्धि हो जाती है, नूतन प्रतिमा में जो इस अथर्वशीर्ष का अष्टोत्तरशत पाठ करता है वह इष्ट देवता का सानिध्य प्राप्त करता है, प्राण-प्रतिष्ठा के समय इस अथर्वशीर्ष का पाठ करने से प्राणों की प्रतिष्ठा होकर चैतन्यता आती है। भौमवार को अश्विनी नक्षत्र पड़ने पर जो लोग इस अथर्वशीर्ष का अष्टोत्तरशत पाठ करते हैं वे महामृत्यु को भी पार कर जाते हैं, वह महामृत्यु को भी पार कर जाते है, यही वेद (शाश्वत ज्ञान) है, यही ज्ञान प्राप्त करना चाहिए॥२९॥

ॐ भूर्भुवः स्वः पराम्बिकायै नमः स्तुतिपाठं समर्पयामि।

अनेन यथोपलब्धद्रव्येण गणेशाम्बिकापूजनेन गणेशाम्बिके प्रीयेतां न मम॥

श्रीगणेशाम्बिकापूजनं परिपूर्णम्

●

स्वस्तिकलशस्थापनम्



भूमिस्पर्श—**ॐ म॒हीद्यौःपृथि॒वीचन॒ऽइ॒मंय्य॒ज्ञंमिमिक्षताम्॥ पिपृतानो॒भरीमभिः॥**

सप्तधान्य बिखेरना—**ॐ ओषधय॒ःसमवदन्त॒सोमेनस॒हराज्ञा॥ यस्म्मैकृ॒णोति ब्राह्म॒णस्तꣳराजन्पारयामसि॥**

कलशस्थापन—**ॐ आजिग्घ्रक॒लशंम॒ह्यात्वाव्विश॒न्त्विन्दवः॥ पुनरू॒र्ज्जानिवर्त स्व॒सानःस॒हस्रंधुक्क्ष्वो॒रुधारा॒पयस्वती॒पुन॒र्म्माविशताद्द्रयिः॥**

कलश में जल भरना—**ॐ व्वरुणस्यो॒त्तम्भनमसि॒व्वरुणस्यस्कम्भ॒सर्ज्जनीस्त्थो॒ व्वरुणस्यऽऋत॒सदन्न्यसि॒व्वरुणस्यऽऋत॒सदनमसि॒व्वरुणस्यऽऋत॒सदनमासीद।**

कलश में गन्ध डाले—**ॐ त्वाङ्गन्ध॒र्व्वाऽअखन॒ँस्त्वामिन्द्रस्त्वाम्बृह॒स्पतिः॥ त्वामोषधे॒सोमो॒राजाव्वि॒द्वान्न्यक्ष्मादमुच्च्यत॥**

कलश में सर्वौषधी डाले—**ॐ याओषधी॒ःपूर्व्वाजा॒तादेवेब्भ्यस्त्रियु॒गंपुरा॥ मनै॒नु ब॒ब्भ्रुणाम॒हꣳश॒तंधामानि स॒प्त च॥**

कलश में दूर्वा डाले—**ॐ काण्डात्काण्डात्प्ररोहन्ती॒परुषःपरु॒ष्प्परि॥ ए॒वानो दूर्व्वे॒प्प्रतनुस॒हस्रेण श॒तेन च॥**

कलश में पञ्चपल्लव डाले—**ॐ अ॒श्व॒त्त्थेवोनि॒षदनंप॒र्ण्णेवोव्वस॒तिष्कृ॒ता॥ गो॒भाज॒ऽइत्किलासथ॒यत्स॒नवथ॒पूरुषम्॥**

कलश में कुश डाले—**ॐ प॒वित्रैस्त्थोव्वैष्ण्ण॒व्यौसवि॒तुर्व्वःप्प्रस॒वऽउत्पुना॒म्म्यच्छिद्द्रेण प॒वित्रेण॒सूर्य्यस्य॒रश्मिम्भिः॥ तस्यतेप॒वित्रपतेप॒वित्रपूतस्य॒यत्कामःपुनेतच्छकेयम्॥**

कलश में सप्तमृत्तिका डाले—**ॐ स्यो॒नापृथिविनोभवानृक्ष॒रानि॒वेशनी॥ यच्छान॒ः शर्म्मस॒प्प्रथाः॥**

कलश में पूंगीफल डाले—**ॐ याः फ॒लिनी॒र्य्याऽअफ॒लाऽअपु॒ष्प्पायाश्श्चपु॒ष्प्पिणीः॥ बृह॒स्प्पतिप्प्रसूता॒स्तानोमुञ्च॒त्वꣳहसः॥**

कलश में पञ्चरत्न डाले—**ॐ परि॒वाजपतिःक॒विर॒ग्निर्ह॒व्यान्यक्रमीत्॥ दध॒द्रत्नानि दा॒शुषे॥**

कलश में हिरण्य (सुवर्णखण्ड) डाले—**ॐ हि॒र॒ण्य॒ग॒र्भःसमवर्त्तताग्ग्रेभू॒तस्यजा॒तः पति॒रेकऽआसीत्॥ सदाधारपृथि॒वीद्यामु॒तेमां अस्म्मैदे॒वायह॒विषाव्विधेम्॥**

युग्मवस्त्राच्छादन—**ॐ सुजातोज्ज्यो॒तिषास॒हशर्म्म॒व्वरू॑थ॒मासद॒त्त्स्व॒ः॥ व्वासोअग्ग्ने व्वि॒श्श्वरूप॒ꣳसंव्ययस्वव्विभावसो॥**

पूर्णपात्रस्थापन—**ॐ पू॒र्ण्णादर्व्वि॒परापत॒सुपूर्ण्णा॒पुन॒रापत॥ व्व॒स्नेव॒व्विक्क्रीणावहा॒ऽ इष॒मूर्ज्जꣳशतक्रतो॥**

नारिकेलफलस्थापन—**ॐ याःफ॒लिनी॒र्य्याऽअफ॒लाऽअपु॒ष्प्पायाश्श्चपु॒ष्प्पिणीः॥ बृह॒स्प्पतिप्प्रसूता॒स्तानोमु॒ञ्च॒त्वꣳहसः॥**

वरुण का ध्यान, आवाहन, पञ्चोपचारपूजन—**ॐ तत्त्वायामि॒ब्ब्रह्मणा॒व्वन्दमान॒स्तदा-शास्ते॒यजमानोह॒विर्ब्भिः॥ अहेडमानो व्वरुणे॒हबो॒ध्युरुशꣳस॒मान॒ऽआयु॒ःप्प्रमोषीः॥**

प्रतिष्ठा—दोनों हाथ से स्पर्श करके प्रतिष्ठा करे।

ॐ मनोजूतिर्ज्जुषता॒माज्ज्यस्य॒बृह॒स्प्पतिर्य्य॒ज्ञमि॒मन्तनो॒त्त्वरिष्टंय्य॒ज्ञꣳसमि॒मन्दधातु॥ व्विश्श्वेदे॒वासऽइ॒हमादयन्ता॒मो३म्प्रतिष्ठ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

इसी ईश्वरतत्त्व से प्राण प्रतिष्ठित होते है, इसी से शरीर में प्राणों का प्रवाह (संचरण) होता है, इसी से अर्चना के समय देवत्व आता है, इससे इतर कुछ नहीं है।

अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि स्थापयामि। इस जल में वरुण अपने आयुधशक्तिपरिवार सहित आकर स्थित हों।

ॐ अपांपते वरुणाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

गङ्गाद्यावाहनम्—

कला कला हि देवानां दानवानां कला कलाः।
संगृह्य निर्मितो यस्मात्कलशस्तेन कथ्यते॥१॥

देवताओं तथा दानवों के प्रत्येक कलाओं का संग्रह करके जो निर्मित होता है उसे कलश कहते हैं॥१॥

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥२॥

कलश के मुख में विष्णु, कण्ठ में रुद्र तथा कुक्षि (पेट) में ब्रह्मा एवं मध्य में मातृकाएँ स्थित हैं॥२॥

कुक्षौ तु सागराः सप्त सप्तद्वीपा च मेदिनी।
अर्जुनी गोमती चैव चन्द्रभागा सरस्वती॥३॥

पेट में सप्तसागर तथा मेदिनी में सप्तद्वीप स्थित है। अर्जुनी, गोमती, चन्द्रभागा, सरस्वत्यादि महानदियाँ स्थित हैं॥३॥

कावेरी कृष्ण वेणा च गङ्गा चैव महानदी।
तापी गोदावरी चैव माहेन्द्री नर्मदा तथा॥४॥

कावेरी, कृष्णा, वेणा, गङ्गादि महानदियाँ स्थित है, तापी, गोदावरी, माहेन्द्री नर्मदादि नदियाँ स्थित हैं॥४॥

नदाश्च विविधा जाता नद्यः सर्वास्तथापराः।
पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै॥५॥

विभिन्न प्रकार के नद तथा समस्त नदियाँ है, पृथ्वी जिसमें समस्त तीर्थ स्थित है वह सभी कलश में विधिपूर्वक अवस्थित हों॥५॥

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः॥६॥

सभी समुद्रों के सहित समस्त तीर्थ नद, नदियाँ इस कलश में हमारी शान्ति के लिए आकर अवस्थित हों कर समस्त दुरित के क्षयकारक हो समस्त पापों को नष्ट करनेवाले हों॥६॥

ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।
अङ्गैश्च सहिताः सर्वे कलशाम्बुं समाश्रिताः॥७॥

ऋग्वेद, यजुर्वेद, सामवेद तथा अथर्ववेद अङ्ग रूप से कलश के जल में समाश्रित होकर हमारा कल्याण करें॥७॥

अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः॥८॥

यहाँ गायत्री, सावित्री, शान्ति, पुष्टिकरी आकर हमारे सभी दुरित को समाप्त करके हमें शान्ति प्रदान करें हमारे, यज्ञ को पूर्णता प्रदान करें॥८॥

स्वस्तिकलशपूजनम्

ध्यानम्—दोनों हाथों से पुष्प लेकर वरुणदि देवताओं का ध्यान करे।

ॐ स॒हस्र॑शीर्षा॒पुरु॑षः सहस्रा॒क्षः स॒हस्र॑पात्॥ सभूमि॑ꣳ स॒र्वत॑स्पृ॒त्वात्य॑तिष्ठ द्दशाङ्गु॒लम्॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः ध्यानार्थे पुष्पाणि समर्पयामि।

आसनम्—दोनों हाथों से अक्षत लेकर, ध्यानकर आसन समर्पित करे।

ॐ पुरुषऽएवेदꣳसर्व्वँय्यद्भूतंयच्चभाव्यम्॥ उतामृतत्त्वस्येशानोयदन्नेनातिरोहति॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः आसनार्थे अक्षतान् समर्पयामि।

पाद्यम्—दोनों हाथों से पाद्यपात्र लेकर समर्पित करे।

ॐ एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः॥ पादोऽस्यव्विश्वाभूतानित्रिपादस्यामृतन्दिवि॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः पादयोः पाद्यं समर्पयामि।

अर्घ्यम्—दोनों हाथों से अर्घ्यपात्र लेकर समर्पित करे।

ॐ त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादोऽस्येहाभवत्पुनः॥ ततोव्विष्वङ्व्यक्क्रामत्साशनानशनेऽअभि॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः अर्घ्यं समर्पयामि।

आचमनम्—दोनों हाथों से आचमनीयपात्र लेकर समर्पित करे।

ॐ ततोव्विराडजायतव्विराजोऽअधिपूरुषः॥ सजातोऽअत्त्यरिच्च्यतपश्चाद्भूमिमथोपुरः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः आचमनार्थे गङ्गोदकं समर्पयामि।

स्नानीयम्—दोनों हाथों से स्नानीयपात्र लेकर समर्पित करे।

ॐ तस्माद्यज्ञात्त्सर्व्वहुतःसम्भृतम्पृषदाज्ज्यम्॥ पशूँस्ताँश्चक्क्रेव्वायव्यानारण्याग्राम्म्याश्चये॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः स्नानीयंजलं समर्पयामि।

पुनराचमनीयम्—दोनों हाथों से आचमनीय जल लेकर समर्पित करे।

ॐ तस्माद्यज्ञात्त्सर्व्वहुतऽऋचःसामानिजज्ञिरे॥ छन्दाꣳसिजज्ञिरेतस्माद्यजुस्तस्म्मादजायत॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः पुनराचमनार्थे गङ्गोदकं समर्पयामि।

पयःस्नानम्—दोनों हाथ से पयः पात्र लेकर समर्पित करे।

ॐ पयःपृथिव्व्यांपयऽओषधीषुपयोदिव्व्यन्तरिक्षेपयोधाः॥ पयस्वतीःप्प्रदिशःसन्तुमह्य्यम्॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः पयःस्नानं समर्पयामि।

दधिस्नानम्—दोनों हाथों से दधिपात्र लेकर समर्पित करे।

ॐ द॒धि॒क्राव्णो॑ऽअकारिषंजि॒ष्णोरश्व॑स्यवा॒जिन॑ः॥ सु॒र॒भिनो॒मुखा॑कर॒त्प्रण॒ऽआयू॑ꣳषितारिषत्॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः दधिस्नानं समर्पयामि।

घृतस्नानम्—दोनों हाथों से घृतपात्र लेकर समर्पित करे।

ॐ घृ॒तम्मि॑मिक्षेघृ॒तम॑स्य॒योनि॑र्घृ॒तेश्रि॒तोघृ॒तम्व॑स्य॒धाम॑॥ अ॒नु॒ष्ष्व॒धमाव॑हमा॒दय॑स्व स्वाहा॑कृतंवृषभवक्षिह॒व्यम्॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः घृतस्नानं समर्पयामि।

मधुस्नानम्—दोनों हाथों से मधुपात्र लेकर समर्पित करे।

ॐ मधु॒व्वाता॑ऽऋताय॒तेमधु॑क्षरन्ति॒सिन्ध॑वः॥ माद्ध्वी॑र्न्नःस॒न्त्वोष॑धीः॥ मधु॒नक्त॑मु॒तोषसो॒मधु॑म॒त्पार्त्थि॑व॒ꣳरज॑ः॥ मधु॒द्यौर॑स्तुनःपि॒ता॥ मधु॑मान्नो॒व्वन॒स्पति॒र्म्मधु॑माँऽअस्तु॑सूर्य्य॑ः॥ माद्ध्वी॒र्ग्गावो॑भवन्तुनः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः मधुस्नानं समर्पयामि।

शर्करास्नानम्—दोनों हाथों से शर्करापात्र लेकर समर्पित करे।

ॐ अ॒पाꣳरस॒मुद्व॑यस॒ꣳसूर्य्ये॒सन्त॒ꣳस॒माहि॑तम्॥ अ॒पाꣳरस॑स्य॒योरस॒स्तंव्वो॑गृह्णाम्युत्त॒मम॑मु॒पया॒मगृ॑हीतो॒ऽसीन्द्रा॑यत्त्वा॒जुष्ट॑ङ्गृह्णाम्ये॒षते॒योनि॒रिन्द्रा॑यत्वा॒जुष्ट॑तमम्॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः शर्करास्नानं समर्पयामि।

पञ्चामृतस्नानम्—दोनों हाथों से पञ्चामृतपात्र लेकर समर्पित करे।

ॐ पञ्च॑न॒द्यः॒सर॑स्वती॒मपि॑यन्ति॒सस्रो॑तसः॥ सर॑स्वती॒तुप॑ञ्च॒धासोदे॒शेभ॑वत्स॒रित्॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः मिलितपञ्चामृतस्नानं समर्पयामि।

शुद्धोदकस्नानम्—दोनों हाथों से जलपात्र लेकर समर्पित करे।

ॐ शु॒द्धवा॑लःस॒र्व्वशु॑द्धवालोमणि॒वाल॒स्तऽआ॑श्वि॒नाःश्येत॑ःश्येता॒क्षो॒रु॒णस्तेरु॒द्राय॑ पशु॒पत॑येकर्ण्णा॑या॒माऽअ॑विलि॒प्तारौ॒द्रानभो॑रुपाःपार्ज्ज॒न्याः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः शुद्धोदकस्नानं समर्पयामि।

वस्त्रनिवेदनम्—दोनों हाथों से वस्त्र लेकर समर्पित करे।

ॐ तस्मा॒दश्श्वा॑ऽअजायन्त॒येकेचो॑भ॒याद॑तः॥ गावो॑हजज्ञि॒रे॒तस्मा॒त्तस्मा॑ज्जा॒ताऽअ॑जा॒वय॑ः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः वस्त्रं समर्पयामि।

वस्त्राङ्गाचमनीयजलम्—दोनों हाथों से आचमनीय लेकर समर्पित करे।

ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन॥ महेरणायचक्षसे॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः वस्त्रान्ते आचमनीयं जलं समर्पयामि।

उपवस्त्रनिवेदनम्—दोनों हाथों से उपवस्त्र लेकर समर्पित करे।

ॐ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः॥ तेनदेवाऽअयजन्तसाध्याऽऋषयश्श्चये॥ ॐ सुजातोज्ज्योतिषासहशर्म्मव्वरूथमासदत्स्वः॥ व्वासोअग्ग्नेव्विश्श्वरूपꣳसंव्व्ययस्वव्विभावसो॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः उपवस्त्रं समर्पयामि।

उपवस्त्राङ्गाचमनीयजलम्—दोनों हाथों से आचमनीय जल लेकर समर्पित करे।

ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः॥ उशतीरिव मातरः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः उपवस्त्रान्ते आचमनीयं समर्पयामि।

यज्ञोपवीतनिवेदनम्—दोनों हाथों से यज्ञोपवीत लेकर समर्पित करे।

ॐ यत्पुरुषंव्व्यदधुःकतिधाव्व्यकल्पयन्॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते॥ ॐ यज्ञोदेवानाम्प्प्रत्त्येतिसुम्म्नमादित्त्यासोभवतामृडयन्तः॥ आवोर्व्वाचीसुमतिर्व्ववृत्त्यादꣳहोश्श्चिद्याव्वरिवोवित्तरासदादित्त्येभ्यस्त्वा॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः यज्ञोपवीतं समर्पयामि।

यज्ञोपवीताङ्गाचमनीयम्—दोनों हाथों से आचमनीय लेकर समर्पित करे।

ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्न्वथ॥ आपोजनयथा च नः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः यज्ञोपवीतान्ते आचमनीयं समर्पयामि।

सुगन्धिद्रव्यसमर्पणम्—दोनों हाथों से सुगन्धिद्रव्य लेकर समर्पित करे।

ॐ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः॥ त्वामोषधेसोमोराजाव्विद्वान्न्यक्ष्मादमुच्च्यत॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः गन्धानुलेपनं समर्पयामि।

अक्षतसमर्पणम्—दोनों हाथों से अक्षत लेकर समर्पित करे।

ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत॥ अस्तोषतस्वभानवोव्विप्प्रानविष्ठयामतीयोजान्न्विन्द्रतेहरी॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः अलङ्करणार्थे अक्षतान् समर्पयामि।

पुष्पमालासमर्पणम्—दोनों हाथों से पुष्पमाला लेकर समर्पित करे।

ॐ ओष॑धीः॒प्प्रति॑मोदद्ध्वं॒पुष्प॑वतीः॒प्र॒सूव॑रीः॥ अश्श्वा॑ऽइवस॒जित्त्व॑रीर्व्वी॒रुध॑ः पार॒यि॒ष्ण्णव॑ः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः पुष्पमालां परिधापयामि।

दूर्वासमर्पणम्—दोनों हाथों से दूर्वा लेकर समर्पित करे।

ॐ काण्डा॑त्काण्डात्प्र॒रोह॑न्ती॒परु॑षःपरुष॒ष्प्परि॑॥ ए॒वानो॑दूर्व्वे॒प्प्रत॑नुस॒हस्रे॑ण श॒तेन॑ च॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः दूर्वाङ्कुरान् समर्पयामि।

नानापरिमलद्रव्यसमर्पणम्—दोनों हाथों सें अबीरबुक्का लेकर समर्पित करे।

ॐ अहि॑रिवभो॒गैः पर्य्ये॑ति॒बा॒हुंज्याया॑हे॒तिंप्प॑रि॒बाध॑मानः॥ ह॒स्त॒घ्घ्नोव्विश्श्वा॑ व॒युना॑निव्वि॒द्द्वान्पुमा॒न्पुमा॑ᳪंसं॒परि॑पातुव्वि॒श्श्वत॑ः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः नानापरिमलद्रव्याणि समर्पयामि।

सिन्दूरसमर्पणम्—दोनों हाथों से सिन्दूर लेकर समर्पित करे।

ॐ सिन्धो॑रिवप्प्राद्ध्व॒नेशू॒घ॒नासो॒व्वात॑प्प्रमियः॒पत॑यन्ति॒य॒ह्वाः॥ घृ॒तस्य॒धारा॑ऽ अरु॒षोनव्वा॒जीकाष्ठा॑भि॒न्दन्नू॒र्म्मिभि॒ः पिन्न्व॑मानः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः सिन्दूराभरणं समर्पयामि।

ततः नैवेद्यं पुरतः संस्थाप्य धूपदीपौ प्रज्वाल्य। सिन्दूरादि समर्पण के बाद नैवेद्य देवता के सामने रख करके धूपदीप प्रज्वलित करके धूप दिखाये।

धूपसमर्पणम्—दोनों हाथों से धूपपात्र लेकर समर्पित करे।

ॐ ब्ब्रा॒ह्म॒णो॒ऽस्य॒मुख॑मासीद्बा॒हूरा॑ज॒न्न्यः॒कृतः॥ ऊ॒रूतद॑स्य॒यद्वैश्यः॑ प॒द्भ्याᳪं शू॒द्द्रोऽअ॑जायत॥ ॐ धूर॑सि॒धूर्व्व॒धूर्व्व॑न्तं॒ध्धूर्व्व॒तं॒योऽस्मान्धूर्व्व॑ति॒तंधूर्व्व॒यंव्व॒यंधूर्व्वा॑मः॥ दे॒वाना॑मसि॒वह्नि॑ तम॒ᳪंसस्नि॑तमं॒पप्प्रि॑तमं॒जुष्ट॑तमंदे॒व॒हूत॑मम्॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः धूपं समर्पयामि।

दीपसमर्पणम्—दोनों हाथों से दीपपात्र लेकर समर्पित करे।

ॐ च॒न्द्रमा॒मन॑सोजा॒तश्श्चक्षोः॒सूर्य्यो॑ऽअजायत॥ श्श्रोत्रा॑द्वा॒युश्श्च॑प्प्रा॒णश्श्च॒मुखा॑ द॒ग्निर॑जायत॥ ॐ अ॒ग्निर्ज्ज्योति॒र्ज्ज्योति॑र॒ग्निः स्वाहा॒सूर्य्यो॒ज्ज्योति॒र्ज्ज्योतिः॒सूर्य्यः॒ स्वाहा॑॥ अ॒ग्निर्व्वर्च्चो॒ज्ज्योति॒र्व्वर्च्चः॒स्वाहा॒सूर्य्यो॒व्वर्च्चो॒ज्ज्योति॒र्व्वर्च्चः॒स्वाहा॑॥ ज्ज्योतिः॒ सूर्य्यः॒सूर्य्यो॒ज्ज्योतिः॒स्वाहा॑॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः दीपज्योतिं समर्पयामि।

नैवेद्यसमर्पणम्—दोनों हाथों से नैवेद्यपात्र लेकर समर्पित करे।

ॐ नाब्भ्याऽआसीदन्तरिक्षꣳशीर्ष्ष्णोद्यौःसमवर्त्तत॥ पद्भ्याम्भूमिर्द्दिशःश्श्रोत्रात्तथालोकाँ२॥ऽअकल्प्पयन्॥ ॐ अन्नपतेऽन्नस्यनोदेह्यनमीवस्यशुष्मिणः॥ पप्रदातारँतारिषऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः नैवेद्यं समर्पयामि। ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ व्यानाय स्वाहा। मध्ये पानीयं जलं उत्तरापोशनं समर्पयामि।

करोद्वर्तनसमर्पणम्—दोनों हाथों से करोद्वर्तन लेकर समर्पित करे।

ॐ अꣳशुनातेअꣳशुःपृच्च्यतांपरुषापरुः॥ गन्धस्तेसोममवतुमदायरसोऽअच्च्युतः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः करोद्वर्तनार्थे चन्दनानुलेपनं समर्पयामि।

ताम्बूलादिसमर्पणम्—दोनों हाथ से ताम्बूल लेकर समर्पित करे।

ॐ यत्पुरुषेणहविषादेवायज्ञमततन्वत॥ वसन्तोऽस्यासीदाज्ज्यंग्ग्रीष्मऽइध्मः-शरद्धविः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः मुखशुद्ध्यर्थे पूङ्गीफलमेलालवङ्गादिसहित ताम्बूलपत्राणि समर्पयामि।

फलादिसमर्पणम्—दोनों हाथ से फल लेकर समर्पित करे।

ॐ याःफलिनीर्य्याऽअफलाऽअपुष्पायाश्श्चपुष्प्पिणीः॥ बृहस्प्पतिप्प्रसूतास्तानोमुञ्चत्वꣳहसः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः ऋतुकालोद्भवफलानि समर्पयामि।

दक्षिणासमर्पणम्—दोनों हाथ से दक्षिणा लेकर समर्पित करे।

ॐ हिरण्ण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत्॥ सदाधारपृथिवीद्यामुतेमांकस्मैदेवायहविषाविधेम्॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।

नीराजनसमर्पणम्—दोनों हाथ से नीराजन लेकर घुमाये।

ॐ आरात्रिपार्थिवꣳरजःपितुरप्प्रायिधामभिः॥ दिवःसदाꣳसिबृहतीवितिष्ठसऽआत्त्वेषंव्वर्त्ततेतमः॥ ॐ इदꣳहविःप्रजननंमेऽअस्तुदशवीरꣳसर्व्वगणꣳस्वस्तये॥

आ॒त्म॒सनि॑प्प्रजा॒सनि॑पशु॒सनि॑लोक॒सन्न्य॑भय॒सनि॑÷॥ अ॒ग्निःप्प्र॒जांब॑हु॒लांमे॑करो॒त्वन्नं॒ पयो॒रेतो॑ऽअ॒स्म्मासु॑धत्त॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः कर्पूरनीराजनं समर्पयामि।

आरती करने के बाद हाथ धोकर दोनों हाथ में पुष्प लेकर पुष्पाञ्जलि प्रदान करे।

पुष्पाञ्जलिसमर्पणम्—दोनों हाथ से पुष्प लेकर समर्पित करे।

ॐ य॒ज्ञेन॑य॒ज्ञम॑यजन्तदे॒वास्तानि॒धर्म्मा॑णिप्प्रथ॒मान्न्या॑सन्॥ तेह॒नाक॑म्ममहि॒मान॑÷ सचन्त॒यत्र॒पूर्व्वे॑सा॒द्ध्याःसन्ति॑दे॒वाः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः मन्त्रपुष्पाञ्जलिं समर्पयामि।

परिक्रमासमर्पणम्—दोनों हाथ सें पुष्प लेकर समर्पित करे।

ॐ स॒प्तास्या॑सन्न्परि॒धय॒स्त्रिःस॒प्तस॒मिध॑÷कृ॒ताः॥ दे॒वायद्य॒ज्ञन्त॑न्न्वा॒नाऽअब॑ध्न॒न्पुरु॑षम्प॒शुम्॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः परिक्रमां समर्पयामि।

परिक्रमा के पश्चात् जल, गन्ध, अक्षत, फल, पुष्प, दूर्वा, कुशा, दधि, दुग्ध, सर्षपादि द्रव्यों को अर्घ्यपात्र में लेकर विशेषार्घ्य प्रदान करे।

विशेषार्घ्यसमर्पणम्—दोनों हाथों सें विशेषार्घ्य लेकर समर्पित करे।

रक्ष रक्ष जलाध्यक्ष रक्ष जीवनदायक!।
रक्षार्थं पश्चिमाधीश! प्राणीनां जीवनं परम्॥१॥

हे जलाध्यक्ष! हमारी सभी प्रकार से रक्षा करें-रक्षा करें, हे जीवनदायक! हमारे जीवन की रक्षा करें। हे पश्चिम दिशा के स्वामी! प्राणियों को जीवन प्रदान करनेवाले! हमारी रक्षा करें॥१॥

विविधद्रव्यसंयुक्तं चन्दनं रजनीयुतं।
विशेषार्घ्यं प्रदाष्यामि सर्वदा रक्षणं कुरु॥२॥

चन्दन, रजनी पुष्प तथा विविध द्रव्यों से संयुक्त विशेषार्घ्य प्रदान करता हूँ, हमारी सर्वदा रक्षा कीजिये॥२॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः विशेषार्घ्यं समर्पयामि।

कलशप्रार्थना—

ॐ देवदानवसम्वादे मथ्यमाने महोदधौ।
उत्पन्नोऽसि तदाकुम्भ विधृतो विष्णुना स्वयम्॥१॥

हे कुम्भ! देवताओं और दानवों के बीच समुद्र-मन्थन हुआ तब तुम उत्पन्न हुए, तुम्हें स्वयं विष्णु ने धारण किया था॥१॥

त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥२॥

तुम्हारे जल में सभी तीर्थों की प्रतिष्ठा है, तुममें सभी देवताओं का वास है, तुमसे ही सभी प्राणी प्रतिष्ठित हैं, तुममें ही सभी के प्राण प्रतिष्ठित है।।२।।

शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं प्रजापतिः।
आदित्या वसवो रुद्रा विश्वेदेवाः स पैतृकाः॥३॥

तुम स्वयं शिव हो, तुम ही विष्णु और प्रजापति हो, तुम ही आदित्य, वसु, रुद्र, विश्वेदेव तथा पितर हो।।३।।

त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव!॥४॥

तुम ही सभी में प्रतिष्ठित हो, जिससे समस्त कामनायें फलवान होती है, हे जलोद्भव कुम्भ! तुम्हारे कृपा से ही यह यज्ञ कर रहा हूँ।।४।।

सर्वकामसमृद्ध्यर्थं अक्षयवरदायकम्।
सान्निध्यं कुरु मे देव! प्रसन्नो भव सर्वदा॥५॥

सर्व कामनाओं की समृद्धि के लिए तथा अक्षयवर प्रदान करने वाले आपका यज्ञ कर रहा हूँ, आप सदा सर्वदा प्रसन्न होकर हमें सांनिध्य प्रदान करें।।५।।

नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥६॥

स्फटिक के समान प्रभावाले, सुन्दर श्वेत हारों से सुशोभित, सुन्दरमङ्गल प्राप्ति के लिए, हाथ में सुन्दर पाश लिए हुए, झषासन पर आसीन रहनेवाले जलाधिनाथ आपको बार-बार नमस्कार है।।६।।

पाशपाणे! नमस्तुभ्यं पद्मिनीजीवनायक!।
यावत्कर्मसमाप्तिस्यात्तावत्त्वं सन्निधो भव॥७॥

पाश को हाथ में धारण करनेवाले आपको नमस्कार है, कमलादि को जीवन प्रदान करने-वालों के नायक, जब तक यज्ञ कर्म की परिसमाप्ति नही हो जाती तब तक सांनिध्य प्रदान करें।।७।।

प्रार्थनासमर्पणम्—हाथ में जल लेकर प्रार्थना समर्पण करे।

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः प्रार्थनां समर्पयामि।

पूजनसमर्पणम्—दोनों हाथों से जल लेकर पूजन समर्पित करे।

ॐ अनया पूजया वरुणाद्यावहित देवताः प्रीयन्तां न मम॥

कलशपूजनं परिपूर्णम्

●

पुण्याहवाचनम्

अवनीकृतजानुमण्डलः कमलमुकुलसदृशं अञ्जलिं शिरस्याधायाऽनन्तरं दक्षिणेन पाणिना कलशं धारयित्वा आशिषः प्रार्थयेत्। जानुमण्डल को नीचे जमीन में लगाकर दक्षिण हाथ को कमल के समान अञ्जली बनाकर उसमें कलश लेकर शिर पर धारण करके आशीष-प्रार्थना करे।

दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च।
तेनाऽऽयुःप्रमाणेन पुण्यं पुण्याऽहं दीर्घमायुरस्तु॥

अतिशय विस्तारित समुद्र तथा नद-नदियाँ-पर्वत तथा भगवान् विष्णु के आयु के प्रमाण का हो जाऊँ (चिरायु वाला हो जाऊ) तथा शतवर्ष पर्यन्त तथा उनके आयु के प्रमाण से आयुवाला हो जाऊँ।

ब्राह्मण बोले—**अस्तु दीर्घमायुः॥**

ॐ त्रीणि॑प॒दाव्विच॑क्क्रमे॒व्विष्ण्णु॑र्ग्गो॒पाऽअदा॑ब्भ्यः॥ अतो॒धर्म्मा॑णिधा॒रय॑न्॥

यजमान बोले—**तेनायुः प्रमाणेन पुण्यं पुण्याऽहं दीर्घमायुरस्तु।**

ब्राह्मण बोले—**अस्तु पुण्यं पुण्याऽहं दीर्घमायुः।**

ॐ त्रीणि॑प॒दाव्विच॑क्क्रमे॒व्विष्ण्णु॑र्ग्गो॒पाऽअदा॑ब्भ्यः॥ अतो॒धर्म्मा॑णिधा॒रय॑न्॥

यजमान बोले—**तेनायुः प्रमाणेन पुण्यं पुण्याऽहं दीर्घमायुरस्तु।**

ब्राह्मण बोले—**अस्तु पुण्यं पुण्याऽहं दीर्घमायुः।**

ॐ त्रीणि॑प॒दाव्विच॑क्क्रमे॒व्विष्ण्णु॑र्ग्गो॒पाऽअदा॑ब्भ्यः॥ अतो॒धर्म्मा॑णिधा॒रय॑न्॥

कलश को भूमि पर रख करके ब्राह्मणों का हस्त पूजन करे।

यजमान बोले—

अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्।
ब्राह्मणानां करे न्यस्ताः शिवा आपो भवन्तु मे॥

जल में समस्त देवताओं का वास है, सभी में जल ही प्रतिष्ठित है, ब्राह्मणों के हाथ में प्रदान करने पर यह जल हमारे लिये कल्याणकारी हो।

ॐ शिवा आपः सन्तु। यजमान ब्राह्मण के हाथ में जल दे।

ब्राह्मण बोले—**सन्तु शिवा आपः।**

यजमान बोले—

लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे।
सा मे वसतु वै नित्यं सौमनस्यं तथाऽस्तु नः॥

पुष्प (कमल) में लक्ष्मी का वास है, पुष्कर में भी लक्ष्मी वसती है, वे लक्ष्मी नित्य हमारे यहाँ वास करें और हमारे मन में वास करके सुन्दरता प्रदान करें।

ॐ सौमनस्यमस्तु। यजमान ब्राह्मण के हाथ में पुष्प प्रदान करे।

ब्राह्मण बोले—**अस्तु सौमनस्यं।**

यजमान बोले—

अक्षतं चास्तु मे पुण्यं दीर्घमायुर्यशोबलम्।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम॥

अक्षत हमारे लिए दीर्घायु-यश-बल तथा पुण्यकारी हो और हमारे लिए सदा लोक में श्रेयस्कर हो।

ॐ अक्षतं चारिष्टं चाऽस्तु। यजमान ब्राह्मण के हाथ में अक्षत प्रदान करे।

ब्राह्मण बोले—**अस्त्वक्षतमरिष्टं च।**

यजमान बोले—

चन्दने महदारोग्यं गन्धाः प्रीति ते यदा।
ब्राह्मणानां करे न्यस्तु माङ्गल्यं चास्तु मे सदा॥

चन्दन से आरोग्यवृद्धि होती है, गन्ध से जैसे सभी की प्रीति होती है। ब्राह्मणों के हाथ में प्रदान करने से सदा हमारे लिए मङ्गलकारी हो।

ॐ गन्धाः पान्तु। यजमान ब्राह्मण के हाथ में चन्दन प्रदान करे।

ब्राह्मण बोले—**सुमङ्गल्यं चास्तु।**

यजमान बोले—

अक्षतं मे महत्पुण्यं अक्षयतृप्तिप्रदायकम्।
अक्षतं महदायुष्यं तस्मादायुष्य मे सदा॥

अक्षय तृप्ति प्रदान करनेवाला अक्षत हमारे लिए बहुत पुण्यवान् हो, अक्षत से बहुत आयु की वृद्धि होती है अतः हमे सदैव आयु प्रदान करे।

ॐ पुनरक्षताः पान्तु। यजमान ब्राह्मण के हाथ में पुनः अक्षत प्रदान करे।

ब्राह्मण बोले—**आयुष्यमस्तु।**

यजमान बोले—

पुष्पे भवतु सौगन्धं पुष्पः पुष्टिप्रदायकम्।
पुष्पे वसतु श्रीवृत्तिः श्रीश्रियमस्तु मे सदा॥

पुष्पों में सुगन्धि होती है, पुष्प पुष्टि प्रदान करते है, पुष्प में श्रीवृत्ति का वास होता है अतः हमारे लिये सदा ही श्रीलक्ष्मी प्राप्त हो।

ॐ पुनः पुष्पाणि पान्तु। यजमान ब्राह्मण के हाथ में पुनः पुष्प प्रदान करे।

ब्राह्मण बोले—**सौश्रियमस्तु।**

यजमान बोले—

ऐश्वर्यं सुफलं सन्तु देवाः प्रीति भवा यदा।
ब्राह्मणानां प्रसादश्च ऐश्वर्यं मे सदाकरा॥

देवताओं में प्रीति होती है तो ऐश्वर्य सुफल होता है, ब्राह्मणों के कृपाप्रसाद से देवताओं के प्रति हमारी प्रीति तथा ऐश्वर्य प्राप्त हो।

ॐ सफलताम्बूलानि पान्तु। यजमान ब्राह्मण के हाथ में सुपाड़ी सहित पान प्रदान करे।

ब्राह्मण बोले—**ऐश्वर्यमस्तु।**

यजमान बोले—

यज्ञपुण्यस्य साफल्यं अनन्तफलदा भवा।
ब्राह्मणानां प्रसादेन दक्षिणा सफला सदा॥

ब्राह्मणों के कृपा प्रसाद से यज्ञ का पुण्य सफल होकर अनन्त फलवान हो जाता है, वैसे ही हमारे द्वारा दी गयी दक्षिणा सदैव ही यज्ञफल को प्रदान करनेवाली हो।

ॐ दक्षिणाः पान्तु। यजमान ब्राह्मण के हाथ में दक्षिणा प्रदान करे।

ब्राह्मण बोले—**बहुदेयं चाऽस्तु।**

यजमान बोले—

हरिः जले निवसन्ति जलं वरुणरूपिणम्।
वरुणाद्यर्चितो देवः(शिवः) तस्मात्स्वर्चित ते सदा॥

जल ही वरुणरूप है, जल में ही हरि का वास है, वरुणादि (जल) से शिव का अर्चन होता है, अतः ब्राह्मण भी सदा ही जल से अर्चित होकर प्रसन्न हों।

ॐ पुनरत्राऽपः पान्तु। यजमान ब्राह्मण के हाथ में पुनः जल प्रदान करे।

ब्राह्मण बोले—**स्वर्चितमस्तु।**

यजमान बोले—दीर्घमायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो बहुपुत्रं पौत्रं बहुधनं चाऽऽयुष्यं चाऽस्तु।

ब्राह्मण बोले—**तथास्तु।**

यजमान बोले—यं कृत्वा सर्ववेद यज्ञ क्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते तं अहं ओङ्कारं आदिं कृत्वा यजुराशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिः अनुज्ञातः पुण्यं पुण्याऽहं वाचयिष्ये।

ब्राह्मण बोले—**वाच्यन्ताम्।**

सभी ब्राह्मण मिलकर पुण्यकारक मन्त्रों का पाठ करे।

पुण्यकारकमन्त्राः

करोतु स्वस्ति ते ब्रह्मा स्वस्ति चाऽपि द्विजातयः।
सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्तिसर्वदा॥१॥

आपका ब्रह्मा कल्याण करें, द्विजजाति मात्र आपका कल्याण करे, सरीसृपों में जो सर्व श्रेष्ठ सरीसृप सभी आपका सदा सर्वदा कल्याण करें॥१॥

ययातिर्नहुषश्चैव धुन्धुमारो भगीरथः।
तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वन्तु नित्यशः॥२॥

ययाति, नहुष, धुन्धुमार, भगीरथ इत्यादि राजर्षि भी आप पर कल्याण करनेवाले हों॥२॥

स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च।
स्वस्त्यस्त्वापादकेभ्यश्च सर्वेभ्यः स्वस्ति ते सदा॥३॥

आपका द्विपाद कल्याण करे, चतुष्पाद कल्याण करें, अन्यान्य भी पादवान नित्य सर्वदा कल्याणकारी हों॥३॥

स्वाहा स्वधा शची चैव स्वस्ति कुर्वन्तु ते सदा।
करोतु स्वस्ति वेदादिर्नित्यं तव महामखे॥४॥

स्वाहा, स्वधा, शची भी आपका सदा कल्याण करें, वेदादि भी नित्य कल्याण करनेवाले हों॥४॥

लक्ष्मीररुन्धती चैव कुरुतां स्वस्ति तेऽनघ।
असितो देवलश्चैव विश्वामित्रस्तथाङ्गिराः॥५॥

हे अनघ लक्ष्मी, अरुन्धती सदैव कल्याण करनेवाले हों, असित, देवल, विश्वामित्र तथा अङ्गिरादि महर्षि भी कल्याण करनेवाले हों॥५॥

वसिष्ठः कश्यपश्चैव स्वस्ति कुर्वन्तु ते सदा।
धाता विधाता लोकेशो दिशश्च सदिगीश्वराः॥६॥

वसिष्ठ, कश्यपादि महर्षि सदैव कल्याण करनेवाले हों, धाता (विष्णु), विधाता (ब्रह्मा), लोकेश (ईश्वर), दिशाएँ सदैव ही कल्याणकारी हों॥६॥

स्वस्ति तेऽद्य प्रयच्छन्तु कार्त्तिकेयश्च षण्मुखः।
विवस्वान्भगवान् स्वस्ति करोतु तव सर्वदा॥७॥

षड्मुख कार्तिकेय सदैव ही कल्याणकारी हों, भगवान् विवस्वान् (सूर्य) सदैव ही कल्याणकारी हों॥७॥

दिग्गजाश्चैव चत्त्वरः क्षितिश्च गगनं ग्रहाः।
अधस्ताद् धरणीं चाऽसौ नागो धारयते हि यः॥८॥

चारों दिशाएँ तथा आकाश में विचरण करनेवाले समस्त ग्रह, भूमि तथा भूमि के नीचे रहनेवाले नागादि जो पृथ्वी को धारण करते हैं सदैव ही कल्याण करें॥८॥

शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु।
रक्षन्तु स्वायुधैर्दिव्यैर्देवदानवराक्षसाः॥९॥

शेषादि समस्त श्रेष्ठसर्प आपका सदैव ही सपरिवार कल्याण करे। अपने अपने दिव्य आयुधों से सभी देवता, सभी दानव, सभी राक्षसगण सदा रक्षा करें॥९॥

ॐ द्र॒वि॒णो॒दाःपि॑पीषतिजु॒होत॒प्रच॑तिष्ठत॥ नेष्ट्रा॒दृ॒तुभि॑रिष्यत॥ स॒वि॒तात्त्वा॑ स॒वाना॑ᳫं सुवताम॒ग्निर्गृहप॑तीना॒ᳫं॒सोमो॒वन॒स्पति॑नाम्॥ बृह॒स्पति॒र्व्वा॒चऽइन्द्रो॒ज्ज्यैष्ठ्या॑य रु॒द्रः प॒शुभ्यो॑मित्रःस॒त्त्योव्वरु॑णो॒धर्म्म॑पतीनाम्॥ नतद्रक्षा॑ᳫंसि॒नपि॑शा॒चास्त॑रन्ति दे॒वाना॒मोजः॑प्प्रथम॒जᳫं॒ह्येतत्॥ योबि॒भर्त्ति॑दाक्षाय॒णᳫं हिर॑ण्ण्य॒ᳫं सदे॒वेषु॑कृणुते दी॒र्घमायु॒ᳫं॑सम॑नु॒ष्येषुकृणुतेदी॒र्घमायुः॥ उ॒च्चाते॑जा॒तमन्ध॑सोदि॒विसद्भूम्म्याद॑दे॥ उ॒ग्रᳫंशर्म्म॒महि॒श्श्रवः॑॥ उपा॑स्मैगायतानरः॑पव॑माना॒येन्द॑वे॥ अ॒भिदे॒वाँ२॥ऽ इय॑क्षते॥

यजमान बोले—**व्रत-जप-नियम-तपः-स्वाध्याय-क्रतु-शम-दम-दया-दान-विशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम्।**

ब्राह्मण बोले—**समाहितमनसः स्मः।**

यजमान बोले—**प्रसीदन्तु भवन्तः।**

ब्राह्मण बोले—**प्रसन्ना स्मः।**

यजमान अधोलिखित मन्त्र बोलते हुए कलश के उपर अक्षत छोड़े तथा ब्राह्मण प्रत्युत्तर में अस्तु-आदि प्रतिवचन बोले।

ॐ शान्तिरस्तु। ॐ पुष्टिरस्तु। ॐ तुष्टिरस्तु। ॐ वृद्धिरस्तु। ॐ अविघ्नमस्तु। ॐ आयुष्यमस्तु। ॐ आरोग्यमस्तु। ॐ शिवमस्तु। ॐ शिवं कर्माऽस्तु। ॐ कर्मसमृद्धिरस्तु। ॐ धर्मसमृद्धिरस्तु। ॐ वेदसमृद्धिरस्तु। ॐ शास्त्रसमृद्धिरस्तु। ॐ धनधान्यसमृद्धिरस्तु। ॐ पुत्रपौत्रसमृद्धिरस्तु। ॐ इष्टसम्पदस्तु।

बहिः—द्वितीय पात्र में।

ॐ अरिष्ट निरसनमस्तु। ॐ यत्पापं-रोगं-अशुभं-अकल्याणं तद्दूरे प्रतिहतमस्तु।

अन्तः–कलश के ऊपर।

ॐ यच्छ्रेयस्तदस्तु। ॐ उत्तरे कर्मणि निर्विघ्नमस्तु। ॐ उत्तरोत्तरं अहरहमभि वृद्धिरस्तु। ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम्। ॐ तिथिकरण-मुहूर्तनक्षत्रग्रहलग्नसम्पदस्तु। ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम्। ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे सलग्ने साधिदैवते प्रीयेताम्। ॐ दुर्गा-

पाञ्चाल्यौ प्रीयेताम्। ॐ अग्निपुरोगाः विश्वेदेवाः प्रीयन्ताम्। ॐ इन्द्रपुरोगाः मरुद्गणाः प्रीयन्ताम्। ॐ ब्रह्मपुरोगाः सर्वेवेदाः प्रीयन्ताम्। ॐ विष्णुपुरोगाः सर्वेदेवाः प्रीयन्ताम्। ॐ माहेश्वरी पुरोगाः उमामातरः प्रीयन्ताम्। ॐ वसिष्ठपुरोगाः ऋषिगणाः प्रीयन्ताम्। ॐ अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम्। ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्। ॐ श्रीसरस्वत्यौ प्रीयेताम्। ॐ श्रद्धामेधे प्रीयेताम्। ॐ भगवती कात्यायनी प्रीयताम्। ॐ भगवती माहेश्वरी प्रीयताम्। ॐ भगवती ऋद्धिकरी प्रीयताम्। ॐ भगवती वृद्धिकरी प्रीयताम्। ॐ भगवती पुष्टिकरी प्रीयताम्। ॐ भगवती तुष्टिकरी प्रीयताम्। ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम्। ॐ सर्वा कुलदेवताः प्रीयन्ताम्। ॐ सर्वा ग्रामदेवताः प्रीयन्ताम्। ॐ सर्वा इष्ट देवताः प्रीयन्ताम्।

बहिः—द्वितीय पात्र में।

ॐ हताश्च ब्रह्मद्विषः। ॐ हताश्च परिपन्थिनः। ॐ हताश्च विघ्नकर्तारः। ॐ शत्रवः पराभवं यान्तु। ॐ शाम्यन्तु पापानि। ॐ शाम्यन्त्वीतयः। ॐ शाम्यन्तूपद्रवाः।

अन्तः–कलश के उपर।

ॐ शुभानि वर्धन्ताम्। ॐ शिवा आपः सन्तु। ॐ शिवा ऋतवः सन्तु। ॐ शिवा नद्यः सन्तु। ॐ शिवा गिरयः सन्तु। ॐ शिवा सागराः सन्तु। ॐ शिवा अतिथयः सन्तु। ॐ शिवा अग्नयः सन्तु। ॐ शिवा आहुतयः सन्तु। ॐ अहोरात्रे शिवे स्याताम्।

ॐ नि॒का॒मेनि॑कामेनःप॒र्जन्यो॑वर्षतु॒फल॑वत्यो॑न॒ऽओष॑धयःपच्यन्तांयोगक्षे॒मोनः॑ कल्पताम्॥

ॐ शुक्राऽङ्गारक-बुध-बृहस्पति-शनैश्चर-राहु-केतु-सोमसहित-आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम्। ॐ भगवान् नारायणः प्रीयताम्। ॐ भगवान् पर्जन्यः प्रीयताम्। ॐ भगवान् स्वामी महासेनः प्रीयताम्। पुरोनुवाक्या यत्पुण्यं तदस्तु। प्रातः सूर्योदये यत्पुण्यं तदस्तु।

यजमान बोले—**एतत्कल्याणयुक्तं पुण्यं पुण्याहं वाचयिष्ये।**

ब्राह्मण बोले—**वाच्यताम्।**

यजमान बोले—

ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम्।
वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः॥

ब्राह्मकर्म (यज्ञ) बहुत पुण्यकारक होते हैं, जो सृष्टि की उत्पत्ति में कारक हैं, ब्राह्मकर्म

से ही वेदवृक्षादि (वेद=ज्ञानरूपी वृक्ष) नित्य उत्पन्न होते हैं। उस पुण्यकारक वाक्य का हमारे लिए वाचन कीजिये।

भो ब्राह्मणाः! मया क्रियमाणस्य महाविद्यापुरश्चरणाख्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु।

ब्राह्मण बोले—**ॐ पुण्याहम्।**

यजमान बोले—**अस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु।**

ब्राह्मण बोले—**ॐ पुण्याहम्।**

यजमान बोले—**अस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु।**

ब्राह्मण बोले—**ॐ पुण्याहम्।**

ॐ पु॒नन्तु॑मादेवज॒नाःपु॒नन्तु॒मन॑सा॒धिय॑ः॥ पु॒नन्तु॒विश्वा॑भू॒तानि॒जात॑वेदः पुनी॒हिमा॑॥

यजमान बोले—

पृथिव्यामुद्धतायां तु यत्कल्याणं पुरा कृतम्।
ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः॥

ऋषियों, सिद्धों, गन्धर्वो के द्वारा पृथ्वी के उद्धार के लिए पूर्वकाल में जो कर्म वाचन किया गया था, वही कर्म हमारे कल्याण के लिए वाचन करें।

भो ब्राह्मणाः! मयाक्रियमाणस्य महाविद्यापुरश्चरणाख्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु।

ब्राह्मण बोले—**ॐ कल्याणम्।**

यजमान बोले—**अस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु।**

ब्राह्मण बोले—**ॐ कल्याणम्।**

यजमान बोले—**अस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु।**

ब्राह्मण बोले—**ॐ कल्याणम्।**

ॐ यथे॒मांव्वाचं॑कल्या॒णीमा॒वदा॑नि॒जने॑भ्यः॥ ब्ब्र॒ह्म॒रा॒ज॒न्या॒भ्याꣳशूद्राय॒ चार्य्या॑यच॒स्वाय॒चार॑णायच॒प्प्रि॒योदे॒वानां॒दक्षि॑णायैदा॒तुरि॒हभू॑यासम॒यं मे॒ काम॒ः समृ॑द्ध्यता॒मुप॑मा॒दोन॑मतु॥

यजमान बोले—

सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता।
सम्पूर्णा सुप्रभावा च तामृद्धिं प्रब्रुवन्तु नः॥

जिस कर्म प्रभाव से सागर में से ऋद्धिसिद्धियुक्त महालक्ष्मी की उत्पत्ति हुई, उस सम्पूर्ण प्रभाववाले ऋद्धिप्रदाता वाक्यों का वाचन करें।

भो ब्राह्मणाः! मयाक्रियमाणस्य महाविद्यापुरश्चरणाख्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु।

ब्राह्मण बोले—**ॐ कर्म ऋद्ध्यताम्।**

यजमान बोले—**अस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु।**

ब्राह्मण बोले—**ॐ कर्म ऋद्ध्यताम्।**

यजमान बोले—**अस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु।**

ब्राह्मण बोले—**ॐ कर्म ऋद्ध्यताम्।**

ॐ स॒त्रस्य॒ऋद्धि॒रस्यगन्म॒ज्योति॒रमृताऽअभूम॥ दिवंपृथि॒व्याऽअध्यारु॑हा॒मा विदामदे॒वान्त्स्व॒र्ज्योति॑ः॥

यजमान बोले—

स्वस्तिस्तु या विनाशाख्या पुण्यकल्याणवृद्धिदा।
विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः॥

जिनसे दोषों का विनाश तथा नित्य भला होता है, उन पुण्य तथा कल्याण की वृद्धि करनेवाली, विनायक गणेश की नित्यप्रिया ऋद्धिसिद्धि को प्रदान करनेवाला स्वस्तिवाक्य का वाचन आप सभी विप्रवर्ग करें।

भो ब्राह्मणाः! मया क्रियमाणस्य महाविद्यापुरश्चरणाख्य कर्मणो स्वस्ति भवन्तो ब्रुवन्तु।

ब्राह्मण बोले—**ॐ आयुष्मते स्वस्ति।**

यजमान बोले—**अस्मै कर्मणे स्वस्ति भवन्तो ब्रुवन्तु।**

ब्राह्मण बोले—**ॐ आयुष्मते स्वस्ति।**

यजमान बोले—**अस्मै कर्मणे स्वस्ति भवन्तो ब्रुवन्तु।**

ब्राह्मण बोले—**ॐ आयुष्मते स्वस्ति।**

ॐ स्व॒स्तिन॒ऽइन्द्रो॑वृ॒द्धश्र॑वाःस्व॒स्तिन॑ःपूषावि॒श्ववे॑दाः॥ स्व॒स्तिनस्तार्क्ष्यो॒ऽअरि॑ष्टनेमिःस्व॒स्तिनो॒बृह॒स्पति॑र्दधातु॥

यजमान बोले—

समुद्रमथनाज्जाता जगदानन्दकारिका।
हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः॥

समुद्रमन्थन से उत्पन्न, जगत् में आनन्द करनेवाली, हरि की प्रिया और मङ्गल करने वाली, श्रीः (लक्ष्मी) वृद्धि हेतु, हमारे लिए लक्ष्मीवृद्धिकारक वाक्यों का वाचन करें।

भो ब्राह्मणाः! मया क्रियमाणस्य महाविद्यापुरश्चरणाख्य कर्मणः श्रीरस्तु भवन्तो ब्रुवन्तु।

ब्राह्मण बोले—**ॐ अस्तु श्रीः।**

यजमान बोले—**अस्य कर्मणः श्रीरस्तु भवन्तो ब्रुवन्तु।**

ब्राह्मण बोले—**ॐ अस्तु श्रीः।**

यजमान बोले—**अस्य कर्मणः श्रीरस्तु भवन्तो ब्रुवन्तु।**

ब्राह्मण बोले—**ॐ अस्तु श्रीः।**

ॐ श्रीश्च॑तेल॒क्ष्मीश्च॒पत्न्या॑वहोरा॒त्रेपा॒र्श्वेनक्ष॑त्राणिरू॒पम॒श्विनौ॒व्यात्त॑म्॥ इ॒ष्णणं नि॑षाणा॒मुंम॑ऽइषाणसर्व्वलो॒कंम॑ऽइषाण॥

यजमान बोले—

मृकण्डसूनोरायुर्यद् ध्रुवलोमशयोस्तथा।
आयुषा तेन संयुक्ता जीवेम शरदः शतम्॥

मृकण्ड ऋषि के पुत्र तथा ध्रुवलोमशादि ऋषियों को जिससे दीर्घायुष्य हुआ, वैसे ही आयुष्य के लिए जिससे शतवर्षान्त जीवन हमें प्राप्त हो, उन वाक्यों को हमारे लिए वाचन करें।

ब्राह्मण बोले—**शतं जीवन्तु भवन्तः।**

ॐ श॒तमिन्नुश॒रदो॒अन्ति॑देवा॒यत्रा॑नश्च॒क्राज॒रसं॑त॒नूना॑म्॥ पु॒त्रासो॒यत्र॑पि॒तरो॒भव॑न्ति॒ मानो॑म॒ध्यारी॑रिष॒तायु॒र्गन्तोः॥

यजमान बोले—

शिवगौरीविवाहे या या श्रीरामे नृपात्मजे।
धनदस्य गृहे या श्रीरस्माकं साऽस्तु सद्मनि॥

जिन वाक्यों का वाचन शिव-गौरी के विवाहादि मङ्गलकृत्यों में, श्रीराम के राज्याभिषेक में तथा धनवानों के घर में होता है, उन वाक्यों का हमारे घर में श्रीवृद्धिहेतु वाचन करें।

ब्राह्मण बोले—**ॐ अस्तु श्रीः।**

ॐ मन॑सः॒काम॒माकू॑तिंवा॒चःस॒त्यम॑शीय॥ पशू॒नाꣳरू॒पमन्न॑स्य॒रसो॒यशः॒ श्रीः श्र॑यतां॒मयि॒स्वाहा॑॥

यजमान बोले—

प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट्।
भगवाञ्छाश्वतो नित्यं नो वै रक्षन्तु सर्वतः॥

प्रजापति, लोकपाल, धाता (विष्णु), ब्रह्मा, देवराज इन्द्र तथा शाश्वत भगवान् शिव जिनसे नित्य हमारी रक्षा करें उन वाक्यों को हमारे लिए वाचन करें।

ब्राह्मण बोले—**ॐ भगवान् प्रजापतिः प्रीयताम्।**

ॐ प्रजा॑पते॒नत्वदे॒तान्य॒न्योव्विश्श्वा॑रू॒पाणि॒परि॒ताब॑भूव॥ यत्का॑मास्तेजुहु॒मस्तन्नो॑ऽअस्तुव्व॒यꣳस्या॑म॒पत॑योरयि॒णाम्॥

यजमान बोले—

आयुष्मते स्वस्तिमते यजमानाय दाशुषे।
श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः॥

जिन वाक्यों के वाचन से यजमान को आयुष्य और कल्याण होता है, वही वेदादि ज्ञान में पारङ्गत ऋत्विकादि ब्राह्मण हमारे लिए आशीर्वचन का वाचन करें, जिससे हमारे यहाँ सर्वविध कल्याण तथा आयुष्य की वृद्धि हो।

ब्राह्मण बोले—**ॐ आयुष्मते स्वस्ति।**

ॐ प्प्रति॒पन्था॒मप॑द्महिस्व॒स्ति॒गाम॑ने॒हस॑म्॥ येन॒व्विश्श्वा॒ःपरि॒द्विषो॑व्वृ॒णक्ति॑व्वि॒न्दते॒व्वसु॑॥

यजमान बोले—**ॐ स्वस्तिवाचनसमृद्धिरस्तु।**

ब्राह्मण बोले—**अस्तु स्वस्तिवाचनसमृद्धिः।**

यजमान दक्षिणासंकल्प करे—**ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकनामाऽहं कृतस्यस्वस्तिवाचनकर्मणः समृद्ध्यर्थं तत् सम्पूर्ण फलप्राप्त्यर्थं स्वस्तिवाचकेभ्यो ब्राह्मणेभ्य इमां करोपस्थितदक्षिणां विभज्यदातुमहमुत्सृजे।**

पुण्याहवाचनं परिपूर्णम्

●

अभिषेकः

वरुणकलश का जल लेकर चार अविधुर ब्राह्मण दर्भदूर्वादि से अभिषेक करें, अभिषेक के समय यजमानपत्नी वामभाग में बैठे।

सुरास्त्वामभिषिञ्चन्तु ब्रह्म-विष्णु-महेश्वराः।
वासुदेवो जगन्नथस्तथा सङ्कर्षणो विभुः॥१॥

आपका ब्रह्माविष्णुमहेश्वरादि समस्त देवता अभिषिञ्चन करें, वासुदेव, जगन्नाथ, सङ्कर्षण भगवान् विभु अभिषिञ्चन करे॥१॥

प्रद्युम्नश्चाऽनिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा॥२॥

प्रद्युम्न, अनिरुद्ध हमारे विजय के लिए तथा अखण्ड, अग्नि, भगवान् विष्णु, यम और निर्ऋति सभी आपकी सदैव रक्षा करें॥२॥

वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्राह्मणासहिताः सर्वे दिक्पालाः पान्तु ते सदा॥३॥

वरुण, पवन, धनाध्यक्ष कुबेर तथा शिव समस्त ऋषियों के सहित दिग्पालादि सभी आपकी सदैव रक्षा तथा पालन करें॥३॥

कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः।
बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः॥४॥

कीर्ति, लक्ष्मी, धृति, मेधा, पुष्टि, श्रद्धा, क्रिया, मति, बुद्धि, लज्जा, वपु, शान्ति, कान्ति, तुष्ट्यादि मातृकाएँ सभी आपकी सदैव रक्षा करें॥४॥

एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः।
आदित्यश्चन्द्रमाभौमो बुधजीवसिताऽर्कजाः॥५॥

उपर्युक्त सभी देवतादि अपनी पत्नियों के सहित रक्षार्थ आपका अभिषिञ्चन करें, आदित्यचन्द्रमाभौमबुधगुरुशुक्र तथा शनि समस्त ग्रह सभी आपकी सदैव रक्षा करें॥५॥

ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः॥६॥

सभी ग्रह तृप्त होकर राहु, केतु के सहित आपका अभिषिञ्चन करें, देव, दानव, गन्धर्व, यक्ष, राक्षस तथा समस्त सर्प सभी आपकी सदैव रक्षा करें॥६॥

ऋषयो मुनयो गावो देवमातर एव च।
देवपत्न्यो द्रुमा नागा दैत्याश्चाऽप्सरसां गणाः॥७॥

समस्त ऋषि, मुनि, गायें, समस्त देवमाताएँ, समस्त देवपत्नियाँ, वृक्ष, समस्त नाग, दैत्य, अप्सराएँ सभी आपकी सदैव रक्षा करें॥७॥

अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च।
औषधानि च रत्नानि कालस्यावयवाश्च ये॥८॥

समस्त अस्त्र, समस्त शस्त्र, समस्त राजा, समस्त वाहन, समस्त औषधियाँ, समस्त रत्न, समस्त काल के अवयवादि सभी आपकी सदैव रक्षा करें॥८॥

सरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एते त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये॥९॥

समस्त सरिताएँ, समस्त सागरादि, समस्त पर्वत, समस्त मेघादि, समस्त नद सभी धर्म कामना की सिद्धि के लिए आपका अभिषिञ्चन करें॥९॥

ॐ पय॑÷पृथि॒व्यांपय॒ऽओष॑धीषु॒पयो॑दि॒व्य॒न्तरि॑क्षे॒पयो॑धाः॥ पय॑स्वतीःप्प्र॒दिश॑÷ सन्तु॒मह्य॑म्॥ ॐ पञ्च॑न॒द्यः॒सर॑स्वती॒मपि॑यन्ति॒सस्रो॑तसः॥ सर॑स्वती॒तुप॑ञ्च॒धासो दे॒शेभ॑वत्स॒रित्॥ ॐ व्वरु॑णस्यो॒त्तम्भ॑नमसि॒व्वरु॑णस्यस्कम्भ॒सर्ज्जनी॑स्त्थो॒व्वरु॑णस्यऽऋत॒सद॑न्न्यसि॒व्वरु॑णस्यऽऋत॒सद॑नमसि॒व्वरु॑णस्यऽऋत॒सद॑नमासी॑द॥ ॐ पु॒नन्तु॑मादेवज॒नाः

पुनन्तुमनसाधियं÷॥ पुनन्तुव्विश्वाभूतानिजातवेदःपुनीहिमा॥ ॐ देवस्यत्वासवितुः प्रसवेऽश्विनोर्ब्बाहुभ्यांपूष्णोहस्ताभ्याम्॥ सरस्वत्यैव्वाचोयन्तुर्यन्त्रियेदधामि बृहस्पतेष्ट्वासाम्म्राज्येनाभिषिञ्चाम्यसौ॥ ॐ देवस्यत्वासवितुःप्रसवेऽश्विनोर्ब्बाहुभ्यांपूष्णोहस्ताभ्याम्॥ सरस्वत्यैव्वाचोयन्तुर्यन्त्रेणाग्नेःसाम्म्राज्येनाभिषिञ्चामि॥ ॐ देवस्यत्वासवितुःप्रसवेऽश्विनोर्ब्बाहुभ्यांपूष्णोहस्ताभ्याम्॥ अश्विनो भैषज्येनतेजसेब्रह्मवर्चसायाभिषिञ्चामि॥ सरस्वत्यै भैषज्येनव्वीर्यायान्नाद्यायाभि षिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेऽभिषिञ्चामि॥ ॐ विश्वानिदेवसवि तर्द्दुरितानिपरासुव॥ यद्भद्रंतन्नऽआसुव॥ धामच्छदग्ग्निरिन्द्रोब्ब्रह्मादेवोबृहस्पतिः॥ सचेतसोव्विश्वेदेवायज्ञंप्रावन्तुनःशुभे॥ त्वंय्यविष्ठदाशुषोनॄःपाहिशृणुधीगिरः॥ रक्षा तोकमुतत्मना॥ ॐ अन्नपतेऽन्नस्यनोदेह्यनमीवस्यशुष्मिणः॥ प्रप्रदातारंतारिष ऊर्जंनोधेहिद्विपदेचतुष्पदे॥ ॐ द्यौःशान्तिरन्तरिक्षꣳशान्तिःपृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः॥ व्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्ब्रह्म शान्तिः सर्व्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि॥ यतोयतः समीहसेततोनोऽ अभयङ्कुरु॥ शन्नःकुरुप्प्रजाभ्योभयन्नःप्पशुभ्यः॥ सुशान्तिर्भवतु॥

अभिषेक कर्म करने के बाद यजमान संकल्प करके ब्राह्मणों को दक्षिणा दे।

यजमान दक्षिणासंकल्प करे—**ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः---प्रवरः---नामाऽहं कृतस्य अभिषेककर्मणः समृद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं अभिषेककर्तृकेभ्यो ब्राह्मणेभ्य इमां करोपस्थित दक्षिणां विभज्यदातुमहमुत्सृजे।**

अभिषेककर्म परिपूर्णम्

●

षोडशमातृकास्थापन-पूजनम्

कुलदेवता	लोकमातृ	देवसेना	मेधा
तुष्टि	मातृ	जया	शची
पुष्टि	स्वाहा	विजया	पद्मा
धृति	स्वधा	सावित्री	गौरी गणेश

किसी पाटे पर कपड़ा बिछाकर उस पर चित्रानुसार सोलह समान खानों को बना करके प्रथम खाने का दो भाग करके उसमें गेहूं भर करके उस पर सुपाड़ी रख करके उस सुपाड़ी के ऊपर गौरी-गणेश के सहित मातृका देवियों का आवाहन पूजन करे।

गणेशावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ गु॒णाना॑न्त्वागु॒णप॑तिꣳहवामहेप्प्रि॒याणा॑न्त्वाप्प्रि॒यप॑तिꣳहवामहेनिधी॒नान्त्वा॑ निधि॒प॑तिꣳहवामहेव्वसोमम॥ आहम॑जानिगर्ब्भ॒धमात्त्वम॑जासिगर्ब्भ॒धम् ॥

समीपे मातृवर्गस्य सर्वविघ्नहरं सदा।
त्रैलोक्यवन्दितं देवं गणेशं स्थापयाम्यहम्॥

मातृवर्ग के समीप रहनेवाले सर्वदा सभी विघ्नों का हरण करनेवाले तीनों लोकों में जिसकी सदैव वन्दना होती है, ऐसे गणेशजी की स्थापना हम करते है।

ॐ भूर्भुवः स्वः गणपतये नमः गणपतिमावाहयामि स्थापयामि।

गौरीमावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ आयङ्गौःपृश्निर॑क्रमी॒दस॑दन्मा॒तरं॑पु॒रः॥ पि॒तरं॑चप्प्र॒यन्त्स्व॑ः॥

हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम्।
लम्बोदरस्य जननीं गौरीमावाहयाम्यहम्॥

हिमाद्रि (हिमालय) की तनया (पुत्री), वर प्रदान करनेवाली, शङ्कर की प्रिया (शङ्कर की पत्नी), लम्बोदर गणेश की माता भगवती गौरी का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः गौर्यै नमः गौरीमावाहयामि स्थापयामि।

पद्मामावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ हि॑रण्ण्यरूपा॒ऽउ॒षसो॑व्विरो॒कऽउ॒भावि॑न्द्रा॒ऽदि॑थ॒ꣳसूर्य्य॑श्च॥ आरो॑हतंव्वरुणमि॒त्रगर्त॒न्तत॑श्श्चक्षाथा॒मदि॑तिं॒दिति॑ंचमि॒त्रो॒ऽसि॒व्वरु॑णोऽसि॥

पद्माभां पद्मवदनां पद्मनाभोरुसंस्थिताम्।
जगत्प्रियां पद्मवासां पद्मामावाहयाम्यहम्॥

पद्म (कमल) की आभावाली, पद्मवदना (कमल के जैसे शरीरवाली), पद्म नाभि के ऊपर निवास करनेवाली, जगत् को प्रिय लगनेवाली, पद्म में वास करनेवाली पद्मादेवी का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः पद्मायै नमः पद्मामावाहयामि स्थापयामि।

शचीमावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ नि॒वेश॑नꣳस॒ङ्गम॑नो॒व्वसू॑नां॒व्विश्श्वा॑रू॒पाभिच॑ष्ट्टे॒शची॑भिः॥ दे॒वऽई॑वसवि॒तास॒त्त्यधर्म्मेन्द्रो॒नत॑स्त्थौसम॒रेप॑थी॒नाम्॥

दिव्यरूपां विशालाक्षीं शुचिकुण्डलधारिणीम्।
रक्तमुक्ताद्यलङ्कारां शचीमावाहयाम्यहम्॥

दिव्य रूपवाली, विशालाक्षी, पवित्र कुण्डल धारण करनेवाली, लालमुक्तामणि के अलङ्कारों से अलंकृत शचीदेवी का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः शच्यै नमः शचीमावाहयामि स्थापयामि।

मेधामावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ मे॒धांमे॒व्वरु॑णोददातुमे॒धाम॒ग्निः॒प्प्र॒जाप॑तिः॥ मे॒धामिन्द्र॑श्श्चव्वा॒युश्श्चमे॒धांधा॒ता द॑दातुमे॒स्वाहा॑॥

विश्वेऽस्मिन्भूरिवरदां जरां निर्जरसेविताम्।
बुद्धिप्रबोधिनीं सौम्यां मेधामावाहयाम्यहम्॥

इस विश्व में सर्वाधिक वरप्रदान करनेवाली, जरा और निर्जरा से सेवित, बुद्धि का विस्तार करनेवाली, सौम्य (सरल) मेधादेवी का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः मेधायै नमः मेधामावाहयामि स्थापयामि।

सावित्रीमावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ स॒वि॒तात्त्वा॑स॒वानाꣳसुवताम॒ग्निर्ग्गृ॒हप॑तिना॒ꣳसोमो॒व्वन॒स्प्पती॑नाम्॥ बृह॒स्प्पति॒र्व्वा॒चऽइन्द्रो॒ज्ज्यैष्ठ्या॑यरु॒द्द्रः॒प॒शुब्भ्यो॑मि॒त्रः॒स॒त्त्योव्वरु॑णो॒धर्म्म॑पतीनाम्॥

जगत्सृष्टिकरीं धात्रीं देवीं प्रणवमातृकाम्।
वेदगर्भां यज्ञमयीं सावित्रीं स्थापयाम्यहम्॥

जगत् में सृष्टि करनेवाली धात्रीदेवी जो प्रणव में मातृकारूपिणी हैं, वेद के भीतर रहने वाली यज्ञमयी सावित्रीदेवी की मैं स्थापना करता हूँ।

ॐ भूर्भुवः स्वः सावित्र्यै नमः सावित्रीमावाहयामि स्थापयामि।

विजयामावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ विज्ज्य॒न्धनु॑÷कप॒र्दिनो॒विश॑ल्यो॒बाण॑वाँ२॥उ॒त॥ अनै॑शन्नस्य॒याऽइष॑वऽ आ॒भुर॑स्यनिषङ्ग॒धिः॥

सर्वास्त्रधारिणीं देवीं सर्वाभरणभूषिताम्।
सर्वदेवस्तुतां वन्द्यां विजयां स्थापयाम्यहम्॥

सभी अस्त्रों को धारण करनेवाली, सभी आभूषणों से सुसज्जित, सभी देवताओं से सदैव वन्दित, विजयादेवी की मैं स्थापना करता हूँ।

ॐ भूर्भुवः स्वः विजयायै नमः विजयामावाहयामि स्थापयामि।

जयामावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ व॒ह्वी॒नांपि॒ताब॒हुर॑स्यपु॒त्रश्चि॒श्चाकृणोति॒सम॑नाव॒गत्य॑॥ इ॒षु॒धिःसङ्काः पृत॑नाश्च॒सर्वाः॑पृ॒ष्ठेनिन॑द्धोजयति॒प्प्रसू॑तः॥

सुरारिमथिनीं देवीं देवानामभयप्रदाम्।
त्रैलोक्यवन्दितां शुभ्रां जयामावाहयाम्यहम्॥

देवताओं के शत्रुओं का मन्थन करनेवाली, देवी जो देवताओं को अभय प्रदान करती हैं जो तीनों लोकों में वन्दिता हैं, ऐसी शुभ्र जयादेवी की मैं स्थापना करता हूँ।

ॐ भूर्भुवः स्वः जयायै नमः जयामावाहयामि स्थापयामि।

देवसेनामावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ इन्द्र॑ऽआसान्ने॒ताबृह॒स्पति॒र्द्दक्षि॑णाय॒ज्ञःपु॒रए॑तु॒सोम॑÷॥ दे॒व॒सेना॑नामभिभञ्जजी॒नांजय॑न्तीनांम॒रुतो॑य॒न्त्वग्र॑म्॥

मयूरवाहनां देवीं खड्गशक्तिधनुर्धराम्।
आवाहयेत्देवसेनां तारकासुरमर्दिनीम्॥

मयूर जिनका वाहन है, जो खड्ग-शक्ति तथा धनुष को धारण करती हैं, तारकासुर का मर्दन करनेवाली उन देवसेनादेवी का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः देवसेनायै नमः देवसेनामावाहयामि स्थापयामि।

स्वधामावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ पि॒तृब्भ्य॑÷स्वधा॒यिब्भ्य॑÷स्व॒धानम॑÷पिताम॒हेब्भ्य॑÷स्वधा॒यिब्भ्य॑÷स्व॒धानमः प्प्रति॑तामहेब्भ्यःस्वधा॒यिब्भ्य॑÷स्व॒धानम॑÷॥ अक्ष॑न्न्पि॒तरोऽमी॑मदन्तपि॒तरोऽती॑तृपन्त पि॒तरः॒पित॑रःशुन्ध॑द्ध्वम्॥

अग्रजा सर्वदेवानां कव्यार्थं या प्रतिष्ठिता।
पितृणां तृप्तिदां देवीं स्वधामावाहयाम्यहम्॥

सभी देवताओं में सर्वप्रथम उत्पन्न होनेवाली, कव्य को धारण करनेवाली तथा पितरों को तृप्ति प्रदान करनेवाली, स्वधादेवी का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः स्वधायै नमः स्वधामावाहयामि स्थापयामि।

स्वाहामावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ स्वाहा॑प्प्रा॒णेभ्य॒ःसाधि॑पतिकेभ्यः॥ पृ॒थि॒व्यैस्वाहा॒ग्ग्नये॒स्वाहा॒न्तरि॒क्षाय॒ स्वाहा॑व्वा॒यवे॒स्वाहा॑॥ दि॒वेस्वाहा॒सूर्य्या॑य॒स्वाहा॑॥

हविर्गृहीत्वा सततं देवेभ्यो या प्रयच्छति।
तां दिव्यरूपां वरदां स्वाहामावाहयाम्यहम्॥

हवि को ग्रहण करके देवताओं को प्रदान करनेवाली, दिव्यरूप धारण करनेवाली, वर प्रदान करनेवाली, स्वाहादेवी का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः स्वाहायै नमः स्वाहामावाहयामि स्थापयामि।

मातृः-आवाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ आपो॑ऽअ॒स्म्मान्मा॒तर॑÷शुन्धयन्तुघृ॒तेन॑नोघृत॒प्प्व॒÷पुनन्तु॥ विश्श्व॒ᳪ॒हिरि॒प्प्रं प्प्र॒वह॑न्तिदे॒विरु॒दिदा॑भ्य॒ःशुचि॒रापू॒तऽए॑मि॥ दी॒क्षा॒त॒पसो॑स्त॒नूर॑सि॒तांत्वा॑शि॒वाᳪ॒शग्ग्मां परि॑दधेभ॒द्द्रंव्वर्ण॑पु॒ष्य॑न्॥

आवाहयाम्यहं मातृः सकलाः लोकपूजिताः।
सर्वकल्याणरूपिण्यो वरदा दिव्यभूषणाः॥

सर्वकल्याणरूपी, दिव्यभूषणों से विभूषित, वर प्रदान करनेवाली, सम्पूर्ण लोक में पूजित माताओं (मातृशक्तियों) का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः मातृभ्यो नमः मातृः आवाहयामि स्थापयामि।

लोकमातृः आवाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ र॒यिश्श्च॑मे॒राय॑श्श्चमेपु॒ष्टंच॑मे॒पुष्टि॑श्च्चमेव्वि॒भुच॑मेप्र॒भुच॑मेपू॒र्ण्णंच॑मेपू॒र्ण्णत॑रंच मे॒कुय॑वञ्चमेऽक्षि॑तञ्चमेऽन्नं॑च्चमेऽक्षुच्च॑मेय॒ज्ञेन॑कल्प्पन्ताम्॥

आवाहयेल्लोकमातृः जयन्तिप्रमुखाः शुभा।
नानाऽभीष्टप्रदाः शान्ताः सर्वलोकहितावहाः॥

विभिन्न अभीष्ट प्रदान करनेवाली, लोक में सभी का हित करनेवाली, जयन्त्यादि प्रमुख शुभ माताओ का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः लोकमातृभ्यो नमः लोकमातृः आवाहयामि स्थापयामि।

धृतिमावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ यत्प्रज्ञानमुतचेतोधृतिश्च्चयज्ज्योतिरन्तरमृतंप्प्रजासु॥ यस्मान्नऽऋतेकिञ्चन कर्म्मंक्क्रियतेतन्न्मेमनं÷शिवसङ्कल्प्पमस्तु॥

सर्वहर्षकरीं देवीं भक्तानामभयप्रदाम्।
हर्षोत्फुल्लास्यकमलां धृतिमावाहयाम्यहम्॥

सभी को हर्ष प्रदान करनेवाली, देवी जो भक्तों को अभय प्रदान करनेवाली है, सदैव प्रसन्नता से प्रफुल्लित कमल पर निवास करनेवाली, धृतिदेवी का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः धृत्यै नमः धृतिमावाहयामि स्थापयामि।

पुष्टिमावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ अङ्गान्न्यात्मन्भिषजातदश्श्विनात्मानमङ्गैःसमधात्त्सरस्वती॥ इन्द्रस्यरूपꣳ शतमानमायुश्च्चन्द्रेणज्ज्योतिरमृतंदधानाः॥

पोषयन्तीं जगत्सर्वं स्वदेहप्रभवैर्नवैः।
शाकैः फलैर्जलैर्रत्नैः पुष्टिमावाहयाम्यहम्॥

अपने शरीर से उत्पन्न शाक, फल, जल तथा रत्नादि से समस्त जगत् का पोषण करनेवाली पुष्टिदेवी का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः पुष्ट्यै नमः पुष्टिमावाहयामि स्थापयामि।

तुष्टिमावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः॥ सनः पर्षदति दुर्गाणि विश्श्वानावेव सिन्धुं दुरितात्यग्ग्निः॥

देवैराराधितां देवीं सदा सन्तोषकारिणीम्।
प्रसादसुमुखीं देवीं तुष्टिमावाहयाम्यहम्॥

देवताओं की आराधिता सदैव सन्तोष प्रदान करनेवाली, प्रसन्न मुखवाली तुष्टिदेवी का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः तुष्ट्यै नमः तुष्टिमावाहयामि स्थापयामि।

कुलदेवतामावाहनम्—हाथ में अक्षत लेकर आवाहन करे।

ॐ प्प्राणायस्वाहाऽपानायस्वाहाव्व्यानायस्वाहा॥ चक्षुषेस्वाहाश्श्रोत्त्रायस्वाहाव्वाचे स्वाहामनसेस्वाहा॥

पत्तने नगरे ग्रामे विपिने पर्वते गृहे।
नानाजातिकुलेशानीं दुर्गामावाहयाम्यहम्॥

पत्तन, नगर, गाँव, पर्वत तथा घरमें नाना जाति, कुलोंमें व्याप्त दुर्गादेवी का मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः आत्मनः कुलदेवतायै नमः आत्मनः कुलदेवतामावाहयामि स्थापयामि।

प्रतिष्ठा—दोनों हाथों से स्पर्श करके प्रतिष्ठा करे।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञꣳसमिमन्दधातु।। व्विश्श्वेदेवासऽइहमादयन्तामो३ँम्प्रतिष्ठ।।

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन।।

इसी से प्राण प्रतिष्ठित होते है, इसी से शरीर में प्राणों का प्रवाह (संचरण) होता है, इसी से अर्चना के समय देवत्व आता है, इससे इतर कुछ नहीं है।

ॐ भूर्भुवः स्वः गणेशसहितगौर्यादि आत्मनः कुलदेवतान्तावहितमातृभ्यो नमः आवाहिता प्रतिष्ठिता वरदा भव।

ध्यानम्—दोनों हाथों से पुष्प लेकर ध्यान करे।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो म आवह।।

हे जातवेदा अग्ने! आप सुवर्ण के समान पीतवर्णवाली, किञ्चित् हरितवर्णवाली, किञ्चित् हरिणी रूप धारण करनेवाली, सुवर्णमिश्रित रजत की माला धारण करनेवाली, सुन्दर वर्णवाले चाँदी के समान श्वेतपुष्पों की माला धारण करनेवाली, चन्द्रमा के सदृश प्रकाशवाली, चन्द्रमा के समान सबको प्रसन्न करनेवाली, हिरण्यमयी रूपवाली एवं हिरण्यमय ही जिसका शरीर है, ऐसी सुवर्णमयी लक्ष्मी का मेरे लिए आवाहन करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः ध्यानार्थे पुष्पाणि समर्पयामि।

आसनम्—दोनों हाथों से अक्षत लेकर आसन ध्यान कर समर्पित करे।

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्।।

हे जातवेदा अग्निदेव! आप उन जगत् विख्यात एवं अनपगामिनी अर्थात् मुझको छोड़कर अन्यत्र न जानेवाली लक्ष्मी को मेरे लिए बुलाओ, मैं सुवर्ण, गौ, घोड़े और पुत्र-पौत्रादि को प्राप्त करने के लिए आवाहन करता हूँ।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः आसनार्थे अक्षतान् समर्पयामि।

पाद्यम्—दोनों हाथों से पाद्यपात्र लेकर समर्पित करे।

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥

जिन देवी के आगे घोड़े और बीच में रथ हैं अथवा जिनके आगे घोड़े जुटे हुए हैं, ऐसे रथ में सवार, हाथियों के निनाद से जगत् को आनन्दित करनेवाली दीप्यमान एवं समस्त जनों को आश्रय देनेवाली लक्ष्मी को मैं अपने समीप बुलाता हूँ, दीप्यमान तथा सबकी आश्रयदाता लक्ष्मी का अपने घर में सर्वदा निवास करने के लिए मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः पादयोः पाद्यं समर्पयामि।

अर्घ्यम्—दोनों हाथों से अर्घ्यपात्र लेकर समर्पित करे।

ॐ कांसोऽस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्ती तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिवोपह्वये श्रियम्॥

जिनका स्वरूप वाणी और मन का विषय न होने के कारण अवर्णनीय है तथा जो मन्दहास्ययुक्ता हैं, जो चारों ओर सुवर्ण से वेष्टित हैं एवं दयार्द्र हृदयवाली या समुद्र से उत्पन्न होने के कारण आर्द्र शरीरवाली होती हुई भी दीप्यमान हैं, अर्थात् जो लक्ष्मीजी दया से आर्द्र होते हुए तेज से देदीप्यमान हैं, स्वयं पूर्णकाम होने के कारण भक्तों के नानाविध मनोरथों को पूर्ण करनेवाली, कमल के ऊपर विराजमान तथा कमल के सदृश गृह में निवास करने वाली, जगत्प्रसिद्ध लक्ष्मी को मैं अपने समीप बुलाता हूँ।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः अर्घ्यं समर्पयामि।

आचमनम्—दोनों हाथों से आचमनीयपात्र लेकर समर्पित करे।

ॐ चन्द्रां प्रभासां यशसा ज्वलन्ती श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मनेमिं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि॥

चन्द्रमा के सदृश प्रकाशवाली, प्रकृष्ट कान्तिवाली, अपनी कीर्ति से देदीप्यमान, स्वर्गलोक में इन्द्रादि देवताओं से सेवित, अतिदानशीला, कमल के मध्य में रहने वाली, सबकी रक्षा करनेवाली, भक्तों को आश्रय देनेवाली, जगत्प्रसिद्ध लक्ष्मी को मैं प्राप्त करता रहूँ, हे लक्ष्मी! तुम्हारी कृपा से मेरी दरिद्रता नष्ट हो, अतः मैं तुम्हें स्वीकार करता हूँ अर्थात् तुम्हारा आश्रय लेता हूँ।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः आचमनार्थे गङ्गोदकं समर्पयामि।

स्नानीयम्—दोनों हाथों से स्नानीयपात्र लेकर समर्पित करे।

ॐ गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतम्।
तोयमेतत्सुखस्पर्शं स्नानार्थं प्रतिगृह्यताम्॥

गङ्गादि सभी तीर्थों से प्रार्थनापूर्वक मैं जल लाया हूँ, इस जल का स्पर्श सुख प्रदान करनेवाला है, इसे स्नान के लिए ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः स्नानीयं जलं समर्पयामि।

पुनराचमनीयम्—दोनों हाथों से आचमनीय जल लेकर समर्पित करे।

ॐ कर्पूरेण सुगन्धेन सुरभिस्वादु शीतलम्।
तोयमाचमनीयार्थं देवीदं प्रतिगृह्यताम्॥

कर्पूर के समान सुगन्धित, दूध के समान धवल, स्वाद में शीतल जल आचमन के लिए प्रस्तुत है, इस आचमनीय जल को हे देवि! ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः पुनराचमनार्थे गङ्गोदकं समर्पयामि।

पयःस्नानम्—दोनों हाथों से पय:पात्र (दूध का बर्तन) लेकर समर्पित करे।

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्॥

कामधेनु गाय से उत्पन्न सभी को जीवन प्रदान करनेवाला, यज्ञ के लिए अति पवित्र दूध आपके स्नान के लिए समर्पित है।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः पयःस्नानं समर्पयामि।

दधिस्नानम्—दोनों हाथों से दधिपात्र लेकर समर्पित करे।

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देव! स्नानार्थं प्रतिगृह्यताम्॥

दूध से उत्पन्न मधुर तथा अम्लयुक्त चन्द्रमा के समान धवल दही हे देव! हम आपके स्नान के लिए लाये हैं, इस दही को ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः दधिस्नानं समर्पयामि।

घृतस्नानम्—दोनों हाथों से घृतपात्र लेकर समर्पित करे।

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥

मक्खन से उत्पन्न सभी को सन्तोष प्रदान करनेवाला घी आपको स्नान के लिए प्रदान करता हूँ, इस घृत को ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः घृतस्नानं समर्पयामि।

मधुस्नानम्—दोनों हाथों से मधुपात्र लेकर समर्पित करे।

पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्॥

पुष्पकणों से उत्पन्न सुन्दर स्वादवाला मधुर शहद, तेज और पुष्टि को प्रदान करने वाला, दिव्य शहद स्नान के लिए आपको समर्पित है।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः मधुस्नानं समर्पयामि।

शर्करास्नानम्—दोनों हाथों से शर्करापात्र लेकर समर्पित करे।

इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम्।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम्॥

इक्षुरस से उत्पन्न शर्करा शुभ पुष्टि प्रदान करनेवाली, सभी प्रकार के मल का अपहरण करनेवाली है, दिव्य स्नान के लिए इस शर्करा को ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः शर्करास्नानं समर्पयामि।

पञ्चामृतस्नानम्—दोनों हाथों से पञ्चामृतपात्र लेकर समर्पित करे।

ॐ पयो दधि घृतं चैव मधुं च शर्करायुतम्।
पञ्चामृतं गृहाण त्वं स्नानार्थं प्रतिगृह्यताम्॥

दूध, दही, घी, मधु और शर्करा से युक्त पञ्चामृत दिव्य स्नान के लिए आपको समर्पित है, इस पञ्चामृत को ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः मिलितपञ्चामृतस्नानं समर्पयामि।

शुद्धोदकस्नानम्—दोनों हाथों से जलपात्र लेकर समर्पित करे।

ॐ गङ्गा च यमुना चैव गोदावरी सरस्वती।
नर्मदासिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम्॥

गङ्गा, यमुना, गोदावरी, सरस्वती, नर्मदा, सिन्धु तथा कावेरी दिव्य नदियों के दिव्य जल आपके स्नान के लिए समर्पित हैं, इस जल को ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः शुद्धोदकस्नानं समर्पयामि

पुनराचमनीयम्—दोनों हाथों से आचमनीय जल लेकर समर्पित करे।

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथविल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः॥

हे सूर्य के सदृश कान्तिवाली देवी! आपके तेज से वनस्पति विशेष बिना पुष्प के फल देनेवाला एक वृक्ष उत्पन्न हुआ (आपके हाथ से विल्ववृक्ष उत्पन्न हुआ) उस विल्ववृक्ष का फल मेरे भीतर-बाहर की दरिद्रता को दूर करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः पुनराचमनार्थे गङ्गोदकं समर्पयामि।

वस्त्रनिवेदनम्—दोनों हाथों से वस्त्र लेकर समर्पित करे।

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतो सुराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥

हे लक्ष्मी! देवसखा अर्थात् श्रीमहादेव के सखा कुबेर या इन्द्रादि देवताओं की अग्नि मुझे प्राप्त हो अर्थात् मैं अग्नि की उपासना करूँ एवं मणि के साथ अर्थात् चिन्तामणि के साथ, कुबेर के मित्र मणिभद्र के साथ या रत्नों के साथ, कीर्ति अर्थात् दक्षकन्या, कुबेर की कोशशाला के सदृश यश मुझे प्राप्त हो अर्थात् कुबेर का धन और यश दोनों ही मुझे मिले, मै इस सुन्दर राष्ट्र में उत्पन्न हुआ हूँ अतः हे कुबेरदेव! आप यश और ऐश्वर्य मुझे प्रदान करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः वस्त्रोपवस्त्रं समर्पयामि। वस्त्रान्ते आचमनीयं समर्पयामि।

यज्ञोपवीतनिवेदनम्—दोनों हाथों से यज्ञोपवीत लेकर समर्पित करे।

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वा निर्णुद मे गृहात्॥

भूख तथा प्यासरूपी मल को धारण करनेवाली एवं लक्ष्मीजी की ज्येष्ठ बहन दरिद्रता का मैं नाश करता हूँ, हे लक्ष्मी! आप मेरे घर से अनैश्वर्य तथा धनवृद्धि के सभी प्रतिबन्धक विघ्नों को दूर करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः यज्ञोपवीतं समर्पयामि। यज्ञोपवीतान्ते आचमनीयं समर्पयामि।

सुगन्धिद्रव्यसमर्पणम्—दोनों हाथों से सुगन्धिद्रव्य लेकर समर्पित करे।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिवोपह्वये श्रियम्॥

सुगन्धित पुष्प के अर्पण करने से प्राप्त करने योग्य, किसी से भी दबाने योग्य नहीं, धन-धान्यादि से सदा परिपूर्ण, गौ-अश्वादि पशुओं की समृद्धि को देनेवाली, समस्त प्राणियों की स्वामिनी तथा जगत्प्रसिद्ध लक्ष्मी को मैं अपने घर में बुलाता हूँ।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः गन्धानुलेपनं समर्पयामि।

अक्षतसमर्पणम्—दोनों हाथों से अक्षत लेकर समर्पित करे।

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥

हे लक्ष्मी! तुम्हारे प्रभाव से मानसिक इच्छा एवं सङ्कल्प, वाणी की सत्यता, गौ आदि पशुओं के रूप अर्थात् दुग्ध-दध्यादि एवं यव, ब्रीहि इत्यादि अन्नों के रूप अर्थात् भक्ष्य,

भोज्य, चोष्य, लेह्य, चतुर्विध भोज्यादि पदार्थों इन समस्त पदार्थों को प्राप्त करूँ, सम्पत्ति-यश मुझमें आश्रय लेकर रहे अर्थात् मै धनवान् कीर्तिमान् बनूँ।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः अलङ्करणार्थे अक्षतान्समर्पयामि।

पुष्पमालासमर्पणम्—दोनों हाथों से पुष्पमाला लेकर समर्पित करे।

ॐ कर्दमेन प्रजा भूता मयि सम्भव कर्दम!।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥

कर्दम नामक ऋषि-पुत्र से लक्ष्मी प्रकृष्ट पुत्रवाली हुई है। हे कर्दम! आप मुझमें अच्छी तरह वास करे। इतनी ही प्रार्थना नहीं है, अपितु कमल की माला धारण करनेवाली, सम्पूर्ण जगत् की माता लक्ष्मी को मेरे कुल में निवास कराओ।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः पुष्पमालां परिधापयामि।

दूर्वासमर्पणम्—दोनों हाथों से दूर्वा लेकर समर्पित करे।

दूर्वाङ्कुरान्सुहरितान् अमृतान्मङ्गलप्रदान्।
आनीतांस्तव पूजार्थं गृहाण गणमातृक!॥

हरे-हरे दूर्वाङ्कुर जो अमृतत्व तथा मङ्गल प्रदान करनेवाले हैं, आपके पूजा के लिए मैं लाया हूँ, आप प्रसन्नतापूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः दूर्वाङ्कुरान् समर्पयामि।

नानापरिमलद्रव्यसमर्पणम्—दोनों हाथों सें अबीरबुक्का लेकर समर्पित करे।

ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवी मातरं श्रियं वासय मे कुले॥

जिस प्रकार कर्दम ऋषि की सन्तति (ख्याति) से लक्ष्मी का अवतार हुआ है, उसी प्रकार अन्य कल्प में भी समुद्र से चौदह रत्नों के बाद लक्ष्मी का आविर्भाव हुआ है। उसी प्रकार जल देवता स्निग्ध एवं मनोहर पदार्थो को उत्पन्न करें (पदार्थो की सुन्दरता लक्ष्मी ही है) लक्ष्मी के आनन्द, कर्दम, चिक्लीत और श्रीत चार पुत्र हैं, जिसमें हे चिक्लीत! तुम मेरे गृह मे निवास करो, केवल तुम ही नहीं, अपितु दिव्यगुणयुक्ता तथा सर्वाश्रयाभूता अपनी माता लक्ष्मी को भी मेरे घर में निवास कराओ।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः नानापरिमलद्रव्याणि समर्पयामि।

सिन्दूरसमर्पणम्—दोनों हाथों से सिन्दूर लेकर समर्पित करे।

ॐ सिन्दूरमरुणाभासं जवाकुसुमसन्निभम्।
पूजितोऽसि मया देवि! प्रसीद परमेश्वरि!॥

अरुणकालिक प्रकाश के समान आभावाला सिन्दूर तथा जवाकुसुम के सदृश वर्ण (रंग) वाले सिन्दूर से हे देवि! मुझ पर प्रसन्न हो तथा पूजित हों।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः सिन्दूराभरणं समर्पयामि। ततः नैवेद्यं पुरतः संस्थाप्य धूपदीपौ प्रज्वाल्य। सिन्दूरादि समर्पण करने के बाद देवता के सम्मुख नैवेद्य स्थापित करने के बाद धूप तथा घृतदीप प्रज्वलित करने के बाद सर्वप्रथम धूप निवेदन करने के बाद दीप निवेदन करे। दीप देवता को समर्पित किया जाता है, न कि चारो ओर घुमाया जाता है।

धूपसमर्पणम्—दोनों हाथों से धूपपात्र लेकर समर्पित करे।

ॐ दशाङ्गं गुग्गुलं धूपं चन्दनाऽगरुसंयुतम्।
समर्पितं मया भक्त्या महादेवि! प्रगृह्यताम्॥

दशाङ्ग, गुग्गुल, चन्दन तथा अगुरु जैसे गन्धों से युक्त धूप भक्तिपूर्वक हम समर्पित करते हैं, हे महादेवि! इस धूप को ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः धूपं समर्पयामि।

दीपसमर्पणम्—दोनों हाथों से दीपपात्र लेकर समर्पित करे।

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

हे जातवेदा अग्ने! आप मेरे घर में पुष्करिणी अर्थात् हाथियों के झुण्डाग्र से अभिषिच्यमाना, आर्द्रशरीरवाली, पुष्टि को देने वाली, पुष्टिस्वरूपा, रक्त और पीत वर्णवाली, कमल की माला धारणकर जगत् को प्रकाशित करनेवाली प्रकाशस्वरूपा लक्ष्मी को हमारे लिए प्रदान करो।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः दीपज्योतिं समर्पयामि।

नैवेद्यसमर्पणम्—दोनों हाथों से नैवेद्यपात्र लेकर समर्पित करे।

ॐ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्।
नैवेद्यं गृह्यतां देवि! भक्तिं मे ह्यचलां कुरु॥

चारों प्रकार का सुन्दर सुस्वादु षड्रसों से युक्त नैवेद्य हे देवी! भक्तिपूर्वक समर्पित करता हूँ, ग्रहण करके अपने में हमारी भक्ति को अचल करो।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः नैवेद्यं समर्पयामि। ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ व्यानाय स्वाहा। मध्ये पानीयं जलं उत्तरापोशनं समर्पयामि।

करोद्वर्तनसमर्पणम्—दोनों हाथों से करोद्वर्तन लेकर समर्पित करे।

ॐ नानासुगन्धिद्रव्यञ्च चन्दनं रजनीयुतम्।
उद्वर्तनं मया दत्तं मातृकां प्रतिगृह्यताम्॥

विभिन्न प्रकार के सुगन्धित द्रव्य चन्दन तथा रजनी पुष्प से युक्त करोद्वर्तन हम प्रदान करते हैं, गणेश सहित मातृकाएँ प्रेमपूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः करोद्वर्तनार्थे चन्दनानुलेपनं समर्पयामि।

ताम्बूलादिसमर्पणम्—दोनों हाथों सें ताम्बूल लेकर समर्पित करे।

ॐ आर्द्रां यः करिर्णीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

हे जातवेद अग्ने! आप मेरे घर में भक्तों पर सर्वदा दयार्द्रचित्त, समस्त भुवन जिनकी याचना करते हैं, दुष्टों को दण्ड देनेवाली, यष्टिवत् अवलम्बनीया, सुन्दर वर्णवाली, सुवर्ण स्वरूपा एवं सुवर्ण की माला धारण करनेवाली सूर्यज्वा अर्थात् जिस प्रकार सूर्य अपने प्रकाश और वृष्टि द्वारा जगत् का पालन-पोषण करता है, उसी प्रकार लक्ष्मी ज्ञान और धन के द्वारा जगत् का पालन-पोषण करती है, अतः प्रकाशस्वरूपा लक्ष्मी को हमारे लिए प्रदान करो।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः मुखशुद्ध्यर्थे पूङ्गीफलमेलालवङ्गादिसहित ताम्बूलपत्राणि समर्पयामि।

फलादिसमर्पणम्—दोनों हाथों से फल लेकर समर्पित करे।

ॐ द्राक्षाखर्जूरकदली पनसाऽऽम्रं कपित्थकम्।
नारिकेलेक्षुजम्ब्यादि फलानि प्रतिगृह्यताम्॥

हे देव! द्राक्षा (किसमिस), खर्जूर (खजूर), कदली (केला), पनस (कटहल), आम्र (आम), कपित्थ (कैथ), नारिकेल (नारियल), इक्षु (गन्ना), जम्बूफल (जामुन), फलों को आपके प्रसन्नता के लिए लाया हूँ, प्रेमपूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः ऋतुकालोद्भवफलानि समर्पयामि।

दक्षिणासमर्पणम्—दोनों हाथों से दक्षिणा लेकर समर्पित करे।

ॐ पूजाफलसमृद्ध्यर्थं तवाग्रे स्वर्णमीश्वरि!।
स्थापितं तेन मे प्रीता पूर्णान्कुरु मनोरथान्॥

पूजा के पूर्ण फल की समृद्धि के लिए स्वर्णमयी मुद्रा आपके सामने समर्पित भाव से स्थापित है, जिसे स्वीकार करके प्रसन्न मन होकर हमारे मनोरथ को पूर्ण करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।

नीराजनसमर्पणम्—दोनों हाथों से नीराजन लेकर घुमाये।

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम्।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव॥

कदली (केले के वृक्ष के) गर्भ से उत्पन्न कर्पूर प्रदीपित करके आपकी आरती हम करते हैं, जिसे देखकर आप प्रसन्न हों तथा हमारी समस्त कामनापूर्ति के लिए वर प्रदान करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः कर्पूरनीराजनं समर्पयामि।

परिक्रमासमर्पणम्—दोनों हाथों से पुष्प लेकर समर्पित करे।

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतिं गावो दास्योऽश्वां विन्देयं पुरुषानहम्॥

हे जातवेद अग्ने! आप मेरे यहाँ उस जगत्विख्यात् लक्ष्मी को, जो मुझे छोड़कर अन्यत्र कहीं न जानेवाली हों, उन लक्ष्मी को प्राप्त कराओ। जिन लक्ष्मी के द्वारा मैं सुवर्ण, उत्तम ऐश्वर्य, गौ, दासी, घोड़े, और पुत्र-पौत्रादि को प्राप्त करूँ, अर्थात् अचला लक्ष्मी को प्राप्त करूँ।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः प्रदक्षिणां समर्पयामि।

पुष्पाञ्जलिसमर्पणम्—दोनों हाथों से पुष्प लेकर समर्पित करे।

ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।
श्रियः पञ्चदशर्थञ्च श्रीकामः सततं जपेत्॥

जो मनुष्य शुचिता को प्राप्तकर अर्थात् शुद्ध होकर लक्ष्मी की कामना से श्रद्धापूर्वक पवित्र मन और सावधान होकर प्रतिदिन अग्नि में गौ के घृत का होम करे और उसके साथ लक्ष्मीसूक्त तथा श्रीसूक्त के पूर्वोक्त पन्द्रह ऋचाओं का प्रतिदिन निरन्तर जप करता रहे।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः मन्त्रपुष्पाञ्जलिं समर्पयामि।

प्रार्थना—

मेधाऽसि देवि विदिताखिलशास्त्रसारा,
दुर्गाऽसि दुर्गभवसागरनौरसङ्गा।
श्रीः कैटभारिहृदयैककृताधिवासा,
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा॥१॥

हे देवि! जिनसे समस्त शास्त्रों के सार का ज्ञान होता है, वह मेधाशक्ति आप ही हैं, दुर्गम भवसागर से पार उतारने वाली नौकारूपी दुर्गादेवी भी आप ही हैं, कैटभ के शत्रु भगवान् विष्णु के हृदय की एकमात्र स्वामिनी लक्ष्मी और चन्द्रमा को सिर पर धारण करनेवाले भगवान् शङ्कर की प्रिया गौरी तुम्हीं हो॥१॥

देवि प्रसीद परमा भवती भवाय,
सद्यो विनाशयसि कोपवती कुलानि।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य॥२॥

हे देवि! आप हमपर प्रसन्न हों, परमात्मस्वरूपा आपके प्रसन्न होने पर जगत् का अभ्युदय होता है और क्रोध में भर जाने पर आप तत्काल ही कितने कुलों का नाश कर डालती हैं, यह बात अभी अनुभव में आयी है; क्योंकि महिषासुर की यह विशाल सेना क्षणभर में आपके कोप से नष्ट हो गयी है॥२॥

गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥१॥
धृतिः पुष्टिस्तथा तुष्टिः आत्मनः कुलदेवताः।
गणेशेनाधिका ह्येता वृद्धौ पूज्यास्तु षोडश॥२॥
आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम।
निर्विघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपः॥३॥

गौरी, पद्मा, शची, मेधा, सावित्री, विजया, जया, देवसेना, स्वधा, स्वाहा, मातृकाएँ, लोकमातृकाएँ, धृति, पुष्टि, तुष्टि तथा अपने कुल के कुलदेवी गणेश के सहित पूजित होकर हमारे घर हमें आयु-आरोग्य-ऐश्वर्य सभी हे मातायें! प्रदान करे तथा हमारे समस्त पूजन-अनुष्ठान को गणेश के सहित मातृकायें निर्विघ्न करें।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः स्तुतिप्रार्थनां समर्पयामि।

पूजनसमर्पणम्—दाहिने हाथ में जल लेकर पूजन समर्पित करे।

अनेन यथोपलब्धद्रव्येण यथाज्ञानेन यथापूजनेन गणेशसहितगौर्यादि आत्मनः कुलदेवतान्तावहित षोडशमातरः प्रीयन्तां न मम।

षोडशमातृकापूजनं परिपूर्णम्

●

सप्तघृतमातृकास्थापन-पूजनम्

किसी पाटे पर कपड़ा बिछा करके उस पर अधोलिखित चक्र सिन्दूर से सप्तविन्द्वात्मक (सबसे पहले नीचे सातविन्दु बनाकर फिर उसके ऊपर छः विन्दु फिर उसके ऊपर पाँच विन्दु उसके उपर चार विन्दु उसके उपर तीन विन्दु उसके ऊपर दो विन्दु फिर उसके ऊपर एक विन्दु चक्र) बनायें। नीचे के सात विन्दुओं पर घृत धारा करके गुड़ से एकीकरण करके उनपर आवाहन-स्थापन करके पूजन करे।



घृतधारा—घी से अधोलिखित मन्त्र पढ़ते हुए सप्तमातृका विन्दुओं पर घृत धारा दें पश्चात् गुड़ से एकीकरण करके प्रत्येक धाराओं पर तत्तद् देवताओं का आवाहन करे।

ॐ व्वसोः पवित्रमसिशतधारंव्वसोः पवित्रमसिसहस्रधारम्॥ देवस्त्वासवितापुनातु व्वसोः पवित्रेणशतधरिणसुप्वा॥ ॐ कामधुक्षः॥

श्र्यामावाहनम्—अक्षत लेकर आवाहन करे।

ॐ मनसःकाममाकूतिंव्वाचःसत्त्यमशीय॥ पशूनाꣳरूपमन्नस्यरसोयशःश्रीः श्रयतांमयिस्वाहा॥

ॐ भूर्भुवः स्वः श्रियै नमः श्रियमावाहयामि स्थापयामि।

लक्ष्मीमावाहनम्—अक्षत लेकर आवाहन करे।

ॐ श्रीश्च्चतेलक्ष्मीश्च्चपत्न्यावहोरात्रेपार्श्श्वेनक्षत्राणिरूपमश्श्विनौव्यात्तम्॥ इष्ष्णंन्निषाणामुंमऽइषाणसर्व्वलोकंमऽइषाण॥

ॐ भूर्भुवः स्वः लक्ष्म्यै नमः लक्ष्मीमावाहयामि स्थापयामि।

धृतिमावाहनम्—अक्षत लेकर आवाहन करे।

ॐ भद्द्रङ्कर्ण्णेभिः श्श्रृणुयामदेवाभद्द्रम्पश्श्येमाक्षभिर्य्यजत्राः॥ स्स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंय्यदायुः॥

ॐ भूर्भुवः स्वः धृत्यै नमः धृतिमावाहयामि स्थापयामि।

मेधामावाहनम्—अक्षत लेकर आवाहन करे।

ॐ मेधांमेव्वरुणोददातुमेधामग्ग्निः प्प्रजापतिः॥ मेधामिन्द्द्रश्च्चव्वायुश्च्चमेधां धातादददातुमेस्वाहा॥

ॐ भूर्भुवः स्वः मेधायै नमः मेधामावाहयामि स्थापयामि।

स्वाहामावाहनम्—अक्षत लेकर आवाहन करे।

ॐ प्प्राणायस्वाहाऽपानायस्वाहाव्व्यानायस्वाहा॥ चक्षुषेस्वाहाश्श्रोत्रायस्वाहा व्वाचेस्वाहामनसेस्वाहा॥

ॐ भूर्भुवः स्वः स्वाहायै नमः स्वाहामावाहयामि स्थापयामि।

प्रज्ञामावाहनम्—अक्षत लेकर आवाहन करे।

ॐ आयङ्गौःपृश्श्निरक्क्रमीदसदन्मातरंपुरः॥ पितरंचप्रयन्त्स्वः॥

ॐ भूर्भुवः स्वः प्रज्ञायै नमः प्रज्ञामावाहयामि स्थापयामि।

सरस्वतीमावाहनम्—अक्षत लेकर आवाहन करे।

ॐ पावकानःसरस्वतीव्वाजैभिर्व्वाजिनीवतियज्ञंव्वष्टुधियावसुः॥

ॐ भूर्भुवः स्वः सरस्वत्यै नमः सरस्वतीमावाहयामि स्थापयामि।

प्रतिष्ठा—दोनों हाथों सें स्पर्श करके प्रतिष्ठा करे।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञःसमिमन्दधातु॥ व्विश्श्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

इसी से प्राण प्रतिष्ठित होते है, इसी से प्राणों का क्षरण होता है, इसी से अर्चना के लिए देवत्व होता है, मेरे लिए इससे इतर कुछ नही है।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः आवाहिताः प्रतिष्ठिताः वरदाः भवन्तु।

ध्यानम्—दोनों हाथों से पुष्प लेकर ध्यान करे।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

हे जातवेदा अग्ने! आप सुवर्ण के समान पीतवर्णवाली, किञ्चित् हरितवर्णवाली, किञ्चित् हरिणी रूप धारण करनेवाली, सुवर्णमिश्रित रजत की माला धारण करनेवाली, सुन्दर वर्णवाले चाँदी के समान श्वेत पुष्पों की माला धारण करनेवाली, चन्द्रमा के सदृश प्रकाशवाली, चन्द्रमा के समान सबको प्रसन्न करनेवाली, चञ्चलता हिरण्यमयी रूपवाली एवं हिरण्यमय ही जिसका शरीर है, ऐसी सुवर्णमयी लक्ष्मी को मेरे लिए आवाहन करता हूँ।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः ध्यानार्थे पुष्पाणि समर्पयामि।

आसनम्—दोनों हाथों से अक्षत लेकर आसन ध्यान कर समर्पित करे।

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥

हे जातवेदा अग्निदेव! आप उन जगत्-विख्यात एवं अनपगामिनी अर्थात् मुझको छोड़कर अन्यत्र न जानेवाली लक्ष्मी को मेरे लिए बुलाओ। मैं सुवर्ण, गौ, घोड़े और पुत्र-पौत्रादि को प्राप्त करने के लिए आवाहन करता हूँ।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः आसनार्थे अक्षतान् समर्पयामि।

पाद्यम्—दोनों हाथों से पाद्यपात्र लेकर समर्पित करे।

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥

जिन देवी के आगे घोड़े और बीच में रथ हैं अथवा जिनके आगे घोड़े जुटे हुए हैं, ऐसे रथ में सवार, हाथियों के निनाद से जगत् को आनन्दित करनेवाली दीप्यमान एवं समस्त जनों को आश्रय देनेवाली लक्ष्मी को मैं अपने समीप बुलाता हूँ, दीप्यमान तथा सबकी आश्रयदाता लक्ष्मी का अपने घर में सर्वदा निवास करने के लिए मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः पाद्यं समर्पयामि।

अर्घ्यम्—दोनों हाथों से अर्घ्यपात्र लेकर समर्पित करे।

ॐ कांसोऽस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्ती तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिवोपह्वये श्रियम्॥

जिनका स्वरूप वाणी और मन का विषय न होने के कारण अवर्णनीय है तथा जो मन्द हास्ययुक्ता हैं, जो चारो ओर सुवर्ण से वेष्टित है एवं दयार्द्र हृदयवाली या समुद्र से उत्पन्न होने के कारण आर्द्र शरीरवाली होती हुई भी दीप्यमान हैं, अर्थात् जो लक्ष्मीजी दया से आर्द्र होते हुए तेज से देदीप्यमान हैं, स्वयं पूर्णकाम होने के कारण भक्तों के नानाविध मनोरथों को पूर्ण करनेवाली, कमल के ऊपर विराजमान तथा कमल के सदृश गृह में निवास करनेवाली, जगत्प्रसिद्ध लक्ष्मी को मैं अपने समीप बुलाता हूँ।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः अर्घ्यं समर्पयामि।

आचमनम्—दोनों हाथों से आचमनीयपात्र लेकर समर्पित करे।

ॐ चन्द्रां प्रभासां यशसा ज्वलन्ती श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मनेमिं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि॥

चन्द्रमा के सदृश प्रकाशवाली, प्रकृष्ट कान्तिवाली, अपनी कीर्ति से देदीप्यमान, स्वर्गलोक में इन्द्रादि देवताओं से सेवित, अतिदानशीला, कमल के मध्य में रहनेवाली, सबकी रक्षा करनेवाली, भक्तों को आश्रय देनेवाली, जगत्प्रसिद्ध लक्ष्मी को मैं प्राप्त करता

रहूँ। हे लक्ष्मी! तुम्हारी कृपा से मेरी दरिद्रता नष्ट हो, अत: मैं तुम्हें स्वीकार करता हूँ अर्थात् तुम्हारा आश्रय लेता हूँ।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः आचमनार्थे गङ्गोदकं समर्पयामि।

स्नानीयम्—दोनों हाथों से स्नानीयपात्र लेकर समर्पित करे।

ॐ गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतम्।
तोयमेतत्सुखस्पर्शं स्नानार्थं प्रतिगृह्यताम्॥

गङ्गादि सभी तीर्थों से प्रार्थनापूर्वक मैं जल लाया हूँ, यह जल का स्पर्श सुख प्रदान करनेवाला है, इसे स्नान के लिए ग्रहण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः स्नानीयं जलं समर्पयामि।

पुनराचमनीयम्—दोनों हाथों से आचमनीय जल लेकर समर्पित करे।

ॐ कर्पूरेण सुगन्धेन सुरभिस्वादु शीतलम्।
तोयमाचमनीयार्थं देवीदं प्रतिगृह्यताम्॥

कर्पूर के समान सुगन्धित, दूध के समान धवल, स्वाद में शीतल जल आचमन के लिए प्रस्तुत है इस आचमनीय जल को हे देवि! ग्रहण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः पुनराचमनार्थे गङ्गोदकं समर्पयामि।

पयःस्नानम्—दोनों हाथों से पय:पात्र लेकर समर्पित करे।

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्॥

कामधेनु गाय से उत्पन्न सभी को जीवन प्रदान करनेवाला, यज्ञ के लिए अति पवित्र दूध आपके स्नान के लिए समर्पित है।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः पयःस्नानं समर्पयामि।

दधिस्नानम्—दोनों हाथों से दधिपात्र लेकर समर्पित करे।

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देव! स्नानार्थं प्रतिगृह्यताम्॥

दूध से उत्पन्न मधुर तथा अम्लयुक्त चन्द्रमा के समान धवल दही हे देव! हम आपके स्नान के लिए लाये हैं, इस दही को ग्रहण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः दधिस्नानं समर्पयामि।

घृतस्नानम्—दोनों हाथों से घृतपात्र लेकर समर्पित करे।

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥

मक्खन से उत्पन्न सभी को सन्तोष प्रदान करनेवाला घी आपको स्नान के लिए प्रदान करता हूँ, इस घृत को ग्रहण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः घृतस्नानं समर्पयामि।

मधुस्नानम्—दोनों हाथों से मधुपात्र लेकर समर्पित करे।

पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु।
तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्॥

पुष्पकणों से उत्पन्न सुन्दर स्वादवाला मधुर शहद, तेज और पुष्टि को प्रदान करने वाला, दिव्य शहद स्नान के लिए आपको समर्पित है।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः मधुस्नानं समर्पयामि।

शर्करास्नानम्—दोनों हाथों से शर्करापात्र लेकर समर्पित करे।

इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम्।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम्॥

इक्षुरस से उत्पन्न शर्करा शुभ पुष्टि प्रदान करनेवाली, सभी प्रकार के मल का अपहरण करनेवाली है, दिव्य स्नान के लिए इस शर्करा को ग्रहण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः शर्करास्नानं समर्पयामि।

पञ्चामृतस्नानम्—दोनों हाथों से पञ्चामृतपात्र लेकर समर्पित करे।

ॐ पयो दधि घृतं चैव मधुं च शर्करायुतम्।
पञ्चामृतं गृहाण त्वं स्नानार्थं प्रतिगृह्यताम्॥

दूध, दही, घी, मधु और शर्करा से युक्त पञ्चामृत दिव्य स्नान के लिए आपको समर्पित है, इस पञ्चामृत को ग्रहण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः मिलितपञ्चामृतस्नानं समर्पयामि।

शुद्धोदकस्नानम्—दोनों हाथों से जलपात्र लेकर समर्पित करे।

ॐ गङ्गा च यमुना चैव गोदावरी सरस्वती।
नर्मदासिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम्॥

गङ्गा, यमुना, गोदावरी, सरस्वती, नर्मदा, सिन्धु तथा कावेरी दिव्य नदियों के दिव्य जल आपके स्नान के लिए समर्पित है, इस जल को ग्रहण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः शुद्धोदकस्नानं समर्पयामि

पुनराचमनीयम्—दोनों हाथों से आचमनीय जल लेकर समर्पित करे।

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तववृक्षोऽथविल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः॥

हे सूर्य के सदृश कान्तिवाली देवी! आपके तेज से वनस्पति विशेष बिना पुष्प के फल देने वाला एक वृक्ष उत्पन्न हुआ (आपके हाथ से विल्ववृक्ष उत्पन्न हुआ) उस विल्ववृक्ष का फल मेरे भीतर-बाहर की दरिद्रता को दूर करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः पुनराचमनार्थे गङ्गोदकं समर्पयामि।

वस्त्रनिवेदनम्—दोनों हाथों से वस्त्र लेकर समर्पित करे।

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतो सुराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥

हे लक्ष्मी! देवसखा अर्थात् श्रीमहादेव के सखा कुबेर या इन्द्रादि देवताओं की अग्नि मुझे प्राप्त हो अर्थात् मैं अग्नि की उपासना करूँ एवं मणि के साथ अर्थात् चिन्तामणि के साथ, कुबेर के मित्र मणिभद्र के साथ या रत्नों के साथ, कीर्ति अर्थात् दक्षकन्या, कुबेर की कोशशाला के सदृश यश मुझे प्राप्त हो अर्थात् कुबेर का धन और यश दोनों ही मुझे मिले, मैं इस सुन्दर राष्ट्र में उत्पन्न हुआ हूँ अतः हे कुबेरदेव! आप यश और ऐश्वर्य मुझे प्रदान करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः वस्त्रोपवस्त्रं समर्पयामि। वस्त्रान्ते आचमनीयं समर्पयामि।

यज्ञोपवीतनिवेदनम्—दोनों हाथों से यज्ञोपवीत लेकर समर्पित करे।

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वा निर्णुद मे गृहात्॥

भूख तथा प्यासरूपी मल को धारण करनेवाली एवं लक्ष्मीजी की ज्येष्ठ बहन दरिद्रता का मै नाश करता हूँ, हे लक्ष्मी! आप मेरे घर से अनैश्वर्य तथा धनवृद्धि के सभी प्रतिबन्धक विघ्नों को दूर करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः यज्ञोपवीतं समर्पयामि। यज्ञोपवीतान्ते आचमनीयं समर्पयामि।

सुगन्धिद्रव्यसमर्पणम्—दोनों हाथों से सुगन्धिद्रव्य लेकर समर्पित करे।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिवोपह्वये श्रियम्॥

सुगन्धित पुष्प के अर्पण करने से प्राप्त करने योग्य, किसी से भी दबाने योग्य नहीं,

धन-धान्यादि से सदा परिपूर्ण, गौ-अश्वादि पशुओं की समृद्धि को देनेवाली, समस्त प्राणियों की स्वामिनी तथा जगत्प्रसिद्ध लक्ष्मी को मैं अपने घर में बुलाता हूँ।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः गन्धानुलेपनं समर्पयामि।

अक्षतसमर्पणम्—दोनों हाथों से अक्षत लेकर समर्पित करे।

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥

हे लक्ष्मी! तुम्हारे प्रभाव से मानसिक इच्छा एवं सङ्कल्प, वाणी की सत्यता, गौ आदि पशुओं के रूप में अर्थात् दुग्ध-दध्यादि एवं यव, ब्रीहि इत्यादि अन्नों के रूप में अर्थात् भक्ष्य, भोज्य, चोष्य, लेह्य, चतुर्विध भोजयादि पदार्थो इन समस्त पदार्थो को प्राप्त करूँ। सम्पत्ति-यश मुझमें आश्रय लेकर रहे,अर्थात् मै धनवान् कीर्तिमान् बनूँ।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः अलङ्करणार्थे अक्षतान् समर्पयामि।

पुष्पमालासमर्पणम्—दोनों हाथों से पुष्पमाला लेकर समर्पित करे।

ॐ कर्दमेन प्रजा भूता मयि सम्भव कर्दम!।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥

कर्दम नामक ऋषि-पुत्र से लक्ष्मी प्रकृष्ट पुत्रवाली हुई हैं। हे कर्दम! आप मुझमें अच्छी तरह वास करें। इतनी ही प्रार्थना नहीं है, अपितु कमल की माला धारण करनेवाली, सम्पूर्ण जगत् की माता लक्ष्मी को मेरे कुल में निवास कराओ।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः पुष्पमालां परिधापयामि।

दूर्वासमर्पणम्—दोनों हाथों से दूर्वा लेकर समर्पित करे।

दूर्वाङ्कुरान्सुहरितान् अमृतान्मङ्गलप्रदान्।
आनीतांस्तव पूजार्थं गृहाण गणनायक!॥

हरे-हरे दूर्वाङ्कुर जो अमृतत्व तथा मङ्गल प्रदान करनेवाले हैं, आपके पूजा के लिए मैं लाया हूँ, आप प्रसन्नतापूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः दूर्वाङ्कुरान् समर्पयामि।

नानःपरिमलद्रव्यसमर्पणम्—दोनों हाथों सें अबीरबुक्का लेकर समर्पित करे।

ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले॥

जिस प्रकार कर्दम ऋषि की सन्तति (ख्याति) से लक्ष्मी का अवतार हुआ है, उसी

प्रकार अन्य कल्प में भी समुद्र से चौदह रत्नों के बाद लक्ष्मी का आविर्भाव हुआ है। उसी प्रकार जल देवता स्निग्ध एवं मनोहर पदार्थों को उत्पन्न करे (पदार्थों की सुन्दरता लक्ष्मी ही है) लक्ष्मी के आनन्द, कर्दम, चिक्लीत और श्रीत चार पुत्र हैं। जिसमें हे चिक्लीत! तुम मेरे गृह मे निवास करो, केवल तुम ही नहीं, अपितु दिव्यगुणयुक्ता तथा सर्वाश्रयाभूता अपनी माता लक्ष्मी को भी मेरे घर में निवास कराओ।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः नानापरिमलद्रव्याणि समर्पयामि।

सिन्दूरसमर्पणम्—दोनों हाथों से सिन्दूर लेकर समर्पित करे।

ॐ सिन्दूरमरुणाभासं जवाकुसुमसन्निभम्।
पूजितोऽसि मया देवि! प्रसीद परमेश्वरि!॥

अरुणकालिक प्रकाश के समान आभावाला सिन्दूर तथा जवाकुसुम के सदृश वर्ण (रंग) वाले सिन्दूर से हे देवि! मुझ पर प्रसन्न हो तथा पूजित हों।

ॐ भूर्भुवः स्वः गणेशसहितषोडशमातृकाभ्यां नमः सिन्दूराभरणं समर्पयामि। ततः नैवेद्यं पुरतः संस्थाप्य धूपदीपौ प्रज्वाल्य। सिन्दूरादि समर्पण करने के बाद देवता के सम्मुख नैवेद्य स्थापित करने के बाद धूप तथा घृतदीप प्रज्वलित करने के बाद सर्वप्रथम धूप निवेदन करने के बाद दीप निवेदन करे। दीप देवता को समर्पित किया जाता है, न कि चारो ओर घुमाया जाता है।

धूपसमर्पणम्—दोनों हाथों से धूपपात्र लेकर समर्पित करे।

ॐ दशाङ्गं गुग्गुलं धूपं चन्दनाऽगरुसंयुतम्।
समर्पितं मया भक्त्या महादेवि! प्रगृह्यताम्॥

दशाङ्ग, गुग्गुल, चन्दन तथा अगुरु जैसे गन्धों से युक्त धूप भक्तिपूर्वक हम समर्पित करते है, हे महादेवि! इस धूप को ग्रहण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः धूपं समर्पयामि।

दीपसमर्पणम्—दोनों हाथों से दीपपात्र लेकर समर्पित करे।

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

हे जातवेदा अग्ने! आप मेरे घर में पुष्करिणी अर्थात् हाथियों के झुण्डाग्र से अभिषिच्यमाना, आर्द्रशरीरवाली, पुष्टि को देनेवाली, पुष्टिस्वरूपा, रक्त और पीत वर्णवाली, कमल की माला धारणकर जगत् को प्रकाशित करनेवाली प्रकाशस्वरूपा लक्ष्मी को हमारे लिए प्रदान करो।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः दीपज्योतिं समर्पयामि।

नैवेद्यसमर्पणम्—दोनों हाथों से नैवेद्यपात्र लेकर समर्पित करे।

ॐ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्।
नैवेद्यं गृह्यतां देवि! भक्तिं मे ह्यचला कुरु॥

चारो प्रकार का सुन्दर सुस्वादु षड्रसों से युक्त नैवेद्य हे देवि! भक्तिपूर्वक समर्पित करता हूँ, ग्रहण करके अपने में हमारी भक्ति को अचल करो।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः नैवेद्यं समर्पयामि। ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ व्यानाय स्वाहा। मध्ये पानीयं जलं उत्तरापोशनं समर्पयामि।

करोद्वर्तनसमर्पणम्—दोनों हाथों से करोद्वर्तन लेकर समर्पित करे।

ॐ नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम्।
उद्वर्तनं मया दत्तं मातृकां प्रतिगृह्यताम्॥

विभिन्न प्रकार के सुगन्धित द्रव्य चन्दन तथा रजनी पुष्प से युक्त करोद्वर्तन हम प्रदान करते हैं, गणेश सहित मातृकाएँ प्रेमपूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः करोद्वर्तनार्थे चन्दनानुलेपनं समर्पयामि।

ताम्बूलादिसमर्पणम्—दोनों हाथों से ताम्बूल लेकर समर्पित करे।

ॐ आर्द्रां यः करिर्णीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

हे जातवेद अग्ने! आप मेरे घर में भक्तों पर सर्वदा दयार्द्रचित्त, समस्त भुवन जिनकी याचना करते हैं, दुष्टों को दण्ड देनेवाली, यष्टिवत् अवलम्बनीया, सुन्दर वर्णवाली, सुवर्ण स्वरूपा एवं सुवर्ण की माला धारण करनेवाली सूर्यज्वा अर्थात् जिस प्रकार सूर्य अपने प्रकाश और वृष्टि द्वारा जगत् का पालन-पोषण करता है उसी प्रकार लक्ष्मी ज्ञान और धन के द्वारा जगत् का पालन पोषण करती है, अतः प्रकाशस्वरूपा लक्ष्मी को हमारे लिए प्रदान करो।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः मुखशुद्ध्यर्थे पूङ्गीफलमेलालवङ्गादिसहित ताम्बूलपत्राणि समर्पयामि।

फलादिसमर्पणम्—दोनों हाथों से फल लेकर समर्पित करे।

ॐ द्राक्षाखर्जूरकदलीपनसाऽऽम्रं कपित्थकम् ।
नारिकेलेक्षुजम्ब्यादि फलानि प्रतिगृह्यताम्॥

हे देव! द्राक्षा (किसमिस), खर्जूर (खजूर), कदली (केला), पनस (कटहल), आम्र (आम), कपित्थ (कैथ), नारिकेल (नारियल), इक्षु (गन्ना), जम्बूफल (जामुन) आदि फलों को आपके प्रसन्नता के लिए लाया हूँ, प्रेम पूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः ऋतुकालोद्भवफलानि समर्पयामि।

दक्षिणासमर्पणम्—दोनों हाथों से दक्षिणा लेकर समर्पित करे।

ॐ पूजाफलसमृद्ध्यर्थं तवाग्रे स्वर्णमीश्वरि!।
स्थापितं तेन मे प्रीता पूर्णान्कुरु मनोरथान्॥

हे ईश्वरि! पूजा के पूर्ण फल की समृद्धि के लिए स्वर्णमयी मुद्रा आपके सामने समर्पित भाव से स्थापित है, जिसे स्वीकार करके जिससे प्रसन्न मन होकर हमारे मनोरथ को पूर्ण करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।

नीराजनसमर्पणम्—दोनों हाथों से नीराजन लेकर घुमाये।

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम्।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव॥

कदली (केले के वृक्ष के) गर्भ से उत्पन्न कर्पूर प्रदीपित करके आपकी आरती हम करते हैं, जिसे देखकर आप प्रसन्न हों तथा हमारी समस्त कामनापूर्ति के लिए वर प्रदान करें।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः कर्पूरनीराजनं समर्पयामि।

परिक्रमासमर्पणम्—दोनों हाथों सें पुष्प लेकर समर्पित करे।

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतिं गावोदास्योऽश्वां विन्देयं पुरुषानहम्॥

हे जातवेद अग्ने! आप मेरे यहाँ उस जगत्विख्यात् लक्ष्मी को, जो मुझे छोड़कर अन्यत्र कहीं न जानेवाली हों, उन लक्ष्मी को प्राप्त कराओ। जिन लक्ष्मी के द्वारा मैं सुवर्ण, उत्तम ऐश्वर्य, गौ, दासी, घोड़े, और पुत्र-पौत्रादि को प्राप्त करूँ अर्थात् अचला लक्ष्मी को प्राप्त करूँ।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः प्रदक्षिणां समर्पयामि।

पुष्पाञ्जलिसमर्पणम्—दोनों हाथों से पुष्प लेकर समर्पित करे।

ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।
श्रियः पञ्चदशर्थञ्च श्रीकामः सततं जपेत्॥

जो मनुष्य शुचिता को प्राप्तकर अर्थात् शुद्ध होकर लक्ष्मी की कामना से श्रद्धापूर्वक पवित्र मन और सावधान होकर प्रतिदिन अग्नि में गौ के घृत का होम करे और उसके साथ लक्ष्मीसूक्त तथा श्रीसूक्त के पूर्वोक्त पन्द्रह ऋचाओं का प्रतिदिन निरन्तर जप करता रहे।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वत्यन्तसप्तघृतमातृभ्यो नमः मन्त्रपुष्पाञ्जलीं समर्पयामि।

प्रार्थनासमर्पणम्—दोनों हाथों में पुष्प लेकर प्रार्थना समर्पण करे।

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः,
पापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा,
तां त्वां नताः स्म परिपालय देवि विश्वम्॥

जो पुण्यात्माओं के घरों में लक्ष्मीरूप से, पापियों के घर में दरिद्रतारूप से, शुद्ध अन्तःकरणवाले पुरुषों के हृदय में बुद्धिरूप से, सत्पुरुषों में श्रद्धारूप से, तथा कुलीन मनुष्यों में लज्जारूप से निवास करती हैं, वे श्रीस्वरूपिणी महादेवी हमारा पालन करें।

श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती।
माङ्गल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः॥१॥

श्री, लक्ष्मी, धृति, मेधा, स्वाहा, प्रज्ञा तथा सरस्वती सप्तघृत सभी मातृकायें मङ्गल कार्यों में सदैव पूजित होती हैं॥१॥

यदङ्गत्वेन भो देव्या पूजितो विधिमार्गतः।
कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम्॥२॥

हे देवियों! अङ्ग के रूप में विधिपूर्वक पूजित होकर हमारे समस्त कार्यों को निर्विघ्न रूप से पूर्ण करानेवाली हो जाओ॥२॥

अनेन यथोपलब्धद्रव्येण यथाज्ञानेन पूजनेन श्र्यादिसरस्वन्त्यन्तसप्तघृतमातरः प्रीयन्तां न मम।

सप्त घृतमातृकाओं के पूजन के बाद सभी ब्राह्मण मिलकर आयुष्यमन्त्र का पाठ करें। यजमान ध्यानपूर्वक सपरिवार सुने।

सप्तघृतमातृकापूजनं परिपूर्णम्

◆

आयुष्यमन्त्रपाठः

यदायुष्यं चिरं देवाः सप्तकल्पान्तजीविषु।
ददुस्तेनायुषा युक्ता जीवेम शरदः शतम्॥१॥

जिससे लम्बी आयु प्राप्त करके देवता सप्तकल्प तक जीवित रहते हैं, उस आयुष्यकारक पुण्य को हमें प्रदान करें, जिससे हम सौ वर्ष की आयु प्राप्त करें॥१॥

दीर्घा नागा नगानद्योऽनन्ताः सप्तार्णवा दिशः।
अनन्तेनायुषा तेन जीवेम शरदः शतम्॥२॥

दीर्घ आयुष्य वाले समुद्रादि-पर्वतादि दिशायें अनन्त आयु प्राप्त करके जीवित रहते हैं, उन आयुष्य को प्राप्त करके सौ वर्ष पर्यन्त जीवन प्राप्त करे ॥२॥

सत्यानि पञ्चभूतानि विनाशरहितानि च।
अविनाश्यायुषा तद्वज्जीवेम शरदः शतम्॥३॥

जिससे पञ्चभूत सत्य और विनाशरहित होते हैं, वैसे ही नष्ट न होनेवाली आयु प्राप्त करके हम सौ वर्ष तक जीवित रहें॥३॥

ॐ आयुष्यंव्वर्च्चस्यꣳरायस्प्पोषमौद्भिदम्॥ इदꣳहिरण्ण्यंव्वर्च्चस्वज्जैत्राया विशतादुमाम्॥ ॐ नतद्रक्षाꣳसिनपिशाचास्तरन्तिदेवानामोजः प्प्रथमजꣳह्येतत्॥ योबिभर्तिदाक्षायणꣳहिरण्यꣳसदेवेषुकृणुतेदीर्घमायुꣳसमनुष्ष्येषुकृणुतेदीर्घमायुः॥ ॐ यदाबध्नन्दाक्षायणाहिरण्ण्यꣳशतानीकायसुमनस्यमानाः॥ तन्मऽआबध्नामि शतशारदायायुष्मान्जरदष्टिर्य्यथासम्॥

आयुष्यमन्त्र का पाठ करते हुए यजमान को रक्षासूत्र बाँधे। आयुष्यमन्त्र के पाठ के बाद आचार्य यजमान को रक्षासूत्र बाँधे। आयुष्यमन्त्र का पाठ श्रवण करने के बाद यजमान दक्षिणा-संकल्प करके ब्राह्मणों को दक्षिणा प्रदान करे।

दक्षिणासंकल्पः—**ॐ तत्सदद्यपूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ-----गोत्रः-----प्रवरः-----नामाऽहं कृतस्य आयुष्यमन्त्रपाठकर्मणः समृद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं आयुष्यमन्त्रपाठकर्तृकेभ्यो ब्राह्मणेभ्य इमां करोपस्थितदक्षिणां विभज्य दातुमहमुत्सृजे।**

आयुष्यमन्त्र का पाठ करने के बाद किसी पत्तल या पाटे पर अधोलिखित आकृति के अनुसार रेखाओं को बनाकर उसपर कुश रखकर पूजन करे।

आयुष्यमन्त्रपाठः परिपूर्णम्

●

साङ्कल्पिकेन विधिना नान्दिश्राद्धम्



आयुष्यमन्त्र पाठ के बाद किसी पत्तल या पाटे पर आकृति के अनुसार रेखाओं को बना कर उस पर कुशनिर्मित मोटक रखकर पूजन करे, ऊर्ध्व की रेखाओं पर विश्वेदेव का तथा नीचे की दक्षिण की दोनो रेखाओं पर मातृपितामहीप्रपितामही का तथा मध्य दोनो रेखाओं पर पितृपितामहप्रपितामह एवं वाम दोनो रेखाओं पर मातामहप्रमातामहवृद्धप्रमातामह का आवाहन पूजन करे, यह श्राद्ध सव्य हो कर ही करेगें। सर्वप्रथम विश्वेदेव के साथ पितरों का ध्यान करे, जिनके माता-पिता जीवित हों वे माता-पिता को छोड़कर ऊपर की पीढ़ी पितामहादि के लिए श्राद्ध करेंगे, विद्वान् कर्मकाण्डी तदनुसार ऊह करके श्राद्ध करायें।

विश्वेदेवावाहनम्—

ॐ व्विश्श्वेदेवासऽआगतश्रृणुतामऽइमᳬहवम्॥ एदम्बर्हिन्निषीदत॥ उपयामगृहीतोसिव्विश्श्वेब्भ्यस्त्वादेवेब्भ्यऽएषतेयोनिर्व्विश्श्वेब्भ्यस्त्वादेवेब्भ्यः॥ ॐ व्विश्श्वेदेवाऽअᳬशुषुन्न्युप्तोव्विष्ण्णुराप्प्रीतपाऽआप्प्याय्यमानोयमःसूयमानोव्विष्ण्णुः सम्भ्रियमाणोव्वायुःपूयमानःशुक्रःपूतःशुक्रःक्षीरश्श्रीर्म्मन्थीसक्तुश्श्रीर्व्विश्श्वेदेवाः॥ ॐ व्विश्श्वेदेवाश्श्चमसेषून्नीतोसुर्होमायोद्यतोरुद्रोहूयमानोव्वातोब्भ्यावृत्तोनृचक्षाःप्प्रतिक्ख्यातोभक्षोभक्ष्यमाणःपितरोनाराशᳬसाःसन्नःसिन्धुः॥ ॐ व्विश्श्वेदेवाःश्रृणुतेमᳬहवम्मेयेऽअन्तरिक्क्षेयऽउपद्यविष्ठ॥ येऽअग्ग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम्॥

पितृणां ध्यानम्—

ॐ उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि॥ उशन्नुशतऽआवहपितृन्हविषेऽअत्तवे॥ ॐ आयन्तुनःपितरःसोम्म्यासोऽग्निष्वात्ताःपथिभिर्द्देवयानैः॥ अस्मिन्न्यज्ञेस्वधयामदन्तोधिब्ब्रुवन्तुतेवन्त्वस्मान्॥

मातृपितामहिप्रपितामह्यावाहनम्—(माता-दादी और वृद्धदादी का ध्यान करे)

ॐ अत्रपितरोमादयद्ध्वँय्यथाभागमावृषायद्ध्वम्॥ अमीमदन्तपितरोयथाभागमावृषायिषत॥ ॐ नमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्न्यवेनमोवःपितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदेष्मैतद्वःपितरोव्वासः॥ आधत्तपितरोगर्ब्भङ्कुमारम्पुष्करस्रजम्॥ यथेहपुरुषोसत्॥ ऊर्ज्जंव्वहन्तीरमृतंघृतम्पयःकीलालम्परिस्रुतम्॥ स्वधास्त्थतर्प्पयतमेपितृन्॥

पितृपितामहप्रपितामहानामावाहनम्—(पिता-दादा और परदादा का ध्यान करे)

ॐ उदीरतामवरऽउत्परासऽउन्मद्ध्यमाःपितरःसोम्म्यासः॥ असुँय्यऽईयुरव्वृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु॥ ॐ अङ्गिरसोनःपितरोनवग्ग्वाऽअथर्व्वाणोभृगवःसोम्म्यासः॥ तेषांव्वयꣳसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम॥ ॐ आयन्तुनःपितरःसोम्म्याऽसौग्ग्निष्वात्ताःपथिभिर्द्देवयानैः॥ अस्मिन्यज्ञेस्वधयामदन्तोधिब्ब्रुवन्तुतेवन्त्वस्मान्॥ ॐ ऊर्ज्जंव्वहन्तीरमृतंघृतम्पयःकीलालम्परिस्रुतम्॥ स्वधास्त्थतर्प्पयतमे पितृन्॥ ॐ पितृब्भ्यःस्वधायिब्भ्यःस्वधानमः पितामहेब्भ्यःस्वधायिब्भ्यःस्वधानमःप्प्रपितामहेब्भ्यःस्वधायिब्भ्यःस्वधानमः॥ अक्षन्न्पितरोऽमीमदन्तपितरोतीतृपन्तपितरःपितरःशुन्धद्ध्वम्॥ ॐ येचेहपितरोयेचनेहयाँश्श्चव्विद्मयाँ२॥ऽउचनप्प्रविद्म॥ ॐ मधुव्वाताऽऋतायतेमधुक्क्षरन्तिसिन्धवः॥ माद्ध्वीन्नःसन्त्वोषधीः॥ ॐ मधुनक्तमुतोषसोमधुमत्त्पार्त्थिवꣳरजः॥ मधुद्यौरस्तुनःपिता॥ ॐ मधुमान्नोव्वनस्प्पतिर्म्मधुमाँऽअस्तुसूर्य्यः॥ माद्ध्वीर्ग्गावोभवन्तुनः॥

मातामहप्रमातामहवृद्धप्रमातामहानामावाहनम्—(नाना-परनाना और वृद्धपरनाना का ध्यान करे)

ॐ पितृब्भ्यःस्वधायिब्भ्यःस्वधानमःपितामहेब्भ्यःस्वधायिब्भ्यःस्वधानमःप्प्रपितामहेब्भ्यःस्वधायिब्भ्यःस्वधानमः॥ अक्षन्न्पितरोऽमीमदन्तपितरोऽतीतृपन्तपितरःपितरःशुन्धद्ध्वम्॥

पाद्यसमर्पणम्—सभी के कुशाओं पर जल प्रदान करे।

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः।

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्रा अस्मत् मातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः।**

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्र अस्मत् पितृपितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः।**

ॐ अमुक (अपने नाना का गोत्र उच्चारित करे) **गोत्र अस्मत् मातामहप्रमातामह-वृद्धप्रमातामहाः सपत्निकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः।**

आसनदानम्—कुश का बना मोटक रूप आसन प्रदान करे।

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः नान्दीश्राद्धे क्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः।

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्रा अस्मन्मातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः नान्दीश्राद्धे क्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः।**

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्र अस्मत् पितृपितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः नान्दीश्राद्धे क्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः।**

ॐ अमुक (अपने नाना का गोत्र उच्चारित करे) **गोत्र अस्मन्मातामहप्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः नान्दीश्राद्धे क्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः।**

आसनदान के बाद षोडशोपचार पूजन करे।

षोडशोपचारपूजनम्—मौन होकर सामग्री चढ़ाकर गन्धादिदान का सङ्कल्प करे।

इदं स्नानीयं सुस्नानीयम्। स्नान के लिए जल प्रदान करे।

इदमाचमनीयं स्वाचमनीयम्। आचमनीय जल प्रदान करे।

इदं वस्त्रं सुवस्त्रम्। वस्त्र प्रदान करे।

इदमाचमनीयं स्वाचमनीयम्। आचमनीय जल प्रदान करे।

इमे यज्ञोपवीते सुयज्ञोपवीते। यज्ञोपवीत प्रदान करे।

इदमाचमनीयं स्वाचमनीयम्। यज्ञोपवीताङ्गाचमनीय जल प्रदान करे।

एष गन्धः सुगन्धः। चन्दन प्रदान करे।

इमे तिलाक्षताः सुतिलाक्षताः। अक्षत प्रदान करे।

इदं माल्यं सुमाल्यम्। पुष्पमाला प्रदानकर नैवेद्य स्थापित करे।

एष धूपः सुधूपः। धूप आघ्रापितकर प्रदान करे।

एष दीपः सुदीपः। दीप दिखाकर प्रदान करे।

हस्तप्रक्षालनम्। दोनों हाथ प्रक्षालित करे।

इदं नैवेद्यं सुनैवेद्यम्। नैवेद्य प्रदान करे।

इदमाचमनीयं स्वाचमनीयम्। आचमनीय जल प्रदान करे।

इदं ऋतुफलं सुफलम्। ऋतुफल प्रदान करे।

इदमाचमनीयं स्वाचमनीयम्। आचमनीय जल प्रदान करे।

इदं ताम्बूलं सुताम्बूलम्। ताम्बूल प्रदान करे।

एषा दक्षिणा सुदक्षिणा। दक्षिणा प्रदान करे।

इदं पुष्पाञ्जलि सुपुष्पाञ्जलि। पुष्पाञ्जलि प्रदान करे।

गन्धाद्यार्चनदानम्—

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धपुष्पधूपदीपनैवेद्यदक्षिणाद्यार्चनं स्वाहा सम्पद्यतां वृद्धिः।

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्रा अस्मन्मातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं गन्धपुष्पधूपदीपनैवेद्यदक्षिणाद्यार्चनं स्वाहा सम्पद्यतां वृद्धिः।**

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्र अस्मत् पितृपितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धपुष्पधूपदीपनैवेद्यदक्षिणाद्यार्चनं स्वाहा सम्पद्यतां वृद्धिः।**

ॐ अमुक (अपने नाना का गोत्र उच्चारित करे) **गोत्र अस्मन्मातामहप्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धपुष्पधूपदीपनैवेद्यदक्षिणाद्यार्चनं स्वाहा सम्पद्यतां वृद्धिः।**

भोजननिष्क्रयदानम्—सभी के आसनों पर भोजन के निमित्त मूल्य रखे।

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मण भोजनपर्याप्ताऽऽमान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेण स्वाहा सम्पद्यतां वृद्धिः।

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्रा अस्मन् मातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्ताऽऽमान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेण स्वाहा सम्पद्यतां वृद्धिः।**

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्र अस्मन् पितृपितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्ताऽऽमान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः।**

ॐ अमुक (अपने नाना का गोत्र उच्चारित करे) **गोत्र अस्मन् मातामहप्रमातामह वृद्धप्रमातामहाः सपत्निकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजन पर्याप्ताऽऽमान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः।**

सक्षीरयवमुदकदानम्—अर्घ्यपात्र में दूध-जौ-जल मिश्रित करके प्रदान करे।

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः प्रीयन्ताम्।

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्रा अस्मन्मातृपितामहीप्रपितामह्यः नान्दीमुख्यः प्रीयन्ताम्।**

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्र अस्मत् पितृपितामहप्रपितामहाः नान्दीमुखाः प्रीयन्ताम्।**

ॐ अमुक (अपने नाना का गोत्र उच्चारित करे) **गोत्र अस्मन्मातामहप्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः प्रीयन्ताम्।**

पुनः पूजनम्—चारों जगहों पर जल, पुष्प तथा अक्षत समर्पित करे।

शिवा आपः सन्तु। बोलकर जल प्रदान करे।

सौमनस्यमस्तु। बोलकर पुष्प प्रदान करे।

अक्षतं चारिष्टं चास्तु। बोलकर अक्षत प्रदान करे।

अघोरकरणम्—चारों जगहों पर पूर्वाग्र जलधारा प्रदान करे।

ॐ अघोराः पितरः सन्तु।

दक्षिणादानम्—सभी के लिए आसनों पर दक्षिणा प्रदान करे।

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठा सिद्ध्यर्थं द्राक्षाऽऽमलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे।

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्रा अस्मन्मातृपितामहीप्रपितामह्यः नान्दीमुख्यः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षाऽऽमलकयवमूल-निष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे।**

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्र अस्मत् पितृपितामहप्रपितामहाः नान्दीमुखाः कृतस्यनान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षाऽऽमलकयवमूल-निष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे।**

ॐ अमुक (अपने नाना का गोत्र उच्चारित करे) **गोत्र अस्मन्मातामह प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः कृतस्यनान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षाऽऽमलकयवमूल निष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे।**

यजमान प्रार्थना करे—यजमान अपने पितरों से हाथ जोड़ कर प्रर्थना करे।

ॐ गोत्रन्नो वर्धतां दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च।
श्रद्धा च नो मा व्यगमद् बहुदेयं च नोऽस्तु॥
अन्नं च नो बहु भवेदतिथींश्च लभेमहि।
याचितारश्च नः सन्तु मा च याचिष्मकञ्चन॥

गोत्रन्नो वर्धतां (हमारा कुल बढ़े), दातारो नोऽभिवर्धन्तां (उस गोत्र में दाता और भी बढ़ें), वेदाः सन्ततिरेव च (हमारी सन्तति ज्ञानवान् हो), श्रद्धा च नो मा व्यगमद् (वे सभी श्रद्धावान् हों), बहुदेयं च नोऽस्तु (उनके पास दान देने के लिए बहुत धन-धान्यादि हो), अन्नं च नो बहु भवेत् (उनके पास अन्नादि बहुत हो), अतिथींश्च लभेमहि (उनके पास दान लेने के लिए बहुत अतिथि आयें), याचितारश्च नः सन्तु (दान लेने के लिए याचक भी आयें), मा च याचिष्मकञ्चन (हमारे कुल में कोई भी याचक न हो)। (हमारा कुल बढ़े, सभी दाता हों और वें अत्यधिक बढ़े, हमारे कुल की समस्त सन्तान ज्ञानवान् हो, सभी श्रद्धावान् तथा आदर करनेवाले हो, वे कभी किसी का निरादर न करे, उनके पास अतिथि तथा याचक आयें जिन्हें दान देकर गौरव प्राप्त करें, हमारे कुल में कोई याचक न हो।)

एताः सत्या आशिषः सन्तु॥

ब्राह्मण बोलें—**सन्त्वेताः सत्या आशिषः।**

ॐ उपास्म्मैगायतानरः पवमानायेन्न्दवे॥ अभिदेवाँ२॥इयक्षते॥ ॐ इडामग्ग्ने पुरुदꣳसꣳसनिंगोःशश्श्वत्तमꣳहवमानायसाध॥ स्यान्नःसूनुस्तनयोव्विजावाग्ग्नेसातें सुमतिर्भूत्वस्मे॥

यजमान बोले—**नान्दीश्राद्धं सुसम्पन्नम्।**

ब्राह्मण बोलें—**सुसम्पन्नम्।**

विसर्जनम्—मातृ-पितामही-प्रपितामही, पिता-पितामह-प्रपितामह तथा सपत्नीक मातामह-प्रमातामह-वृद्धप्रमातामह के सहित आसन के ऊपर यवाक्षत छिड़ककर विसर्जन करे।

ॐ व्वाजेवाजेऽवतव्वाजिनोनोधनेषुविप्प्राऽअमृताऽऋतज्ञाः॥ अस्यमद्ध्वःपिबत मादयद्ध्वंतृप्तायात्तपथिभिर्देवयानैः॥ ॐ आ मा व्वाजस्यप्प्रसवोजगम्म्यादेमेद्यावा पृथिवीव्विश्श्वरूपे॥ आ मा गन्तां पितरामातरा चा मा सोमोऽअमृतत्वेन गम्म्यात्॥

विश्वेदेव का विसर्जजन करे—**ॐ विश्वेदेवाः प्रीयन्ताम्।**

यजमान बोले—**मयाऽऽचरिते साङ्कल्पिकेन विधिना नान्दीश्राद्धे न्यूनातिरिक्तो यो विधिः स उपविष्ट ब्राह्मणानां वचनात् श्रीगणेशप्रसादाच्च परिपूर्णोऽस्तु।**

ब्राह्मण बोले—**अस्तु परिपूर्णः।**

समर्पणम्—अनेन साङ्कल्पिकेन विधिना नान्दिश्राद्धकृतेन पितृस्वरूपीमहाविष्णुः प्रीयतां न मम।

नान्दीश्राद्धं परिपूर्णम्

●

आचार्यादिवरणम्

वरण-सामग्री के पूजन के साथ सर्व प्रथम आचार्य का पूजन करके उनका वरण करे पश्चात् ब्रह्मादि का पूजन-वरण करे।

ॐ वरणसामग्रीभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

एकतन्त्रेण आचार्यादिब्राह्मणानां वरणानि—यजमान बोले।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकामुकगोत्रोत्पन्नान् अमुकामुकप्रवरान्वितां शुक्लयजुर्वेदान्तर्गतवाजसनेयमाध्यन्दिनीयशाखाध्यायिनां अमुकामुकशर्मणां ब्राह्मणानां अस्मिन् महाविद्यापुरश्चरणकर्मणि एभिःकरोपस्थितवरणद्रव्यैः आचार्यत्वेन ब्रह्मत्वेन उपद्रष्टात्वेन गाणपत्यत्वेन सदस्यत्वेन ऋत्विक्त्वेन युष्मान् वृणे।**

आचार्यादि बोले—**वृता स्मः।**

एक साथ वरण न करना चाहे तो अलग-अलग वरण करे, शास्त्रानुसार अलग-अलग ही करना चाहिए।

आचार्यवरणम्—यजमान बोले।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गतवाजसनेयमाध्यन्दिनीयशाखाध्यायिनममुकशर्माणं ब्राह्मणं अस्मिन् महाविद्यापुरश्चरणकर्मणि एभिःकरोपस्थितवरणद्रव्यैः आचार्यत्वेन त्वामहं वृणे।**

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे।

आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः।
तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत!॥

जिस तरह से स्वर्ग में इन्द्रादि देवताओं के आचार्य बृहस्पति हैं उसी तरह से आप मेरे इस यज्ञ के आचार्य पद पर प्रतिष्ठित हों।

आचार्य बोले—**वृतोऽस्मि।**

ब्रह्मावरणम्—यजमान बोले।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेयमाध्यन्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् महाविद्यापुरश्चरणकर्मणि एभिःकरोपस्थितवरणद्रव्यैः ब्रह्मत्वेन त्वामहं वृणे।**

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे।

यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः।
तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम!॥

जैसे सभी लोक के पितामह चतुर्मुख ब्रह्मा हैं, उसी प्रकार मेरे इस यज्ञ के लिए हे द्विजोत्तम! आप ब्रह्मा पद प्रतिष्ठित हों।

ब्रह्मा बोले—**वृतोऽस्मि।**

उपद्रष्टावरणम्—यजमान बोले।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेयमाध्यन्दिनीयशाखाध्यायिनममुकशर्माणं ब्राह्मणं अस्मिन् महाविद्या-पुरश्चरणकर्मणि एभिःकरोपस्थितवरणद्रव्यैः उपद्रष्टात्वेन त्वामहं वृणे।**

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे।

भगवन् सर्वधर्मज्ञ सर्वधर्मपरायण!।
वितते मम यज्ञेऽस्मिन्नुपद्रष्टा भव द्विज!॥

हे भगवन् हे सभी धर्म को जाननेवाले द्विजोत्तम! सभी धर्म में परायण हमारे इस यज्ञ में उपद्रष्टा पद पर प्रतिष्ठित हों।

उपद्रष्टा बोले—**वृतोऽस्मि।**

गाणपत्यवरणम्—यजमान बोले।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत-वाजसनेयमाध्यन्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् महाविद्या-पुरश्चरणकर्मणि एभिःकरोपस्थितवरणद्रव्यैः गाणपत्यत्वेन त्वामहं वृणे।**

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे।

वाञ्छितार्थफलावाप्त्यै पूजितोऽसि सुराऽसुरैः।
निर्विघ्नं क्रतुसंसिद्ध्यै त्वामऽहं गणपं वृणे॥

वाञ्छित कामना के निर्विघ्नतापूर्वकफलप्राप्ति के लिए देवता-दानव सर्वप्रथम पूजा करते हैं, हे द्विजश्रेष्ठ! हम आपका गणपपद पर वरण करते हैं।

गणप बोले—**वृतोऽस्मि।**

सदस्यवरणम्—यजमान बोले।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत-**

वाजसनेयमाध्यन्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् महाविद्यापुरश्चरणकर्मणि एभिःकरोपस्थितवरणद्रव्यैः सदस्यत्वेन त्वामहं वृणे।

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे।

भगवन् सर्वधर्मज्ञ सर्वधर्मभृतांवर।
वितते मम यज्ञेऽस्मिन् सदस्यो भव सुव्रत!॥

हे भगवन् हे सभी धर्म को जाननेवाले द्विजोत्तम! सभी धर्म में परायण हमारे इस यज्ञ में सदस्य पद पर प्रतिष्ठित हों।

सदस्य बोले—**वृतोऽस्मि।** अधिक सदस्य ब्राह्मण हों तो **वृतास्मः** बोलें।

ऋत्विक्वरणम्—यजमान बोले।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गतवाजसनेयमाध्यन्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् महाविद्यापुरश्चरणकर्मणि एभिःकरोपस्थितवरणद्रव्यैः ऋत्विक्त्वेन त्वामहं वृणे।**

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे।

भगवन् सर्वधर्मज्ञ सर्वधर्मपरायण!।
वितते मम यज्ञेऽस्मिन्नृत्विक्त्वं मे मखे भव॥

हे भगवन् हे सभी धर्म को जाननेवाले द्विजोत्तम! सभी धर्म में परायण हमारे इस यज्ञ में ऋत्विक् पद पर प्रतिष्ठित हों।

ऋत्विक् बोलें—**वृतोऽस्मि।**

यजमान हाथ जोड़ करके सभी ब्राह्मणों से निवेदन करें।

अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः।
ग्रहध्यानरताः नित्यं प्रसन्नमनसः सदा॥१॥

क्रोध का परित्याग करके, नित्य शुद्धता का आचरण करते हुए, हमेशा ब्रह्मचारी रह कर, ग्रहादि के ध्यान में सदैव रत रहते हुए, सदैव ही प्रसन्न मन रहते हुए॥१॥

अदुष्टभक्षणाः सन्तु मा सन्तु परनिन्दकाः।
मामऽपि नियमा ह्येते भवन्तु भवतामपि॥२॥

सदैव अपशब्द का परित्याग करके, सुन्दर मधुर भाषण करते हुए, दूसरों की निन्दादि करने की आदत का परित्याग करके, कर्म में प्रवृत्त रहने के लिए जो हमारे लिए शास्त्रीय नियम हैं, वे सभी नियम आप सभी द्विजश्रेष्ठों के लिए भी हों।२॥

ऋत्विजश्च यथा पूर्वं शक्रादीनां मखेऽभवन्।
यूयं तथा मे भवत ऋत्विजो द्विजसत्तमाः॥३॥

पूर्व में इन्द्रादि देवताओं के यज्ञ में ऋत्विकादि थे, वैसे ही इस यज्ञ में भी आप सभी ऋत्विक् हों॥३॥

अस्मिन् कर्मणि ये विप्राः वृता गुरुमुखादयः।
सावधानाः प्रकुर्वन्तु स्वं स्वं कर्म यथोदितम्॥४॥

इस कर्म में प्रवृत्त जो विप्रादि मेरे द्वारा नियुक्त हैं, वे जो कुछ अपने गुरुओं के मुख से सीखे जाने हैं, उसी अनुसार अपने अपने कर्म में प्रवृत्त रहकर इस यज्ञ का सम्पादन करें॥४॥

अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया।
सुप्रसन्नैः प्रकर्तव्यं कर्मेदं विधिपूर्वकम्॥५॥

इस यज्ञकर्म के लिए हमने आपका वरण किया है, आप सुप्रसन्न मन से इस यज्ञ के कर्म को विधिपूर्वक सम्पादित करें॥५॥

यजमान बोले—**यथा विहितं कुरुध्वम्।**

विप्र बोले—**यथा ज्ञानं करवामः।**

आचार्यादि वरण के बाद आचार्य कर्म दिगरक्षण प्रोक्षण करे।

आचार्यादिवरणं परिपूर्णम्

◆

दिग्रक्षणम्

आचार्य आचमन-प्रणायाम करके सङ्कल्पपूर्वक दिग्रक्षण करे।

सङ्कल्पः—**ॐ विष्णुः-विष्णुः-विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीयपरार्द्धे विष्णुपदे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमेयुगे कलियुगे कलि प्रथमचरणे भूर्लोके भारतवर्षे भरतखण्डे आर्यावर्तैक देशे** (वाराणसी में कर्मकाण्ड करना हो तो **वाराणसीक्षेत्रे महाश्मशाने त्रिकंटकविराजिते भागीरथ्याः पश्चिमे तीरे**) **विक्रमशके बौद्धावतारे अमुक नाम संवत्सरे अमुकायने अमुकऋतौ महामाङ्गल्यप्रदमासोत्तमे मासे पुण्यपवित्रमासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते श्रीचन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते श्रीदेवगुरौ शेषेषु ग्रहेषु यथायथा राशिस्थानस्थितेषु सत्सु एवं ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकशर्मा नामाऽहं अस्मिन् महाविद्यापुरश्चरणे अमुकगोत्र अमुकनामधेय यजमानेन वृतोऽहम् आचार्य कर्म करिष्ये।** आचार्य पीले सरसों से रक्षोघ्न कर्म करें।

ॐ र॒क्षो॒हणंव्वलग॒हनंव्वैष्ण॒वीमि॒दम॒हंतंव्वल॒गमुत्किरामि॒यंमे॒निष्ट्यो॒यम॒मात्यो निच॒खाने॒दम॒हंतंव्वल॒गमुत्त्किरामि॒यंमैसमा॒नोयमसमानोनिच॒खाने॒दम॒हंतंव्वल॒गमुत्किरामि॒ यंमे॒सबन्धुर्य्य॒मसबन्धुर्निच॒खाने॒दम॒हंतंव्वल॒गमुत्किरामि॒यम्मैसजा॒तोयमसजातो निच॒खानोत्कृत्यांकिरामि॥१॥ आचार्य पूर्वदिशा में पीले सरसों का प्रक्षेप करें।

ॐ र॒क्षो॒हणोवोव्वलग॒हन॒ᳩप्प्रोक्षामिव्वैष्ण॒वान्न्रक्षो॒हणोवोव्वलग॒हनोऽवनयामि व्वैष्ण॒वान्न्रक्षो॒हणोवोव्वलग॒हनोऽवस्तृणामिव्वैष्ण॒वान्न्रक्षो॒हणौवांव्वलग॒हना॒ऽउपदधामि व्वैष्ण॒वीरक्षो॒हणौ वां व्वलग॒हनौ॒पर्य्यूहामिव्वैष्ण॒वीव्वैष्ण॒वमसिव्वैष्ण॒वास्त्थ॥२॥ आचार्य दक्षिणदिशा में पीले सरसों का प्रक्षेप करें।

ॐ रक्षसांभा॒गो॒ऽसि॒निरस्त॒ᳩरक्षऽइदम॒हᳩरक्षो॒ऽभितिष्ठामी॒दमहु॒ᳩरक्षोऽवबाधऽइद म॒ᳩरक्षोऽध॒मन्तमोनयामि॥ घृतेनद्यावापृथिवी॒प्प्रोर्णुवाथां॒व्वायो॒व्वेस्तो॒कानाम॒ग्नि राज्ज्यस्यव्वे॒तुस्वाहा॒स्वाहाकृतेऽऊ॒र्ध्वनभसम्मारु॒तङ्गच्छतम्॥३॥ आचार्य पश्चिमदिशा में पीले सरसों का प्रक्षेप करें।

ॐ र॒क्षो॒हाव्वि॒श्श्वचर्षणिर॒भियोनि॒मयोहते॥ द्रोणेस॒धस्थ॒मासदत्॥४॥ आचार्य उत्तरदिशा में पीले सरसों का प्रक्षेप करें।

ॐ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥

जो भूत-प्रेतादि इस स्थान का आश्रय लेकर निवास करते हैं, वे सभी इस स्थान का परित्याग करके इधर-उधर कहीं पर भी अन्यत्र चले जायें। अग्निकोण में पीले सरसों का प्रक्षेप करें।

ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥

जो भूत-प्रेतादि इस भूमि में स्थित हैं, वो सभी इस स्थान से कहीं पर भी अन्यत्र चले जाये, जो भूत-प्रेतादि विघ्न करनेवाले हैं, वे सभी भगवान् शिव की आज्ञा से अन्यत्र चले जायें; अन्यथा नष्ट हो जायें, नैर्ऋत्य कोण में पीले सरसों का प्रक्षेप करें।

ॐ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्।
सर्वेषामविरोधेन पूजाकर्म समारभे॥

इस स्थान के सभी दिशाओं में जो भूत-प्रेतादि पिशाचों का वास है, वे सभी विना विरोध के इस स्थान का परित्याग करके चले जायें, हम पूजा कर्म का प्रारम्भ कर रहे हैं। वायव्यकोण में पीले सरसों का प्रक्षेप करें।

ॐ भूतानि राक्षसा वाऽपि येऽत्र तिष्ठन्ति केचन।
ते सर्वेऽप्यपगच्छन्तु पुरश्चरणं करोम्यहम्॥

जो कोई भूतगण, राक्षसगण इस स्थान का आश्रय लेकर निवास करते हैं, वे सभी

इस स्थान को छोडकर अन्यत्र कही चले जायँ, जिससे हम निर्विघ्न पुरश्चरण करें। ईशान कोण में पीले सरसों का प्रक्षेप करें।

ॐ हुँ फट्। ऊपर ऊर्ध्वदिशा में पीले सरसों का प्रक्षेप करें।

ॐ हुँ फट्। अधोदिशा भूमि पर नीचे पीले सरसों का प्रक्षेप करें।

चारो तरफ क्रोध मयी दृष्टि डाल कर चारो तरफ के विघ्नों का निस्सारण करे, तथा तीन बार पैर की एड़ी से भूमि पर प्रहार करके भूमिस्थित विघ्नकर्ताओं से रक्षार्थ विघ्नों का निस्सारण करें।

आचार्यकर्म रक्षोघ्नकर्मदिग्रक्षणञ्च परिपूर्णम्

●

पञ्चगव्यकरणम्

ॐ गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह॥ ब्बृहत्युष्णिहाककुप्सूचीभिः शम्म्यन्तुत्त्वा॥ आचार्य इस मन्त्र से गोमूत्र स्थापित करें।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ आचार्य इस मन्त्र से गोमय मिश्रित करें।

ॐ आप्प्यायस्वसमेतुतेव्विश्श्वतःसोमव्वृष्ण्ण्यम्॥ भवाव्वाजस्यसङ्गथे॥ आचार्य इस मन्त्र से गोदुग्ध मिश्रित करें।

ॐ दधिक्क्राब्ण्णोऽअकारिषञ्जिष्ष्णोरश्श्वस्यव्वाजिनः॥ सुरभिनोमुखाकरत्त्प्रणऽ आयूꣳषितारिषत्॥ आचार्य इस मन्त्र से दही मिश्रित करें।

ॐ तेजोऽसिशुक्क्रमस्यऽमृतमसिधामनामाऽसिप्प्रियंदेवानामनाधृष्ष्टन्देवयजनमसि॥ आचार्य इस मन्त्र से गोघृत मिश्रित करें।

ॐ देवस्यत्वासवितुःप्प्रसवेऽश्श्विनोर्ब्बाहुभ्यांपूष्ष्णोहस्ताभ्याम्॥ इस मन्त्र से कुशोदक मिश्रित करके यज्ञकाष्ठ से आलोडित करें।

ॐ आपोहिष्ष्ठामयो भुवस्तानऽऊर्ज्जेदधातन॥ महेरणायचक्षसे॥ योवःशिवतमोरसस्तस्यभाजयतेहनः॥ उशतीरिवमातरः॥ तस्म्माऽअरङ्गमामवोयस्यक्षयायजिन्न्वथ॥ आपोजनयथाचनः॥

पञ्चगव्य निर्माण के बाद अपवित्रः पवित्रोवा० मन्त्र से तीन बार यज्ञभूमि तथा यज्ञ-सामग्री का मार्जन प्रोक्षण करें फिर अञ्जली बनाकर स्वस्त्यवाचन दो बार करें।

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ स्वुस्तिनुऽइन्द्रोवृद्धश्श्रवाꣳस्वुस्तिनः पूषाविश्श्ववेदाꣳ ।। स्वुस्तिनुस्ताक्ष्योंऽ अरिंष्टनेमिꣳस्वुस्तिनोबृहुस्प्पतिर्द्दधातु।। इस मन्त्र का दो बार पाठ करें।

देवाः आयान्तु।। यातुधानाः अपयान्तु।। विष्णोर्देव भूम्यमिमं रक्षस्व।।

आचार्यकर्म पञ्चगव्यकरणं परिपूर्णम्

●

सर्वतोभद्रचक्रः



किसी चौकोर चौकी पर कपडा बिछाकर अष्टादश कोष्ठक बनाकर चित्रानुसार विभिन्न रंगों से रञ्जित चावलादि रखकर उस पर नियत स्थान पर सुपाड़ी रखकर सर्वतोभद्रमण्डल के देवताओं का आवाहन-पूजन करे।

सर्वतोभद्रदेवतानां स्थापनम्

ब्रह्मावाहनम्—ॐ ब्रह्मजज्ज्ञानम्प्रथुमम्पुरस्त्ताद्विसीमुतःसुरुचोंवेनऽआवः ।। सबुद्धन्या॒ऽउपुमाऽअंस्यविुष्ठाःसुतश्श्चयोनिमसंतश्श्चुविवः ।।

ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि।

सोममावाहनम्—**ॐ व्व॒यꣳसो॑मव्व्र॒तेत॒वमन॑स्त॒नूषु॒बिब्भ्र॑तꣳ ॥ प्र॒जाव॑न्तꣳसचेमहि ॥**

ॐ भूर्भुवः स्वः सोमाय नमः सोममावाहयामि स्थापयामि।

ईशानमावाहनम्—**ॐ तमीशा॑न॒ञ्जग॑तस्त॒स्त्थुष॒स्प्पतिं॑धियञ्जि॒न्न्वमव॑सेहूमहेव्व॒यम् ॥ पू॒षानो॒यथा॒व्वेद॑सा॒मस॑द्वृ॒धेर॑क्षि॒तापा॒युरद॑ब्धये॑ ॥**

ॐ भूर्भुवः स्वः ईशानाय नमः ईशानमावाहयामि स्थापयामि।

इन्द्रमावाहनम्—**ॐ त्रा॒तार॒मिन्द्र॑मवि॒तार॒मिन्द्र॒ꣳहवे॑हवेसु॒हव॒ꣳशूर॒मिन्द्र॑म् ॥ ह्वया॑मिश॒क्रम्पु॑रुहू॒तमिन्द्र॑ꣳस्व॒स्तिनो॑म॒घवा॑धा॒त्त्विन्द्रः॑ ॥**

ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि।

अग्न्यामावाहनम्—**ॐ त्वन्नो॑ऽअग्ग्ने॒तव॑पा॒युभि॒र्म्म॒घोनो॑रक्षत॒न्न्व॒श्श्च॑वन्द्य ॥ त्रा॒तातो॒कस्य॒तन॑ये॒गवा॑म॒स्यनि॑मेष॒ꣳरक्ष॑माण॒स्तव॑व्व्र॒ते ॥**

ॐ भूर्भुवः स्वः अग्नये नमः अग्निमावाहयामि स्थापयामि।

यममावाहनम्—**ॐ य॒माय॒त्त्वाङ्गि॑रस्वतेपितृ॒मते॒स्वाहा॑ ॥ स्वाहा॑घ॒र्म्माय॒स्वाहा॑ घ॒र्म्मः॑पि॒त्रे ।**

ॐ भूर्भुवः स्वः यमाय नमः यममावाहयामि स्थापयामि।

निर्ऋतिमावाहनम्—**ॐ असु॑न्न्वन्त॒मय॑जमानमिच्च्छस्ते॒नस्ये॒त्यामन्न्वि॑हि॒तस्क॑रस्य ॥ अ॒न्न्यम॒स्म्मदि॑च्च्छ॒सात॑ऽइ॒त्यान॑मोदेविनिर्ऋते॒तुब्भ्य॑मस्तु ॥**

ॐ भूर्भुवः स्वः निर्ऋतये नमः निर्ऋतिमावाहयामि स्थापयामि।

वरुणमावाहनम्—**ॐ तत्त्वा॑यामि॒ब्ब्रह्म॑णा॒व्वन्द॑मान॒स्तदाशा॑स्ते॒यज॑मानोह॒विर्ब्भिः॑ ॥ अहे॑डमानोव्वरुणे॒हबो॒द्ध्युरु॑शꣳस॒मान॒ऽआयु॒ꣳप्प्रमो॑षीꣳ ॥**

ॐ भूर्भुवः स्वः वरुणाय नमः वरुणमावाहयामि स्थापयामि।

वायुमावाहनम्—**ॐ आनो॑नि॒युद्भिः॑श॒तिनी॑भिरध्व॒रꣳस॑ह॒स्रिणी॑भि॒रुप॑याहिय॒ज्ञम् ॥ व्वायो॑ऽअ॒स्म्मिन्त्सव॑नेमादयस्वयू॒यम्पा॑तस्व॒स्तिभि॒ः सदा॑नः ॥**

ॐ भूर्भुवः स्वः वायवे नमः वायुमावाहयामि स्थापयामि।

अष्टवसूनावाहनम्—**ॐ व्वसु॑ब्भ्यस्त्वारु॒द्द्रेब्भ्य॑स्त्वाऽऽदि॒त्येब्भ्य॑स्त्वा॒सञ्जा॑नाथां द्यावापृथि॒वीमि॒त्रावरु॑णौत्वा॒वृष्ट्या॑वताम् ॥ व्यन्तु॒व्वयो॒क्तꣳरिहा॑णाम॒रुता॒म्पृष॑तीर्ग्गच्छ व्व॒शापृश्श्नि॑र्ब्भू॒त्वादि॒वङ्गच्छ॒ततो॑नो॒वृष्टि॒मावह ॥ च॒क्षु॒ष्प्पाऽअ॑ग्ग्नेऽसि॒चक्षु॑र्म्मेपाहि ॥**

ॐ भूर्भुवः स्वः अष्टवसुब्भ्यो नमः अष्टवसूनावाहयामि स्थापयामि।

एकादशरुद्रानावाहनम्—**ॐ नम॑स्तेरुद्रम॒न्न्यव॑ऽउ॒तोत॒ऽइष॑वे॒नमः॑ ॥ बा॒हुब्भ्या॑मु॒तते॒ नमः॑ ॥**

ॐ भूर्भुवः स्वः एकादशरुद्रेभ्यो नमः एकादशरुद्रानावाहयामि स्थापयामि।

द्वादशादित्यनावाहनम्—**ॐ य॒ज्ञोदे॒वानां॒प्रत्ये॑तिसु॒म्नमादि॑त्यासो॒भव॑तामृड॒यन्तः॑॥ आवो॒ऽर्व्वाची॑सुम॒तिर्व्व॑वृत्याद॒ꣳहोश्श्चि॒द्याव्वरि॑वो॒वित्त॒रास॑त्॥**

ॐ भूर्भुवः स्वः द्वादशादित्येभ्यो नमः द्वादशादित्यानावाहयामि स्थापयामि।

अश्विनीकुमार-आवाहनम्—**ॐ अ॒श्श्विना॒तेज॑सा॒चक्षुः॑प्प्रा॒णेन॒सर॑स्वतीवी॒र्य्य॑म्॥ व्वा॒चेन्द्रो॒बले॒नेन्द्रा॑यदधुरिन्द्रि॒यम्॥**

ॐ भूर्भुवः स्वः अश्विभ्यां नमः अश्विनौ आवाहयामि स्थापयामि।

सपैतृकविश्वान्देवानावाहनम्—**ॐ विश्श्वे॑देवास॒ऽआग॑तश्शृणु॒ताम॑ऽइ॒मꣳहव॑म्॥ एदं ब॒र्हिर्न्निषी॑दत॥ उ॒प॒या॒मगृ॑हीतोऽसि॒व्विश्श्वे॑ब्भ्यस्त्वादे॒वेब्भ्य॑ऽए॒षते॒योनि॒र्व्विश्श्वे॑ब्भ्यस्त्वा दे॒वेब्भ्यः॑॥**

ॐ भूर्भुवः स्वः सपैतृकविश्वेभ्यो देवेभ्यो नमः सपैतृकविश्वान्देवानावाहयामि स्थापयामि।

सप्तयक्षानावाहनम्—**ॐ अ॒भित्यंदे॒वꣳस॑वि॒तार॑मो॒ण्योः॑क॒विक्क्र॑तु॒मर्च्चा॑मिस॒त्त्य स॑वꣳरत्क॒धाम॒भिप्प्रि॒यंम॒तिंक॒विम्॥ ऊ॒र्द्ध्वायस्या॒ऽमति॒र्भाऽअदि॑द्युत॒त्सवी॑मनि॒हिर॑ण्य पाणिरमिमीतसु॒क्क्रतुः॑कृ॒पास्वः॑॥ प्र॒जाब्भ्य॑स्त्वाप्प्र॒जास्त्वा॑नु॒प्प्राण॑न्तुप्र॒जास्त्वम॑नु॒ प्प्राणि॑हि॥**

ॐ भूर्भुवः स्वः सप्तयक्षेभ्यो नमः सप्तयक्षानावाहयामि स्थापयामि।

सर्पानावाहनम्—**ॐ नमो॑स्तुस॒र्प्पेब्भ्यो॒येकेच॑पृथि॒वीमनु॥ येऽअ॒न्तरि॑क्षे॒येदि॒वि तेब्भ्यः॑स॒र्प्पेब्भ्यो॒नम॑ः॥**

ॐ भूर्भुवः स्वः सर्पेभ्यो नमः सर्पानावाहयामि स्थापयामि।

गन्धर्वाऽप्सरसः-आवाहनम्—**ॐ ऋ॒ता॒षाडृ॒तधा॑मा॒ग्निर्ग्गन्ध॒र्व्वस्तस्यौष॑धयोप्प्स॒रसो॒ मुदो॒नाम॑॥ सन॑ऽइ॒दम्ब्रह्म॑क्ष॒त्रम्पा॑तु॒तस्मै॒स्वाहा॒व्वाट्ताब्भ्य॒ःस्वाहा॑॥**

ॐ भूर्भुवः स्वः गन्धर्वाऽप्सरोभ्यो नमः गन्धर्वाऽप्सरसः आवाहयामि स्थापयामि।

स्कन्दमावाहनम्—**ॐ यदक्क्र॑न्दःप्प्रथ॒मंजाय॑मानऽउ॒द्यन्त्स॑मुद्राद्दु॒तवा॒पुरी॑षात्॥ श्ये॒नस्य॑प॒क्षाह॑रि॒णस्य॑ बाहूऽउ॒प॒स्तुत्त्यंमहि॑जा॒तंते॑ऽअर्व्वन्॥**

ॐ भूर्भुवः स्वः स्कन्दाय नमः स्कन्दमावाहयामि स्थापयामि।

वृषभमावाहनम्—**ॐ आ॒शुःशिशा॑नोव्वृष॒भोनभी॒मोघ॑नाघ॒नःक्षोभ॑णश्श्चर्षणी॒नाम्॥ स॒ङ्क्क्रन्द॑नेनाऽनिमि॒षऽए॑कवी॒रःश॒तꣳसेना॑ऽअजयत्त्सा॒कमिन्द्रः॑॥**

ॐ भूर्भुवः स्वः वृषभाय नमः वृषभमावाहयामि स्थापयामि।

शूलमावाहनम्—ॐ कार्षि॑रसिसमुद्रस्य॒त्वाक्षि॑त्या॒ऽउन्न॑यामि॥ समापो॑ऽअ॒द्भि र॑ग्ग्मत॒समोष॑धीभि॒रोष॑धीः॥

ॐ भूर्भुवः स्वः शूलाय नमः शूलमावाहयामि स्थापयामि।

महाकालमावाहनम्—ॐ त्र्य॑म्बकंय्यजामहेसु॒ग॒न्धिंपु॑ष्टि॒वर्द्ध॑नम्॥ उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒माऽमृता॑त्॥

ॐ भूर्भुवः स्वः महाकालाय नमः महाकालमावाहयामि स्थापयामि।

दक्षादिसप्तगणानामावाहनम्—ॐ शु॒क्र॒ज्ज्यो॑तिश्श्च॒चि॒त्रज्ज्यो॑तिश्श्च॒स॒त्य ज्ज्यो॑तिश्श्च॒ज्ज्योति॑ष्माँश्श्च॥ शु॒क्रश्श्च॑ऽऋत॒पाश्श्चात्य॑ꣳहाः॥

ॐ भूर्भुवः स्वः दक्षादिसप्तगणेभ्यो नमः दक्षादिसप्तगणानामावाहयामि स्थापयामि।

दुर्गावाहनम्—ॐ अम्बे॒ऽअम्बि॒केऽम्बा॑लिके॒नमा॑नयति॒कश्श्च॒न॥ सस॑स्त्यश्श्च॒कः सु॒भ॑द्रिकाङ्का॒म्पीलवा॑सिनीम्॥

ॐ भूर्भुवः स्वः दुर्गायै नमः दुर्गामावाहयामि स्थापयामि।

विष्णुमावाहनम्—ॐ इ॒दं वि॒ष्णु॒र्वि च॑क्रमे त्रे॒धा नि द॑धे प॒दम्॥ समू॑ढमस्यपाꣳ सु॒रे स्वाहा॑॥

ॐ भूर्भुवः स्वः विष्णवे नमः विष्णुमावाहयामि स्थापयामि।

स्वधामावाहनम्—ॐ पि॒तृब्भ्य॑ः स्वधा॒यिब्भ्य॑ः स्व॒धा नम॑ः पि॒ता॒म॒हेब्भ्य॑ः स्वधा॒यिब्भ्य॑ः स्व॒धा नम॑ः प्रपि॑तामहेब्भ्यः स्वधा॒यिब्भ्य॑ः स्व॒धा नम॑ः॥ अक्ष॑न्पि॒तरो॑ऽमी॑मदन्त पि॒तरो॑ऽतीतृपन्त पि॒तर॑ः पित॑रः॒ शुन्ध॑द्ध्वम्॥

ॐ भूर्भुवः स्वः स्वधायै नमः स्वधामावाहयामि स्थापयामि।

मृत्युरोगानावाहनम्—ॐ परं॑मृत्यो॒ऽअनु॒परे॑हि॒पन्था॒न्॒य्यस्ते॒ऽअ॒न्य॒ऽइत॑रोदे॒व॒याना॑त्॥ चक्षु॑ष्मतेश्शृण्व॒तेते॑ब्ब्रवीमि॒मान॑ः प्र॒जाꣳरी॑रिषो॒मोतव्वी॒रान्॥

ॐ भूर्भुवः स्वः मृत्युरोगेभ्यो नमः मृत्युरोगानावाहयामि स्थापयामि।

गणपतिमावाहनम्—ॐ ग॒णाना॑न्त्वाग॒णप॑तिꣳहवामहेप्प्रि॒याणा॑न्त्वाप्प्रि॒यप॑तिꣳ हवामहेनिधी॒नान्त्वा॑निधि॒पति॑ꣳहवामहेव्वसोमम॥ आहम॑जानिगब्भ॒र्ध॒मात्त्वम॑जासि गब्भ॒र्धम्॥

ॐ भूर्भुवः स्वः गणपतये नमः गणपतिमावाहयामि स्थापयामि।

अपामावाहनम्—ॐ अ॒प्प्स्व॒ग्ग्ने॒सधि॒ष्ट्वव॒सौष॑धी॒रनु॑रुध्यसे॥ गब्भे॒ सञ्जा॑यसे॒ पुन॑ः॥

ॐ भूर्भुवः स्वः अद्भ्यो नमः अपामावाहयामि स्थापयामि।

मरुतावाहनम्—**ॐ मरुतोयस्यहिक्षयेपाथादिवोव्विमहसः॥ ससुगोपातमोजनः॥**

ॐ भूर्भुवः स्वः मरुद्भ्यो नमः मरुतामावाहयामि स्थापयामि।

पृथ्वीमावाहनम्—**ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी॥ यच्छानःशर्म्मसप्प्रथाः॥**

ॐ भूर्भुवः स्वः पृथिव्यै नमः पृथ्वीमावाहयामि स्थापयामि।

गङ्गादिनद्यावाहनम्—**ॐ पञ्चनद्यःसरस्वतीमपियन्तिसस्रोतसः॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित्॥**

ॐ भूर्भुवः स्वः गङ्गादिनदीभ्यो नमः गङ्गादिनद्यावाहयामि स्थापयामि।

सप्तसागरानावाहनम्—**ॐ समुद्रोऽसिनभस्वार्द्रदानुः॥ शम्भूर्म्मयोभूरभिमाव्वाहिस्वाहा॥ मारुतोऽसिमरुतांगणःशम्भूर्म्मयोभूरभिमाव्वाहिस्वाहा॥**

ॐ भूर्भुवः स्वः सप्तसागरेभ्यो नमः सप्तसागरानावाहयामि स्थापयामि।

मेरुमावाहनम्—**ॐ प्रपर्व्वतस्यवृषभस्यपृष्ठान्नावश्श्चरन्तिस्वसिचऽइयानाः॥ ताऽआवर्व्वृत्रन्नधरागुदक्ताअहिर्म्बुध्न्यमनुरीयमाणाः॥ व्विष्णोर्व्विक्रमणमसिव्विष्णोर्व्विक्रान्तमसिव्विष्णोःक्रान्तमसि॥**

ॐ भूर्भुवः स्वः मेरवे नमः मेरुमावाहयामि स्थापयामि।

गदामावाहनम्—**ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोममआहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम्॥**

ॐ भूर्भुवः स्वः गदायै नमः गदामावाहयामि स्थापयामि।

त्रिशूलमावाहनम्—**ॐ त्रिꣳशद्धामव्विराजतिव्वाक्पतङ्गायधीयते॥ प्रतिवस्तोरहद्युभिः॥**

ॐ भूर्भुवः स्वः त्रिशूलाय नमः त्रिशूलमावाहयामि स्थापयामि।

वज्रमावाहनम्—**ॐ महाँ२॥इन्द्रोव्वज्रहस्तःषोडशीशर्म्मयच्छतु॥ हन्तुपाप्प्मानंयोऽस्मान्द्वेष्टि॥ उपयामगृहीतोऽसिमहेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्वा॥**

ॐ भूर्भुवः स्वः वज्राय नमः वज्रमावाहयामि स्थापयामि।

शक्तिमावाहनम्—**ॐ व्वसुचमेव्वसतिश्श्चमेकर्म्मचमेशक्तिश्श्चमेऽर्थश्श्चमएमश्श्चमइत्याचमेगतिश्श्चमेयज्ञेनकल्पन्ताम्॥**

ॐ भूर्भुवः स्वः शक्तये नमः शक्तिमावाहयामि स्थापयामि।

दण्डमावाहनम्—**ॐ इडऽएह्यदितऽएहिकाम्म्याऽएत॥ मयिवःकामधरणं भूयात्॥**

ॐ भूर्भुवः स्वः दण्डाय नमः दण्डमावाहयामि स्थापयामि।

खड्गमावाहनम्—**ॐ खड्गोव्वैश्श्वदेवःश्श्वाकृष्ष्णःकर्ण्णोगर्द्दभस्तरक्षुस्तेरक्ष**

सामिन्द्रायसूकरःसिꣳहोमारुतःकृकलासःपिप्पकाशकुनिस्तेशरव्यायैविश्वेषांदेवानां पृषतः॥

ॐ भूर्भुवः स्वः खड्गाय नमः खड्गमावाहयामि स्थापयामि।

पाशमावाहनम्—**ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथायअथावय मादित्यव्रतेतवानागसोऽअदितयेस्याम॥**

ॐ भूर्भुवः स्वः पाशाय नमः पाशमावाहयामि स्थापयामि।

अङ्कुशमावाहनम्—**ॐ अꣳशुश्चमेरश्मिश्चमेऽदाभ्यश्चमेऽधिपतिश्चमेऽ उपाꣳशुश्चमेऽन्तर्य्यामश्चमऽऐन्द्रवायवश्चमेमैत्रावरुणश्चमेऽआश्विनश्चमेप्प्रति प्प्रस्थानश्चमेशुक्रश्चमेमन्थीचमेयज्ञेनकल्प्पन्ताम्॥**

ॐ भूर्भुवः स्वः अङ्कुशाय नमः अङ्कुशमावाहयामि स्थापयामि।

गौतमावाहनम्—**ॐ आयंगौःपृश्निरक्रमीदसदन्मातरंपुरः॥ पितरञ्चप्प्रयन्त्स्वः॥**

ॐ भूर्भुवः स्वः गौतमाय नमः गौतममावाहयामि स्थापयामि।

भरद्वाजावाहनम्—**ॐ अयंदक्षिणाविश्वकर्म्मातस्यमनोवैश्वकर्म्मणंग्ग्रीष्मोमान सस्त्रिष्टुब्ग्रैष्मीत्रिष्टुभःस्वारꣳस्वारादन्तर्य्यामोऽन्तर्य्यामात्पञ्चदशःपञ्चदश द्बृहद्भरद्वाजऽऋषिःप्प्रजापतिगृहीतयात्त्वयामनोगृह्णामिप्रजाभ्यः॥**

ॐ भूर्भुवः स्वः भरद्वाजाय नमः भरद्वाजमावाहयामि स्थापयामि।

विश्वामित्रावाहनम्—**ॐ इदमुत्तरात्स्वस्तस्यश्रोत्रꣳसौवꣳशरच्छ्रौत्र्यनुष्टुप्शार द्यनुष्टुभऽऐडमैडान्मन्थीमन्थिनऽएकविꣳशऽएकविꣳशाद्वैराजंविश्वामित्रऽऋषिः प्प्रजापतिगृहीतयात्त्वयाश्रोत्रंगृह्णामिप्प्रजाभ्यः॥**

ॐ भूर्भुवः स्वः विश्वामित्राय नमः विश्वामित्रमावाहयामि स्थापयामि।

कश्यपावाहनम्—**ॐ त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषम्॥ यद्देवेषुत्र्यायुषंतन्नो अस्तुत्र्यायुषम्॥**

ॐ भूर्भुवः स्वः कश्यपाय नमः कश्यपमावाहयामि स्थापयामि।

जमदग्न्यावाहनम्—**ॐ अयंपश्चाद्विश्वव्यचास्तस्यचक्षुर्वैश्वव्यचसंवर्षाश्चा क्षुष्योजगतीवार्षीजगत्त्याऽऋक्स्समृक्स्समाच्छुक्रःशुक्रात्सप्प्तदशःसप्प्तदशाद्वैरूपं जमदग्निर्ऋषिःप्प्रजापतिगृहीतयात्त्वयाचक्षुर्ग्गृह्णामिप्प्रजाभ्यः॥**

ॐ भूर्भुवः स्वः जमदग्नये नमः जमदग्निमावाहयामि स्थापयामि।

वसिष्ठावाहनम्—**ॐ अयंपुरोभुवस्तस्यप्प्राणोभौवनायनोवसन्तःप्प्राणयनो गायत्रीवासन्तीगायत्र्यैगायत्रंगायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतोरथान्तरंवसिष्ठऽ ऋषिःप्प्रजापतिगृहीतयात्वयाप्प्राणंगृह्णामिप्प्रजाभ्यः॥**

ॐ भूर्भुवः स्वः वसिष्ठाय नमः वसिष्ठमावाहयामि स्थापयामि।

अत्र्यावाहनम्—**ॐ अत्र॑पितरोमादयद्ध्वं॑य्यथाभा॒गमावृ॑षायद्ध्वम्॥ अमी॑मदन्त पि॒तरो॑य्यथाभा॒गमावृ॑षायिषत॥**

ॐ भूर्भुवः स्वः अत्रये नमः अत्रिमावाहयामि स्थापयामि।

अरुन्धत्यावाहनम्—**ॐ तंपत्नी॑भि॒रनु॑गच्छेमदे॒वाःपु॒त्रैर्भ्रातृ॑भिरु॒तवा॒हिर॑ण्ण्यैः॥ नाकं॑गृभ्णा॒नाःसु॑कृ॒तस्य॑लो॒केतृ॒तीये॑पृ॒ष्ठेऽअधिरोच॒नेदि॒वः॥**

ॐ भूर्भुवः स्वः अरुन्धत्यै नमः अरुन्धतीमावाहयामि स्थापयामि।

कामदेवकला कल्पलता कामाङ्गवर्द्धिनी॥९॥

कुलस्त्रीकीर्तिका, कृत्या, कीर्ति, कुलपालिका, कामदेवकला, कल्पलता, कामाङ्गवर्द्धिनी॥९॥

कुन्ती च कुमुदप्रीता कदम्बकुसुमोत्सुका।
कादम्बिनी कमलिनी कृष्णानन्दप्रदायिनी॥१०॥

कुन्ती, कुमुदप्रीता, कदम्बकुसुमोत्सुका, कादम्बिनी, कमलिनी, कृष्णानन्दप्रदायिनी॥१०॥

कुमारीपूजनरता कुमारीगणशोभिता।
कुमारीरर्चनरता कुमारीव्रतधारिणी॥११॥

कुमारीपूजनरता, कुमारीगणशोभिता, कुमारीरर्चनरता कुमारीव्रतधारिणी॥११॥

कङ्काली कमनीया च कामशास्त्रविशारदा।
कपालखट्वाङ्गधरा कालभैरवरूपिणी॥१२॥

कङ्काली, कमनीया, कामशास्त्रविशारदा, कपालखट्वाङ्गधरा, कालभैरवरूपिणी॥१२॥

कोटरी कोटराक्षी च काशी कैलासवासिनी।
कात्यायनी कार्यकारी काव्यशास्त्रप्रमोदिनी॥१३॥

कोटरी, कोटराक्षी, काशी, कैलासवासिनी, कात्यायनी, कार्यकारी, काव्यशास्त्रप्रमोदिनी॥१३॥

कामाकर्षणरूपा च कामपीठनिवासिनी।
कठिनी काकिनी क्रीडा कुत्सिता कलहप्रिया॥१४॥

कामाकर्षणरूपा, कामपीठनिवासिनी, कठिनी, काकिनी, क्रीडा, कुत्सिता, कलहप्रिया॥१४॥

कुण्डगोलोद्भवप्राणा कौशिकी कीर्तिवर्द्धिनी।
कुम्भस्तनी कटाक्षा काव्या कोकनदप्रिया॥१५॥

कुण्डगोलोद्भवप्राणा, कौशिकी, कीर्तिवर्द्धिनी, कुम्भस्तनी, कटाक्षा, काव्या, कोकनदप्रिया॥१५॥

कान्तारवासिनी कान्तिः कठिना कृष्णवल्लभा।
अथ ते कथितं देवि! गुह्याद्गुह्यतरं परम्॥१६॥

कान्तारवासिनी, कान्तिः, कठिना, कृष्णवल्लभा यह प्रसङ्गानुसार काली के अष्टोत्तरशत नाम श्रीभैरव द्वारा कहे गये हैं, ये अत्यन्त गोपनीय हैं॥१६॥

फलश्रुतिः

प्रपठेद्य इदं नित्यं कालीनामशताष्टकम्।
त्रिषु लोकेषु देवेशि! तस्याऽसाध्यं न विद्यते॥१७॥

जो इस अष्टोत्तरशतनामावली का नित्य पाठ करता है, उसके लिये तीनों लोकों में कोई कार्य असाध्य नहीं रहता है॥१७॥

प्रातःकाले च मध्याह्ने सायाह्ने च सदा निशि।
यः पठेत्परया भक्त्या कालीनामशताष्टकम्॥१८॥

प्रातः, मध्याह्न, सायं और रात्रि में जो परम भक्तिपूर्वक पाठ करता है॥१८॥

कालिका तस्य गेहे च संस्थानं कुरुते सदा।
शून्यागारे श्मशाने वा प्रान्तरे जलमध्यतः॥१९॥

उसके शरीर में कालिका स्वयं अपना निवास बनाती है। शून्यघर में, श्मशान में, पर्वत के तट पर, जल के मध्य में॥१९॥

वह्निमध्ये च संग्रामे तथा प्राणस्य संशये।
शताष्टकं जपेन्मन्त्री लभते क्षेममुत्तमम्॥२०॥

अग्नि के मध्य में, संग्राम में तथा प्राण के संकट में पड़ने पर इस शताष्टक का जो जप करता है तो उसके संकटों का क्षेम शमन हो जाता है॥२०॥

कालीं संस्थाप्य विधिवत्स्तुत्वा नामशताष्टकैः।
साधकः सिद्धिमाप्नोति कालिकाया प्रसादतः॥२१॥

विधिवत् काली की स्थापना करके पूजा करके अष्टोत्तरशत नाम का पाठ करने से साधक कालिका के प्रसाद से सिद्धि प्राप्त करता है। इसमें कोई भी संशय नहीं है॥२१॥

अष्टोत्तरशतनाममालाजपं परिपूर्णम्

●

श्रीमहादेवीस्तवेन्द्रम्

नमामि ते कालिपदारविन्दं, त्वामाश्रयामि प्रणमामि नित्यम्।
ध्यायामि गायामि वदामि, नित्यमेवं कुरु त्वं मम चित्तवृत्तिम्॥१॥

हे कालिके! आपको नित्य ही नमस्कार है, आपके चरणकमलों में नित्य ही प्रणाम करता हूँ, उसी का नित्य ध्यान करता हूँ, नित्य उसका वन्दन करता हूँ, नित्य उसका गुणगान करता हूँ, आप नित्य ही हमारे चित्त में वास करें तथा हमारे ऊपर कृपा करें।।१।।

सीमन्तिनीसुन्दरि! कान्तिकम्रा कादम्बरी घूर्णितनेत्रपद्मा।
कदम्बमालाञ्चितकेशपाशा कलावती कौलिकचक्रमध्ये।।२।।

हे महाकालिके! सीमन्तिनीसुन्दरी, नम्रकान्तिवाली, कादम्बरी, नेत्र कमल में सदैव घूमनेवाली, कदम्ब के फूलों से गुथे हुए केशपाशोंवाली, कौलिक चक्र के मध्य में सदैव कलना करनेवाली, आपको शतश: नमस्कार है।।२।।

कन्दर्पदर्पोदरदीर्घबाहू, कुमुद्वती बान्धवचारुनेत्रा।
कलाकलापा कलहंसनादा, कलावती कामकलाविलासा।।३।।

हे कालिके! कन्दर्पदर्प (सर्वोच्चाभिमान) जिसके भीतर भरा है, बड़ी-बड़ी नेत्रोंवाली, कमल को धारण करनेवाली, बान्धवों भक्तों की अखिों को अच्छी लगनेवाली, कलाओं के रूप में विकसित होने वाली, कलहंस का नाद करनेवाली, कलाओंवाली, कामकला में विलास करनेवाली तुमको नित्य नमस्कार है।।३।।

यत्रैव सङ्गः कुलसुन्दरीणां, तत्रैव गङ्गा यमुना च तत्र।
वाराणसी मोक्षकरी तथा च, तत्रैव गङ्गाम्बुधिसङ्गमश्च।।४।।

हे कालिके! जहाँ कुलसुन्दरियों के बीच तुम्हारा स्थान है वहीं गङ्गा-यमुना है, वहीं वाराणसी तीर्थ है, वहीं मोक्ष करने वाला है, वहीं गङ्गाजल का सङ्गम है, वहीं अमृत प्रवाह है, तुमको नित्य नमस्कार है।।४।।

पादारविन्दं कुलसुन्दरीणां, देशान्तरे भावितसिद्धमार्गे।
विहारलोकस्तरुणानुभावं, गृहान्धकूपे विमलं विभाति।।५।।

हे कालिके! तुम्हारा जो कुलसुन्दरियों के बीच पादारविन्द है वही अन्यत्र मार्गो सम्प्रदायों में सिद्धि का मार्ग है, तुम्हारा लोक में विहार करनेवाला यौवन युक्त भाव है, वहीं इस गृह (शरीर) में अन्धकूप में विमल लगता है, तुमको नित्य नमस्कार है।।५।।

कुरङ्गनेत्रातिकुरङ्गनेत्रा, शिवाभवानीति शिवाभवानिः।
मृगेन्द्रमध्याति मृगेन्द्रमध्या, गौरीति गौरीति वचस्तु भूयात्।।६।।

हे कालिके! तुम कुरङ्गनेत्रों में अतिकुरङ्गनेत्रा हो, तुम्हीं शिवाओं में (शक्तियों) भवानियों (स्त्रीयों) में शिवा (कलिका) और भवानी (पार्वती) रूप हो, मृगेन्द्रों के मध्य मृगेन्द्रमध्या हो, तुम्हे ही गौरी, महागौरी नामों से बार-बार कहा जाता है तुमको नित्य नमस्कार है।।६।।

त्वं तारिणी नारकहारिणी त्वं, त्वं कालिकातारणकारिका त्वम्।
वैरोचिनी दुःखविमोचिनी त्वं, त्वं भैरवी त्वं भुवनेश्वरी त्वम्।।७।।

हे कालिके! तुम्ही संसार के भवसागर से तारनेवाली हो, तुम्ही नरक का हरण करने

(नरक से बाहर निकालने) वाली हो, तुम्ही तारनेवाली कालिका हो, तुम्ही भैरवी हो, तुम्ही भुवनेश्वरी हो, तुमको नित्य नमस्कार है॥७॥

दिगम्बरी पीनपयोधरा सा, स्मराभिलाषा परिमुक्तकेशा।
सदा शिवाङ्कस्थितिरर्चिता सा, श्यामाभिरामा परिपूर्णकामा॥८॥

हे कालिके! तुम दिगम्बरी पीनपयोधरा हो, काम की अभिलाषा करनेवाली, खुले हुए केशोंवाली हो, सदैव शिव के ही अङ्ग में रहनेवाली हो, श्यामल प्रकाश वाली हो, समस्त कामनाओं की परिपूर्णता करनेवाली हों, तुमको नित्य नमस्कार है॥८॥

श्री सुन्दरीणां चरणारविन्दं, विना न मन्ये न च पूजयामि।
न च जल्पयामो न च कल्पयामो, न चाश्रयामो न च देवमन्यम्॥९॥

हे कालि! श्रीस्वरूपिणी त्रिपुरसुन्दरी के चरण-कमलों का कभी कोई ध्यान नहीं किया, न कभी मान ही दिया और न कभी पूजन ही किया, हे त्रिपुरसुन्दरीस्वरूपिणी कालिके! तुम्हारे विना कोई जप नहीं है न ही कोई पूजा की कल्पना ही की जा सकती है, तुम्हारे विना कोई आश्रय नहीं है, तुम्हारे से अतिरिक्त कोई देव भी नहीं है तुमको नित्य नमस्कार है॥९॥

जपावली यावकजालवर्णा, सौदामिनी दाडिमबीजवर्णा।
सुवर्णकाञ्ची परिबद्धमध्या, सिद्धार्चिता सिद्धमयी विभाति॥१०॥

हे कालिके! तुम ही जपकाल की अक्षमाला में वर्णरूपा हो, तुम ही सौदामिनी हो, तुम ही दाडिमफल में बीज के वर्णवाली हो, तुम ही सुवर्ण की आभा से युक्त हो कर मध्य में रहनेवाली हो, तुम ही सिद्धमयी तथा सिद्धों के द्वारा अर्चित हो, तुमको नित्य नमस्कार है॥१०॥

कादम्बरी पानपरायणानां, कुलाङ्गनानां वदनारविन्दम्।
ध्यानं ममैतत् स सदैव भूयात्, तद्भावनाभावितभूरिभक्तिः॥११॥

हे कालिके! तुम कादम्बरी हो, तुम अमृतपानपरायणा हो, तुम ही कुलाङ्गनाओं में प्रभारूप से विराजमान हो, तुम्हारा ही रूप हमें ध्यान में सदैव प्रत्यक्ष हो, तुम्हारी ही भावना से भावित भक्ति से ओत-प्रोत रहूँ, तुमको नित्य नमस्कार है॥११॥

त्वमेव बुद्धिश्च त्वमेव वृद्धिस्त्वमेव सिद्धिश्च त्वमेव ऋद्धिः।
प्रमात्मिका त्वं परमात्मिका त्वं, प्रमाणमाता परमेश्वरी त्वम्॥१२॥

हे कालिके! तुम ही बुद्धि हो, तुम ही वृद्धि हो, तुम ही सिद्धि हो, तुम ही ऋद्धि हो, तुम ही प्रमारूपिणी हो, तुम ही परमात्मिका हो, तुम ही प्रमाण हो, तुम ही माता हो, तुम ही परमेश्वरी हो, तुमको नित्य नमस्कार है॥१२॥

त्वं कार्तिकी कौतुकमूर्तिराद्या, मयूरपृष्ठार्पितपादपद्मा।
चन्द्रानना चारुचकोरनेत्रा, किं स्तौमि मातस्तव पादपद्मे॥१३॥

हे कालिके! तुम ही कार्तिकी हो, तुम ही आद्या कौतुकरूपी मूर्ति हो, तुम ही मयूर

के पीठ पर चिन्हित चरण कमल हो, तुम्हारे मुखकमल चन्द्रमा के सदृश हैं, तुम्हारे नेत्र सदैव अच्छे लगनेवाले हैं, हे माता! तुम्हारे चरणकमल से अतिरिक्त किसका पूजन करे, तुमको नित्य नमस्कार है।।१३।।

अत्युग्रदन्ताग्रधृता च नित्यं, घोरानना घोरगभीरनादा।
संहारनिस्तारविधानकर्त्री, वाराहि मातः स्तव एव सर्वम्।।१४।।

हे कालिके! तुम अति उग्र दाँतों को धारण करनेवाली हो, घोर आननवाली हो, घोर गम्भीर नाद करनेवाली हो, तुम संहार, निस्तार तथा विधान करनेवाली हो, हे माता! तुम वाराही रूपिणी हो, तुम्हारा ही सब स्तवन करते हैं तुमको नित्य नमस्कार है।।१४।।

कालस्त्वमेव त्वमपीह काष्ठा, त्वमेव चात्मा च मनस्त्वमेव।
श्रीब्रह्मशक्तिः खलुसत्यरूपा, ज्योतिःस्वरूपा जगतः करोषि।।१५।।

हे कालिके! तुम ही काल हो, तुम ही काष्ठ के सदृश जड़रूप हो, तुम ही आत्मा हो, तुम ही मनरूप हो, तुम ही श्री हो, तुम ही ब्रह्म हो, तुम ही शक्ति हो, तुम ही ब्रह्मशक्ति हो, तुम ही सत्यरूप हो, तुम ही ज्योतिस्वरूपा हो, इस संसार में तुम ही प्रकाश करने वाली हो तुमको नित्य नमस्कार है।।१५।।

त्वं वैष्णवी विष्णुस्वरूपिणी त्वं, त्रैलोक्यरक्षाकरणैकदक्षा।
खगेन्द्ररूढा घननीलवर्णा, विश्वेशरक्षानिलया त्वमेव।।१६।।

हे कालिके! तुम वैष्णवी तथा विष्णुस्वरूपिणी हो, तुम ही इस तीनों लोकों की रक्षा करने में समर्थ हो, तुम ही गरुड़ पर आरूढ़ हो, तुम ही मेघ के समान नील वर्णवाली हो, तुम ही विश्वेश की निलया, सृष्टि की रक्षा करनेवाली हो, तुमको नित्य नमस्कार है।।१६।।

नानाकलाकेलिकुलालसङ्गी, पीनस्तनी चन्द्रमुखी कदाचित्।
न विस्मरामो न च विस्मरामो, न विस्मरामः कलहंसनादाम्।।१७।।

हे कालिके! तुम ही नाना प्रकार की कलाओं से केलि करनेवाली सङ्गी हो, तुम ही पीन स्तनवाली हो, तुम ही कहीं पर चन्द्रमुखी रूप से स्थित हो, तुम्हारे यह कलहंस नाद कभी विस्मरण न हो, कभी विस्मरण न हो, कभी भी विस्मरण न हो तुमकों नित्य नमस्कार है।।१७।।

गतिस्त्वमेवासि गतिस्त्वमेव, मतिस्तवमेवासि मतिस्त्वमेत्व।
धृतिस्त्वमेवासि धृतिस्त्वमेव, श्रुतिस्त्वमेवासि श्रुतिस्त्वमेव।।१८।।

हे कालिके! तुम ही गतिरूप हो, तुम ही गति हो, तुम ही मतिरूप हो, तुम ही मति हो, तुम ही धृतिरूप हो, तुम ही धृति हो, तुम ही श्रुतिरूप हो, तुम ही श्रुति हो। तुमको नित्य नमस्कार है।।१८।।

तमाललालाञ्छितमुण्डमाला, काली करालाननलोलजिह्वा।
विमर्दयन्ति जगदादिमाता, प्रचण्डचण्डासुरमुण्डखण्डान्।।१९।।

हे कालिके! तुम लालिमायुक्त मुण्डमाला को धारण करके शोभायमान हो, तुम ही

काली हो, तुम ही कराल आनन वाली हो, तुम लोल जिह्वा हो, हे आदि माता इस जगत् का तुम ही विमर्दन करती हो, तुम ही प्रचण्डचण्डा (छिन्नमस्तिका) हो, तुम ही असुरों का मुण्ड छेदन करनेवाली चामुण्डा हो, तुमको नित्य नमस्कार है॥१९॥

चतुर्भुजाप्याष्टभुजा त्वमेव, षड्बाहुका षोडशहस्तयुक्ता।
सहस्रहस्ता शतपाणिवल्ली, त्वं कालिके दशहस्तकासि॥२०॥

हे कालिके! तुम ही चार भुजाओंवाली हो, तुम ही आठ भुजाओंवाली हो, तुम ही सहस्रों हाथोंवाली हो, तुम ही शतपाणिवल्ली (सौ हाथों वाली) हो, तुम ही दश हाथों वाली कालिका हो, तुमको नित्य नमस्कार है॥२०॥

युगोऽपि वर्षः कल्पाश्च मासो, नक्तं दिवा त्वं प्रलयो मुहूर्तम्।
त्वं कालरात्री विरला त्वमेव राकार्णवी कालमयी च काली॥२१॥

हे कालिके! तुम ही युग, वर्ष, कल्प, मासरूप हो, तुम ही रात्रि, दिवा तथा मुहूर्तरूपिणी हो, तुम ही प्रलय करनेवाली हो, तुम ही कालरात्रि हो, तुम ही विरला हो, तुम ही आकार धारण करनेवाली हो, तुम ही कालमयी हो और तुम ही काली हो, तुमको नित्य नमस्कार है॥२१॥

वर्णेश्वरी त्वं पुरवासिनी त्वं, पुरान्तका त्वं परिपूर्णता त्वम्।
त्वमुग्रतारैकजटा त्वमेव, सुसम्मुखी नीलसरस्वती च॥२२॥

हे कालि! तुम ही वर्णों की ईश्वरी हो, तुम ही शरीरों में निवास करनेवाली हो, तुम ही शरीरों का अन्त करनेवाली हो, तुम ही परिपूर्णता हो, तुम ही उग्रतारा हो, तुम ही एकजटातारा हो, तुम ही सुमुखी हो, तुम ही नील सरस्वती रूपिणी हो, तुमको नित्य नमस्कार है॥२२॥

सर्पासना सर्पविभूषणैका, धूमावती त्वं भवसीति मातः।
मातङ्गिनी त्वं बगला च माता, त्वमेव काली करवालिनी च॥२३॥

हे कालिके! तुम सर्पासना हो, सर्परूप से विभूषित हो, तुम ही धूमावती हो, तुम ही मातङ्गिनी हो, तुम ही बगला हो, तुम ही करवालिनी काली हो, तुमको नित्य नमस्कार है॥२३॥

आधारलग्नं खलु मेरुदण्डं, तद्वामयुक्तापि च पिङ्गला च।
इडा च दक्षेषु निरन्तरेषु, सुषुम्नमध्या ग्रथितार्चकस्य॥२४॥

हे कालिके! तुम मेरुदण्ड में मूलाधार में निवास करनेवाली हो, तुम्हारा ही वाम धामयुक्त पिङ्गला है, दक्षिण भाग में इडा रूप से निरन्तर प्रवाहित होती हो, तुम ही मध्य में सुषुम्ना रूप से ग्रथित होकर भक्तों की अर्चना ग्रहण करती हो अर्थात् तुम ही इडा-पिङ्गला-सुषुम्ना में प्रवाहित होती हो, तुमको नित्य नमस्कार है॥२४॥

चित्रान्तरस्था खलुवज्रनाड़ी, मृणालतन्त्वर्धसुशूकसूक्ष्मा।
तन्मध्यगा येन विसूक्ष्मरूपा, सा ब्रह्मनाड़ी तदनन्तरेऽपि॥२५॥

हे कालिके! तुम ही अन्तस्थ चित्रा नाड़ी और वज्रा नाड़ी स्वरूपिणी हो, तुम ही मृणलतन्तु के समान अतिसूक्ष्मा हो, उसमें भी मध्य में रहनेवाली जो अतिसूक्ष्म रूप हैं, वह ब्रह्मनाड़ी तुम ही हो, तुमको नित्य नमस्कार है॥२५॥

सहस्त्रपत्राम्बुजमेयगात्रा, सुधासुरापानरतिप्रयुक्ता।
त्वं सर्व जीवा जननीस्वरूपा, ब्रह्मस्वरूपा भवदेहमध्या॥२६॥

हे कालिके! तुम ही इस शरीर के अन्त:करण के चिदाकाश में सहस्त्रार में सहस्त्र पत्रों के स्वरूप हो, तुम सुधारूपिणी हो, सुरा के पान में सदैव रतिप्रीति रखनेवाली हो, अमृतपान में सदैव उद्यत रहनेवाली हो, तुम सभी जीवों की जननीस्वरूपा हो, तुम ही भव के शरीर में रहनेवाली ब्रह्मस्वरूपा हो, तुमको नित्य नमस्कार है॥२६॥

त्वं कुण्डलिन्यर्ककोटीन्दुदीप्ता, कोटीन्दुकान्तिर्भुजगप्रमाणा।
आधारयुक्ता कुलकुण्डसुप्ताप्यर्धस्वयम्भूवदनप्रकाशी॥२७॥

हे कालिके! तुम सूर्य-चन्द्र के समान दीप्त कुण्डलिनी स्वरूपिणी हो, तुम ही चन्द्र की कान्ति के समान सर्पाकृतिवाली हो, तुम मूलाधार में रहनेवाली हो, तुम शरीररूपी कुण्ड के मूलाधार में सोई हुई हो, तुम ही स्वयंभू लिङ्गस्वरूपी शिवशरीर के आधे भाग में प्रकाश करनेवाली हो, तुमको नित्य नमस्कार है॥२७॥

कात्यायनी कामकला जयन्ती, सावित्री पूर्णा मधुमांसलुब्धा।
त्वमेव पूर्णा वनदुर्गका च, कामात्मिका कामवती त्वमेव॥२८॥

हे कालिके! तुम कात्यायनी हो, तुम कामकला हो, तुम जयन्ती हो, तुम ही सावित्री हो, तुम ही पूर्णा हो, तुम ही मधुरस तथा मांस का लोभ करनेवाली हो, तुम ही वनदुर्गा हो, तुम ही कामात्मिका, कामवती हो, तुमको नित्य नमस्कार है॥२८॥

गणेश्वरः षड्वदनः कुबेरो, धनेशपुत्रो रविजो जयन्तः।
त्वं चित्रगुप्तश्च सुकर्मकर्ता, यतीश्वरी देवमयी त्वमेव॥२९॥

हे कालिके! तुम ही गणेश्वर, षड्वदन, कुबेर, धनेशपुत्र, रविपुत्र, जयन्त, चित्रगुप्त, सुकर्मकर्ता, यतीश्वरी तथा देवमयी हो तुमको नित्य नमस्कार है॥२९॥

त्वमेव सर्वासि वदामि तत्त्वं, त्वमेव सर्वस्तावकस्त्वमेव।
लिङ्गोऽप्यलिङ्गो यत एव सर्वे, यतस्ततः सर्वमयी त्वमेव॥३०॥

हे कालिके! तुम ही सर्वमयी तत्त्वस्वरूपिणी हो, सभी तुम्हारा ही स्तबक है, सभी लिङ्गों-अलिङ्गों में तुम ही हो, जहाँ-तहाँ सर्वत्र तुम ही हो, तुमको नित्य नमस्कार है॥३०॥

इदं स्तवेन्द्रं नित्यं च देव्या, भक्त्यैकचिह्नं सततं पठेद् यः।
पिकस्वरः सर्वजनानुरागी, दाता पुनीतो गुरुदेवभक्तः॥३१॥

यह देवी का स्तवेन्द्र भक्तिपूर्वक जो सतत मुक्त कण्ठ होकर मधुर स्वर से पाठ करता है, वह संसार में सभी लोगों को प्रिय, दाता-पुनीत तथा गुरुदेव का भक्त होता है॥३१॥

विघ्ने गणेशो भयदुर्गनाशो, भोगी सुखी पूरितलोकभर्ता।
सदामुदः सर्वगणेश्वरोऽपि, दयाचितो रत्नयुतश्चिरायुः॥३२॥

उस पाठकर्ता के विघ्नों का गणेश, भयों का दुर्गा नाश करती है, वह समस्त भोगों का भोग करनेवाला तथा सबकी पूर्ति करनेवाला भर्ता होता है, सदैव हीं प्रसन्न तथा सेवकों से युक्त होता है, दया करनेवाला, सभी रत्नों से युक्त, चिरायु होता है॥३२॥

शतावधानो रणकालरुद्रो, लोकाभिरामो भुवि सर्वदा सः।
जिह्वाग्रवाणीं युवतीं सृजन्तीं, सुशीलयन्तीं परलोकविद्यः॥३३॥

वह शतावधान, रण में महाकालरुद्र होता है, वह लोक में लोकाभिराम होकर सर्वदा विचरण करता है, उसके जिह्वा के अग्रभाग में वाणी (सरस्वती) का निवास होता है, वह युवतियों से युक्त होता है तथा सुशील परलोक का जानकार होता है॥३३॥

श्रीदेवींस्तवेन्द्रं परिपूर्णम्

◆

ब्रह्मगाथास्तवः

नमामि कृष्णरूपिणी कृशाङ्गयष्टिधारिणीम्।
समस्ततत्त्वसागरामपारगह्वरां शिवाम्॥१॥

हे कृष्णरूपिणी आपको नमस्कार है, कृश-अङ्ग वाली यष्टि (दण्ड) धारण करनेवाली नमस्कार है, समस्त तत्त्वों की अनन्त गहरे सागर के समान महादेवी शिवा को नमस्कार है॥१॥

प्रवालकन्धराञ्चितां स्फुरच्छशाङ्कशेखराम्।
ललाटनेत्रभास्वरां ज्वलत्प्रदीप्तमूर्धजाम्॥२॥

प्रवाल के समान प्रभावाली, चन्द्रमा के समान प्रकाशित, ललाट में नेत्र की शोभा वाली, जलते हुए तेजवान मूर्धावाली कालिका को नमस्कार है॥२॥

महेशकश्यपार्चितां सनत्कुमारसंस्तुताम्।
सुरासुरेन्द्रवन्दितां यथार्थनिर्मिताद्भुताम्॥३॥

महेश तथा कश्यपादि ऋषियों के द्वारा अर्चित सनत्कुमारादि के द्वारा संस्तुत सुर तथा असुरों से वन्दित यथार्थ निर्मित अद्भुत देवी कालिका को नमस्कार है॥३॥

अतर्क्यचारुवेष्टितां विकारदोषवर्जिताम्।
मुमुक्षुभिर्विचेष्टितां विशेषतत्त्वशोचिताम्॥४॥

अतर्क्य, चारुवेष्टित, विकारादि दोषों से वर्जित, मुमुक्षुओं की चेष्टाओंवाली, विशेष तत्त्वोंवाली कालिका देवी को नमस्कार है॥४॥

नरास्थिनिर्मितस्त्रजं मृगेन्द्रवाहनाग्रजाम्।
प्रदुष्टसत्त्वभीषणां सदोदितैकलक्षणम्॥५॥

नरास्थिनिर्मित मालिका धारण करनेवाली, मृगेन्द्र (सिंह) वाहना, अग्रजा, प्रदुष्टसत्त्वभीषण (भयंकर काला) सदा उदित लक्षणोंवाली कालिका को नमस्कार है॥५॥

सुलक्षणां विलक्षणां भुजङ्गहारहारिणीम्।
कपालखड्गधारिणीं सुधार्मिकोपकारिणीम्॥६॥

सुन्दर लक्षणोंवाली, विशेष लक्षणोंवाली, सर्प के हार को धारण करनेवाली, कपालखड्ग धारण करनेवाली, सद्धर्म करनेवालों का उपकार करनेवाली कालिका को नमस्कार है॥६॥

सुरेन्द्रवैरिघातिनीं कुठारचापपाशिनीम्।
कृतान्तकामवासिनीं सुधाकपालमालिनीम्॥७॥

सुरेन्द्र के शत्रुओं का घात करनेवाली, कुठार-चाप-पाश धारण करनेवाली, कामनाओं की पूर्ति करनेवाली, कामवासिनी, सुधाकपाल की मालाओं को धारण करनेवाली कालिका को नमस्कार है॥७॥

श्मशानभूमिवासिनीं सुनित्यकल्पशाखिनीम्।
द्विजेन्द्रवृन्दतारिणीं सहस्त्रसूर्यसन्निभाम्॥८॥

श्मशानभूमि में वास करनेवाली, सुन्दर नित्य कल्पों का निर्माण करनेवाली, द्विज वृन्द को तारनेवाली, सहस्त्रों सूर्य की प्रभावाली कालिका को नमस्कार है॥८॥

धनञ्जयैकवत्सलामशुद्धकालचञ्चलाम् ।
सुनित्यतृप्तिमुज्ज्वलां प्रतापिनीं प्रजावतीम्॥९॥

धनञ्जयैकवत्सला, अशुद्धकालचञ्चला, सुन्दर नित्य तृप्तिप्रदायिनी, उज्वला, प्रतापिनी, प्रजावती कालिका को नमस्कार है॥९॥

नमामि मातरं सखीं सुकर्मकारणे गतिम्।
हरप्रियां च पार्वतीमनन्तशक्तिसम्पदाम्॥१०॥

हे माता! सुन्दर कर्म करने में गतिशील सखी भाव युक्त, हर की प्रिया, अनन्त शक्ति की सम्पदा पार्वती देवी को नमस्कार है॥१०॥

यशः-सुभुक्ति-मुक्तिदां नमोऽस्तु ते पराम्बिके।
शिवे द्विजेऽभयात्मिके जयेश्वरि त्रिलोचने॥११॥

यश-सुन्दर भुक्ति तथा मुक्ति देनेवाली हो, पराम्बिका हो, त्रिलोचना हो, जयेश्वरी हो, हे शिवे! द्विजमात्र को अभय प्रदान करनेवाली कालिका आपको नमस्कार है॥११॥

प्रसीद देवि पाहि मां जपन्ति च स्मरन्ति च।
स्तुवन्ति यं नरेश्वरा भवन्त्वमोघवाञ्छिताः॥१२॥

जो व्यक्ति तुम्हारा जप करता है, ध्यान करता है, स्तुति करता है, वह नरेश्वर अमोघ कामनाओं को भी पूरा कर लेता है॥१२॥

सदैव ते भवद्विषो नराः परे शिवेऽधुना।
प्रसीद मां करोमि किं नितान्तमोहितात्मना॥१३॥

इस युग में इस भवसागर में सभी जन कालुष्ययुक्त हो गये हैं, सभी शिवा से विमुख हो गये हैं, हे भगवती! मै नितान्त मोहित चित्तवाला हूँ, क्या करूँ आप प्रसन्न होइये॥१३॥

वृथा विचेष्टितस्य मे कुरु प्रसादमच्युतम्।
यदाश्रयोऽहमम्बिके लभेम सद्गतिं पराम्॥१४॥

हमारी समस्त चेष्टाएँ सभी वृथा हो गयी हैं, हमारे ऊपर अपना अच्युतकृपाप्रसाद का वर्षण करो, हम जिसका आश्रय ग्रहण करके हे अम्बिके! परम सद्गति को प्राप्त करें॥१४॥

इमां स्तुतिं मयेरितां पठन्ति देवि साधकाः।
न ते पुनः सुदुस्तरे पतन्ति मोहसागरे॥१५॥

इस मेरे द्वारा की गयी स्तुति का जो देवी का साधक नित्य पाठ करता है, वह फिर से कभी भी इस दुस्तर मोह के सागर में नही पड़ता है॥१५॥

ब्रह्मगाथापरिपूर्णम्

श्रीमहाविद्याष्टकम्

गलद् रक्तमुण्डावली कण्ठमाला, महाघोररावा सुदंष्ट्रा कराला।
विवस्त्रा श्मशानालया मुक्तकेशी, महाकालकामाकुला कालिकेयम्॥१॥

गले में रक्त प्रवाहित होते हुए मुण्डावली की कण्ठमाला धारण किये हुए, महाघोर राव (घोष) करनेवाली, बड़े-बड़े सुन्दर दाँतोंवाली, विना वस्त्र धारण किये हुए दिगम्बरी, श्मशान में रहनेवाली, खुले हुए केशोंवाली, महाकाल के साथ कामासक्त कामकला में निपुण, कालिका को नमस्कार है॥१॥

भुजे वामयुग्मे शिरोऽसी दधाना, वरं दक्षयुग्मेऽभयं वै तथैव।
सुमध्याऽपि तुङ्गस्तनभारनम्रा, लसद्रक्तसृक्कद्वया सुस्मितास्या॥२॥

दोनों बायीं भुजाओं में शिर तथा खड्ग धारण किये हुए तथा दोनों दाहिने भुजाओं में वर तथा अभय मुद्रा धारण किये हुए, मध्य में भी सुन्दर स्तन उठे भार से झुके हुए, मुख से बहते हुए रक्त की धारा से शोभायमान कालिका को नमस्कार है॥२॥

शवद्वन्द्वकर्णावतंसा सुकेशी, लसत्प्रेतपाणिप्रयुक्तैककाञ्ची।
शवाकारमञ्चाधिरूढा शिवाभिश्चतुर्दिक्षु शब्दायमानाऽभिरेजे॥३॥

सुन्दर केशोंवाली, कर्ण में दो शवों को कर्णाभूषण के रूप में धारण किये हुए, प्रेत

के हाथों से निर्मित करधनी कमर में धारण किये हुए, शवाकार मञ्च पर आरूढ, चारो दिशाओं में शिवाओं से युक्त, शब्दों से गुञ्जायमान कालिका को नमस्कार है।।३।।

विरञ्चाधिदेवास्त्रयस्तेगुणास्त्रीन्, समाराध्य कालीं प्रधाना बभूवुः।
अनादिं सुरादिं मखादिं भवादिं, स्वरूपं त्वदीयं न विन्दन्ति देवाः।।४।।

ब्रह्मा-विष्णु-महेश तीनों देवता जिसके तीन गुण स्वरूप है, तीनों देवता प्रधान रूप से काली की ही आराधना करते है, हे कालिके! तुम अनादि, सुरादि, मखादि, भवादि हो, तुम्हारे स्वरूप को देवता भी नहीं जानते हैं।।४।।

जगन्मोहनीयं तु वाग्वादिनीयं, सुहृत्योषिर्णीं शत्रुसंहारणीयम्।
वचः स्तम्भनीयं किमुच्चाटनीयं, स्वरूपं त्वदीयं न विन्दन्ति देवाः।।५।।

हे कालिका! तुम जगत् का मोहन करनेवाली हो, तुम ही वाणी रूप से वन्दनीय हो, तुम सुहृदय में रहनेवाली हो, तुम ही शत्रुओं का संहार करती हो, तुम ही वाणी का स्तम्भन करती हो, तुम ही उच्चाटन करती हो, तुम्हारे स्वरूप को देवता भी नहीं जानते हैं।।५।।

इयं स्वर्गदात्री पुनः कल्पवल्ली, मनोजांस्तु कामान् यथार्थं प्रकुर्यात्।
कथा ते कृतार्था भवन्तीति नित्यं, स्वरूपं त्वदीयं न विन्दन्ति देवाः।।६।।

तुम ही स्वर्ग प्रदान करनेवाली हो, समस्त कामनाओं की पूर्ति करनेवाली कल्पवल्ली हो, तुम ही कामनाओं से मन को विजय दिलानेवाली हो, तुम ही यथार्थ को प्रकट करने वाली हो, तुम्हारे कथाओं से सभी नित्य कृतार्थ होते हैं, तुम्हारे स्वरूप को देवता भी नहीं जानते हैं।।६।।

सुरापानमत्ते! सुभक्तानुरक्ते! लसत्पूतचित्ते! सदाविर्भवस्ते।
जपध्यानपूजासुधाधौतपङ्काः, स्वरूपं त्वदीयं न विन्दन्ति देवाः।।७।।

हे कालिका! तुम सुरापान में सदैव मत्त रहने वाली हो, सुन्दर भक्तो में अनुरक्त रहने वाली हो, तुम्हारा पवित्र चित्त में सदा आविर्भाव होता है, जप, ध्यान, पूजा सभी अमृत सागर के कमल है, तुम्हारे स्वरूप को देवता भी नहीं जानते हैं।।७।।

चिदानन्दकन्दं हसन्मन्दमन्दं, शरच्चन्द्रकोटिप्रभापुञ्जबिम्बम्।
मुनीनां कवीनां हृदि द्योतमानं स्वरूपं त्वदीयं न विन्दन्ति देवाः।।८।।

हे कालिका! मन्द-मन्द हास्य करती हुई चिदानन्दकन्द शरदकाल के चन्द्रमा के समान प्रभापुञ्जवाली मुनियों-कवियों के हृदय में द्योतमान तुम्हारे स्वरूप को देवता भी नही जानते हैं।।८।।

महामेघकाली सुरक्ताऽपि शुभ्रा, कदाचिद्विचित्राकृतिर्योगमाया।
न बाला न वृद्धा न कामातुराऽपि, स्वरूपं त्वदीयं न विन्दन्ति देवाः।।९।।

महामेघ के समान काली सुरक्त-शुभ्र, कभी-कभी विचित्र आकृतियोंवाली योगमाया, न बाला, न वृद्धा, न कामातुरा ही हो तुम्हारे स्वरूप को देवता भी नही जानते हैं।।९।।

क्षमस्वापराधं महागुप्तभावं, मया लोकमध्ये प्रकाशीकृतं यत्।
तव ध्यानपूतेन चापल्यभावात्, स्वरूपं त्वदीयं न विन्दन्ति देवाः॥१०॥

इस लोक में मेरे हृदय में महागुप्त भाव को प्रकाशित करो, आप के ध्यान करने में चपलतायुक्त भाववाला मै हूँ, हे कालिके! मेरे अपराधों को क्षमा करो, तुम्हारे स्वरूप को देवता भी नहीं जानते हैं॥१०॥

यदि ध्यानयुक्तः पठेद्यो मनुष्यस्तदा सर्वलोके विशालो भवेच्च।
गृहे चाष्टसिद्धिर्मृते चापि मुक्तिः, स्वरूपं त्वदीयं न विन्दन्ति देवाः॥११॥

इस महास्तोत्र का यदि ध्यानयुक्त होकर जो मनुष्य पाठ करता है, वह पूरे संसार में विशाल होकर रहता है, घर में अष्टसिद्धियों को प्राप्त करता है तथा मरने के बाद मुक्ति प्राप्त करता है, तुम्हारे स्वरूप को देवता भी नहीं जानते हैं॥११॥

कालिकाष्टकं परिपूर्णम्

●

कालिस्तवनम्

उल्लसद्दनुजवृन्दखेदिनी, भूरिदुःखभवभीतिभेदिनी।
कण्ठलम्बितकपालमालिका, मङ्गलं मम करोतु कालिका॥१॥

बढ़े हुए दानव-दलों को खेद पहुँचानेवाली, दुःख-समुदाय को नष्ट करनेवाली, कण्ठ में लम्बायमान (लटकती हुई) कपाल (नरमुण्ड) की माला धारण की हुई कालिका हमारा सर्वदा मङ्गल करें॥१॥

शोणितार्द्रगजचर्मवासिनी, मत्तभैरवमहाट्टहासिनी।
दैत्यबाहुकृतकाञ्चिनालिका, मङ्गलं मम करोतु कालिका॥२॥

रक्त से रञ्जित गजचर्म धारण करनेवाली, मदमत्त भैरव के साथ महा अट्टहास करने वाली, दैत्यों के बाहुओं की करधनी बनाकर धारण करनेवाली कालिका हमारा सर्वदा मङ्गल करें॥२॥

मेरुमन्दरविन्ध्यवासिनी, संस्मृतासि दुरितौघनाशिनी।
या द्विजेति च कुमारिका, मङ्गलं मम करोतु कालिका॥३॥

सुमेरु-मन्दराचल और विन्ध्याचल पर्वत पर निवास करनेवाली, स्मरण करने मात्र से ही समस्त दुरितौघ का नाश करनेवाली, जो द्विज जातियों में कुमारिका नाम से विख्यात हैं, वे कालिका हमारा सर्वदा मङ्गल करें॥३॥

चण्डमुण्डवधकेलिकारिका, रक्तबीजरणदर्पहारिका।
कायकान्तिजितमेघमालिका, मङ्गलं मम करोतु कालिका॥४॥

चण्डमुण्ड असुरों का खेल-खेल में वध करनेवाली, रक्तबीज असुर का दर्प हरण करनेवाली, जिनकी काया की कान्ति मेघ के समान है, वे कालिका हमारा सदा-सर्वदा मङ्गल करें॥४॥

आदिशक्ति कमला सनातनी, कामक्रोधवरशूलदण्डिनी।
ब्रह्मचित्तसरसे मुरालिका, मङ्गलं मम करोतु कालिका॥५॥

सनातनी भगवती आदिशक्ति कमला नामवाली, कामक्रोध का नाश करनेवाली, हाथों में त्रिशूल और दण्ड धारण करनेवाली, ब्रह्म के चित्त में आनन्द का प्रवाह करनेवाली कालिका हमारा सदा-सर्वदा मङ्गल करें॥५॥

अदिशक्ति मनसा सनातनी, सम्मतासि गिरिकूटवासिनी।
पाहि मां भवने कुमारिका, मङ्गलं मम करोतु कालिका॥६॥

सनातनी आदिशक्ति मनसा नाम धारिणी देवी, पर्वत के शिखर पर निवास करने वाली, भवन में कुमारिका नाम धारण करनेवाली हमारी रक्षा-पालन करे तथा हमारा सदा सर्वदा मङ्गल करें॥६॥

राजसे सकलसर्गसज्जने, सात्त्विकी च जगतां सुलक्षणे।
तामसी च जगतां सुरोलिका, मङ्गलं मम करोतु कालिका॥७॥

राजस गुण के रूप में सम्पूर्ण सृष्टि का निर्माण करनेवाली, सात्त्विक रूप से सम्पूर्ण जगत् का हित करनेवाली, तामस गुण रूप से जगत् का लय करनेवाली कालिका हमारा सदा सर्वदा मङ्गल करें॥७॥

भक्तिनम्रमुनियक्षदेवता, सिद्धकिन्नरसमूहसेविता।
शुम्भदैत्यमकरन्दकालिका, मङ्गलं मम करोतु कालिका॥८॥

जिसे मुनि-यक्ष-देवता भक्ति पूर्वक नमन करते है, सिद्धों-किन्नरों का समूह जिनकी सेवा करता है, शुम्भ दैत्य का विनाश करके आनन्द देनेवाली कालिका हमारा सदा सर्वदा मङ्गल करें॥८॥

कालिस्तोत्रं परिपूर्णम्

◆

कालीमहाविद्यासहस्रनामस्तोत्रम्

श्रीगुरुभ्यो नमः

कथितोऽयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः।
यमासाद्य मया प्राप्तं ऐश्वर्यपदमुत्तमम्॥१॥

सभी मन्त्रों में उत्तमोत्तम महामन्त्र कहता हूँ, जिसका आश्रय लेकर मैंने इस उत्तम महत् ऐश्वर्य पद को प्राप्त किया है॥१॥

संयुक्तः परया भक्त्या यथोक्तविधिना भवान्।
कुरुतामर्चनं देव्याः त्रैलोक्यविजिगीषया॥२॥

इस कही हुई विधि से परम भक्ति से युक्त होकर जो कोई देवी का अर्चन करेगा, वह तीनों लोकों में विजय प्राप्त करेगा॥२॥

श्रीपरशुराम उवाच

प्रसन्नो यदि मे देवः परमेशः पुरातनः।
रहस्यं परया देव्या कृपया कथय प्रभो॥३॥

हे पुरातन परमेश देव! यदि आप हम पर प्रसन्न हों तो हे प्रभु! कृपापूर्वक परदेवी का रहस्य कथन करें॥३॥

यथार्चनं विना होमं विना न्यासं विना बलिम्।
विना गन्धं विना पुष्पं विना नित्योदिताक्रिया॥४॥

विना होम, विना न्यास, विना बलि, विना गन्धाद्युपचार, विना पुष्पदिसमर्पण, विना नित्यक्रिया के जैसे-तैसे किये गये अर्चन से ही जिससे काली प्रसन्न हो जाती हैं॥४॥

प्राणायामं विना ध्यानं विना भूतविशोधनम्।
विना जाप्यं विना दानं विना काली प्रसीदति॥५॥

विना प्राणायाम, विना ध्यान, विना भूतशुद्धि, विना जप, विना दानादि क्रिया के ही काली जिससे प्रसन्न हो जाती हैं वह उपाय कहें॥५॥

श्रीशंकर उवाच

पृष्टं त्वयोक्तं मे प्राज्ञ भृगुवंशविवर्धन।
भक्तानामपि भक्तोऽसि त्वमेवं साधयिष्यसि॥६॥

हे भृगु के वंश के विस्तारक! पूर्व में तुमने पूछा तथा हमने कहा था, तुम भक्तों में परमभक्त हो इसलिए तुम्हारी कामना के लिए कहता हूँ॥६॥

देवीं दानवकोटिघ्नीं लीलया रुधिरप्रियाम्।
सदा स्तोत्रं प्रियामुग्रां कामकौतुकलालसाम्॥७॥

रुधिर से प्रेम करनेवाली देवी करोड़ों दानवों का हनन करनेवाली, सदा ही समस्त कामनाओं की पूर्ति की लालसावालों के लिए उग्रा देवी का स्तोत्र कहता हूँ॥७॥

सर्वदानन्दहृदयां वासव्यासक्तमानसाम्।
माध्वीकमत्स्यमांसादिरागिणीं रुधिरप्रियाम्॥८॥

सर्वदा आनन्द रूप से हृदय में निवास करनेवाली, आसक्तमानस, मधु, मत्स्य, मांस, से अनुराग रखनेवाली, रुधिर से प्रेम करनेवाली॥८॥

श्मशानवासिनीं प्रेतगणनृत्यमहोत्सवाम्।
योगप्रभां योगिनीशां योगीन्द्रहृदये स्थिताम्॥९॥

श्मशान में वास करनेवाली, प्रेतगणों के नृत्यमहोत्सव में सम्मिलित, योग की प्रभा वाली, योगिनियों की अधीश्वरी, योगियों के हृदय में रहने वाली॥९॥

तामुग्रकालिकां नाम प्रसादयितुमर्हसि।
तस्याः स्तोत्रं महापुण्यं स्वयं काल्या प्रकाशितम्॥१०॥

उस उग्रकालिका के नामरूपी महत् प्रसादस्वरूप स्तोत्र (जो देवी को अत्यधिक प्रसन्नता देता है। जिसे स्वयं काली ने ही प्रकाशित किया है॥१०॥

तव तत् कथयिष्यामि श्रुत्वा वत्सावधारय।
गोपनीयं प्रयत्नेन पठनीयं परात्परम्॥११॥

उस महत् स्तोत्र को तुमसे कहता हूँ, सावधान होकर सुनकर धारण करके इसे प्रयत्न पूर्वक गोपनीय रखना तथा प्रयत्नपूर्वक पाठ करना चाहिए॥११॥

यस्यैककालपठनात् सर्वे विघ्नाः समाकुलाः।
नश्यन्ति दहने दीप्ते पतङ्गा इव सर्वतः॥१२॥

इसके एक काल (एक बार) पाठ करने मात्र से सभी विघ्नों के समुदाय जैसे अग्नि में पतङ्ग आ करके हमेशा नष्ट हो जाते हैं, उसी प्रकार से नष्ट हो जाते हैं॥१२॥

गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत्।
तस्य दर्शनमात्रेण वादिनो निष्प्रभा मताः॥१३॥

इस महास्तोत्र के पाठ करने मात्र से पाठ कर्त्ता की गद्यपद्यमयी वाणी गङ्गा के प्रवाह के समान हो जाती है। उसके दर्शन मात्र से वादी समुदाय निष्प्रभ हो जाता है॥१३॥

राजानोऽपि च दासत्वं भजन्ति च परे जनाः।
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः॥१४॥

इस महास्तोत्र के पाठ करने मात्र से ही राजा भी दास हो जाते हैं, अन्य जन तो भक्त होकर भजने लग जाते हैं तथा पाठक के हाथ में सदैव ही सभी सिद्धियाँ रहती हैं, इसमें कोई संशय नहीं है॥१४॥

निशीथे मुक्तये शम्भुर्नग्नः शक्तिसमन्वितः।
मनसा चिन्तयेत् काली महाकालीति लालिताम्॥१५॥

महानिशाकाल में दिगम्बर (निरावरण) शम्भु का शक्ति के साथ समन्वित होकर, शिवशक्ति का मेलन कर, मन में काली का ध्यान करते हुए पाठ करने से महाकाली उसका लालन करती है, अर्थात् गणेश के समान रिद्धि-सिद्धि का स्वामी हो जाता है तथा कालिका से सदैव रक्षित रहता है॥१५॥

पठेत् सहस्रनामाख्यं स्तोत्रं मोक्षस्य साधनम्।
प्रसन्ना कालिका तस्य पुत्रत्वेनानुकम्पते॥१६॥

इस मोक्ष का साधन सहस्रनामस्तोत्र का पाठ करनेवाले पर कालिका प्रसन्न होकर पुत्र के समान लालन करती है॥१६॥

वेधा ब्रह्मा स्मृतेर्ब्रह्मकुसुमैः पूजिता परा।
प्रसीदति तथा काली यथानेन प्रसीदति॥१७॥

सहस्रार का वेध (भेदन) करके सहस्रकमल पर ब्रह्मकुसुम से जो ब्रह्मस्वरूपिणी परादेवता का पूजा करता है उसपर काली सदा प्रसन्न रहती है। वैसे ही इस सहस्रनाम का पाठ करने से काली प्रसन्न होती है॥१७॥

विनियोग:—**ॐ अस्य श्रीकालिकासहस्रनामस्तोत्रमहामन्त्रस्य महाकालभैरव ऋषिः अनुष्टुप्छन्दः श्रीमहाकालिकादेवतामहाविद्याप्रसादसिद्ध्यर्थे जपे पाठे विनियोगः।**

ध्यानम्—

शिवारूढां महाभीमां घोरदंष्ट्रां हसन्मुखीम्।
चतुर्भुजां खड्गमुण्डवराभयकरां शिवाम्॥
मुण्डमालाधरां देवीं लोलजिह्वां दिगम्बराम्।
एवं सञ्चिन्तयेत् कालीं श्मशानालयवासिनीम्॥

शिव पर आरूढ़ महाभीम, घोर दंष्ट्रवाली, हँसते हुए मुखवाली, चार भुजाओं में खड्ग-मुण्ड-वर-अभय धारण किये हुए शिवा, मुण्डमाला को धारण किये हुए लोलजिह्वा (जिह्वाको को लटकाई हुई) दिगम्बर श्मशान में निवास करनेवाली काली का ध्यान करना चाहिए।

सहस्रनामस्तोत्रम्

ॐ क्रीं महाकाल्यै नमः

ॐ श्मशानकालिका काली भद्रकाली कपालिनी।
गुह्यकाली महाकाली कुरुकुल्लाऽविरोधिनी॥१॥
कालिका कालरात्रिश्च महाकालनितम्बिनी।
कालभैरवभार्या च कुलवर्त्मप्रकाशिनी॥२॥
कामदा कामिनी काम्या कमनीया सुभाविनी।
कस्तूरीरसनीलाङ्गी कुञ्जरेश्वरगामिनी॥३॥
ककारवर्णसर्वाङ्गी कामिनी कामसुन्दरी।
कामार्त्ता कामरूपा च कामधेनु कलावती॥४॥
कान्ता कामस्वरूपा च कामाख्या कुलपालिनी।
कुलीना कुलवत्यम्बा दुर्गा दुर्गार्तिनाशिनी॥५॥

कौमारी कुलजा कृष्णा कृष्णदेहा कृशोदरी।
कृशाङ्गी कुलिशाङ्गी च क्रीँकारी कमला कला॥६॥
करालस्था कराली च कुलकान्ताऽपराजिता।
उग्रा चोग्रप्रभा दीप्ता विप्रचित्ता महाबला॥७॥
नीला घना बलाका च मात्रा मुद्रासिताऽसिता।
ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्सला॥८॥
माहेश्वरी च चामुण्डा वाराही नारसिंहिका।
वज्राङ्गी वज्रकंकाली नृमुण्डस्त्रग्विणी शिवा॥९॥
मालिनी नरमुण्डाली गलद्रक्तविभूषणा।
रक्तचन्दनसिक्ताङ्गी सिन्दूरारुणमस्तका।!१०॥
घोररूपा घोरदंष्ट्रा घोरा घोरतरा शुभा।
महादंष्ट्रा महामाया सुदती युगदन्तुरा॥११॥
सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना।
शारदेन्दुप्रसन्नास्या स्फुरत् स्मेराम्बुजेक्षणा॥१२॥
अट्टहासा प्रसन्नास्या स्मेरवक्त्रा सुभाषिणी।
प्रसन्नपद्मवदना स्मितास्या प्रियभाषिणी॥१३॥
कोटराक्षी कुलश्रेष्ठा महती बहुभाषिणी।
सुमतिः कुमतिश्चण्डा चण्डमुण्डातिवेगिनी॥१४॥
प्रचण्डा चण्डिका चण्डी चर्चिका चण्डवेगिनी।
सुकेशी मुक्तकेशी च दीर्घकेशी महत्कुचा॥१५॥
प्रेतदेहा कर्णपूरा प्रेतपाणी सुमेखला।
प्रेतासना प्रियप्रेता प्रेतभूमिकृतालया॥१६॥
श्मशानवासिनी पुण्या पुण्यदा कुलपण्डिता।
पुण्यालया पुण्यदेहा पुण्यश्लोकी च पावनी॥१७॥
पुत्रा पवित्रा परमा पुरा पुण्यविभूषणा।
पुण्यनाम्नी भीतिहरा वरदा खड्गपाणिनी॥१८॥
नृमुण्डहस्ता शस्ता च छिन्नमस्ता सुनासिका।
दक्षिणा श्यामला श्यामा शान्ता पीनोन्नतस्तनी॥१९॥
दिगम्बरा घोररावा सृकान्ता रक्तवाहिनी।
घोररावा शिवा खड्गा विशंका मदनातुरा॥२०॥
मत्ता प्रमत्ता प्रमदा सुधासिन्धुनिवासिनी।
अतिमत्ता महामत्ता सर्वाकर्षणकारिणी॥२१॥

गीतप्रिया वाद्यरता प्रेतनृत्यपरायणा।
चतुर्भुजा दशभुजा अष्टादशभुजा तथा॥२२॥
कात्यायनी जगन्माता जगती परमेश्वरी।
जगद्बन्धुर्जगद्धात्री जगदानन्दकारिणी॥२३॥
जगन्मयी हैमवती महामाया महामहा।
नागयज्ञोपवीताङ्गी नागिनी नागशायिनी॥२४॥
नागकन्या देवकन्या गन्धर्वी किन्नरेश्वरी।
मोहरात्री महारात्री दारुणा भासुराम्बरा॥२५॥
विद्याधरी वसुमती यक्षिणी योगिनी जरा।
राक्षसी डाकिनी वेदमयी वेदविभूषणा॥२६॥
श्रुतिः स्मृतिर्महाविद्या गुह्यविद्या पुरातनी।
चिन्त्याऽचिन्त्या स्वधा स्वाहा निद्रा तन्द्रा च पार्वती॥२७॥
अपर्णा निश्चला लोला सर्वविद्या तपस्विनी।
गङ्गा काशी शची सीता सती सत्यपरायणा॥२८॥
नीतिस्सुनीतिस्सुरुचिः तुष्टिः पुष्टिर्धृतिः क्षमा।
वाणी बुद्धिः महालक्ष्मी लक्ष्मी नीलसरस्वती॥२९॥
स्रोतस्वती सरस्वती मातङ्गी विजया जया।
नदी सिन्धुः सर्वमयी तारा शून्यनिवासिनी॥३०॥
शुद्धा तरङ्गिणी मेधा लाकिनी बहुरूपिणी।
स्थूला सूक्ष्मा सूक्ष्मतरा भगवत्यनुरूपिणी॥३१॥
परमाणुस्वरूपा च चिदानन्दस्वरूपिणी।
सदानन्दमयी सत्या सर्वानन्दस्वरूपिणी॥३२॥
सुनन्दा नन्दिनी स्तुत्या स्तवनीयस्वभाविनी।
रंगिणी टंगिनी चित्रा विचित्रा चित्ररूपिणी॥३३॥
पद्मा पद्मालया पद्ममुखी पद्मविभूषणा।
डाकिनी शाकिनी क्षान्ता राकिनी रुधिरप्रिया॥३४॥
भ्रान्तिर्भवानी रुद्राणी मृडानी शत्रुमर्दिनी।
उपेन्द्राणी महेन्द्राणी ज्योत्स्ना चन्द्रस्वरूपिणी॥३५॥
सूर्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान्।
शक्तिर्भुक्तिर्माता भक्तिर्मुक्तिः पतिव्रता॥३६॥
सर्वेश्वरी सर्वमाता सर्वाणी हरवल्लभा।
सर्वज्ञा सिद्धिदा सिद्धा भव्या भाव्या भयापहा॥३७॥

कर्त्री हर्त्री पालयित्री शर्वरी तामसी दया।
तमिस्त्रा तामसी स्थाणुः स्थिरा धीरा तपस्विनी॥३८॥
चार्वङ्गी चञ्चला लोलजिह्वा चारुचरित्रिणी।
त्रपा त्रपावती लज्जा विलज्जा हरयौवनी॥३९॥
सत्यवती धर्मनिष्ठा श्रेष्ठा निष्ठुरवादिनी।
गरिष्ठा दुष्टसंहर्त्री विशिष्टा श्रेयसी घृणा॥४०॥
भीमा भयानका भीमनादिनी भीः प्रभावती।
वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुःप्रिया॥४१॥
ऋक्सामाथर्वनिलया रागिणी शोभना सुरा।
कलकण्ठी कम्बुकण्ठी वेणुवीणापरायणा॥४२॥
वंशिनी वैष्णवी स्वेच्छा धात्री त्रिजगदीश्वरी।
मधुमतिः कुण्डलिनी ऋद्धिः शुद्धिः शुचिस्मिता॥४३॥
रम्भोर्वशी रती रामा रोहिणी रेवती मखा।
शंखिनी चक्रिणी कृष्णा गदिनी पद्मिनी तथा॥४४॥
शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपाणिनी।
पिनाकधारिणी धूम्रा सुरभी वनमालिनी॥४५॥
रथिनी समरप्रीता वेगिनी रणपण्डिता।
जडिनी वज्रिणी नीललावण्याम्बुदचन्द्रिका॥४६॥
बलिप्रिया सदा पूज्या दैत्येन्द्रमथिनी तथा।
महिषासुरसंहर्त्री कामिनी रक्तदन्तिका॥४७॥
रक्तपा रुधिराक्ताङ्गी रक्तखर्परधारिणी।
रक्तप्रिया मांसरुचिः वासवासक्तमानसा॥४८॥
गलच्छोणितमुण्डाली कण्ठमालाविभूषणा।
शवासना चितान्तःस्था महेशी वृषवाहिनी॥४९॥
व्याघ्रत्वगम्बरा चीनचैलिनी सिंहवाहिनी।
वामदेवी महादेवी गौरी सर्वज्ञभामिनी॥५०॥
बालिका तरुणी वृद्धा वृद्धमाता जरातुरा।
सुभ्रूर्विलासिनी ब्रह्मवादिनी ब्राह्मिणी सती॥५१॥
सुप्तवती चित्रलेखा लोपामुद्रा सुरेश्वरी।
अमोघाऽरुन्धती तीक्ष्णा भोगवत्यनुरागिणी॥५२॥
मन्दाकिनी मन्दहासा ज्वालामुख्याऽसुरान्तका।
मानदा मानिनी मान्या माननीया मदातुरा॥५३॥

मदुरा मेदुरोन्मादा मेध्या साध्या प्रसादिनी।
सुमेध्याऽनन्तगुणिनी सर्वलोकोत्तमोत्तमा॥५४॥
जयदा जित्वरी जैत्री जयश्रीर्जयशालिनी।
सुखदा शुभदा सत्या सभासंक्षोभकारिणी॥५५॥
शिवदूती भूतमती विभूतिर्भूषणानना।
कौमारी कुलजा कुन्ती कुलस्त्री कुलपालिका॥५६॥
कीर्तिर्यशस्विनी भूषा भूष्टा भूतपतिप्रिया।
सुगुणा निर्गुणाऽधिष्ठा निष्ठा काष्ठा प्रकाशिनी॥५७॥
धनिष्ठा धनदा धान्या वसुधा सुप्रकाशिनी।
उर्वी गुर्वी गुरुश्रेष्ठा षड्गुणा त्रिगुणात्मिका॥५८॥
राजामाज्ञा महाप्राज्ञा सगुणा निर्गुणात्मिका।
महाकुलिना निष्कामा सकामा कामजीवना॥५९॥
कामदेवकला रामाऽभिरामा शिवनर्तकी।
चिन्तामणिः कल्पलता जाग्रती दीनवत्सला॥६०॥
कार्तिकी कृत्तिका कृत्या अयोध्या विषमा समा।
सुमन्त्रा मन्त्रिणी घूर्णा ह्लादिनी क्लेशनाशिनी॥६१॥
त्रैलोक्यजननी हृष्टा निर्मांसाऽमलरूपिणी।
तटङ्कनिम्नजठरा शुष्कमांसास्थिमालिनी॥६२॥
अवन्ती मधुरा हृद्या त्रैलोक्या पावनक्षमा।
व्यक्ताऽव्यक्ताऽनेकमूर्ती शौरभी भीमनादिनी॥६३॥
क्षेमंकरी शाङ्करी च सर्वसम्मोहकारिणी।
ऊर्ध्वा तेजस्विनी क्लिन्ना महातेजस्विनी तथा॥६४॥
अद्वैता योगिनी पूज्या सुरभी सर्वमङ्गला।
सर्वप्रियङ्करी भोग्या धनिनी पिशिताशना॥६५॥
भयङ्करी पापहरा निष्कलंका वशङ्करी।
आशा तृष्णा चन्द्रकला निद्राकोटिसमप्रभा॥६६॥
सहस्त्रसूर्यसङ्काशा चन्द्रकोटिसमप्रभा।
निशुम्भशुम्भसंहर्त्री रक्तबीजविनाशिनी॥६७॥
मधुकैटभसंहर्त्री महिषासुरघातिनी।
वह्निमण्डलमध्यस्था सर्वसत्त्वप्रतिष्ठिता॥६८॥
सर्वाचारवती सर्वदेवकन्याऽतिदेवता।
दक्षकन्या दक्षयज्ञनाशिनी दुर्गतारिणी॥६९॥

इज्या पूज्या विभा भूतिः सत्कीर्तिर्ब्रह्मचारिणी।
रंभोरुश्चतुरा राका जयन्ती वरुणा कुहूः॥७०॥
मनस्विनी देवमाता यशस्या ब्रह्मवादिनी।
सिद्धिदा वृद्धिदा वृद्धिः सर्वाद्या सर्वदायिनी॥७१॥
आधाररूपिणी धेया मूलाधारनिवासिनी।
आज्ञा प्रज्ञा पूर्णमना चन्द्रमुख्यनुकूलिनी॥७२॥
वावदूका निम्ननाभिः सत्यसन्धा दृढव्रता।
आन्वीक्षिकी दण्डनीतिस्त्रयीस्त्रिदिवसुन्दरी॥७३॥
ज्वालिनी ज्वलिनी शैलतनया विन्ध्यवासिनी।
प्रत्यया खेचरी धैर्या तुरीया विमलातुरा॥७४॥
प्रगल्भा वारुणी क्षामा दर्शिनी विस्फुलिङ्गिनी।
भक्तिःसिद्धिः सदाप्राप्तिः प्रकाम्या महिमाऽणिमा॥७५॥
इच्छा सिद्धिर्वशित्वा च ईशित्योर्ध्वनिवासिनी।
लघिमा चैव सावित्री गायत्री भुवनेश्वरी॥७६॥
मनोहरा चिता दिव्या देव्युदारा मनोरमा।
पिङ्गला कपिला जिह्वा रसज्ञा रसिका रसा॥७७॥
सुषुम्नेडा योगवती गान्धारी नवकान्तका।
पाञ्चाली रुक्मिणी राधाऽऽराध्या भीमा च राधिका॥७८॥
अमृता तुलसीवृन्दा कैटभी कपटेश्वरी।
उग्रचण्डेश्वरी वीरजननी वीरसुन्दरी॥७९॥
उग्रतारा यशोदाख्या देवकी देवमानिता।
निरञ्जना चित्रदेवी क्रोधिनी कुलदीपिका॥८०॥
कुलरागीश्वरी ज्वाला मात्रिका द्राविणी द्रवा।
योगीश्वरी महामारी भ्रामरी बिन्दुरूपिणी॥८१॥
दूती प्राणेश्वरी गुप्ता बहुला डामरी प्रभा।
कुब्जिका ज्ञानिनी ज्येष्ठा भुशुण्डी प्रकटाकृतिः॥८२॥
द्राविणी गोपिनी माया कामबीजेश्वरी प्रिया।
शाकम्भरी कोकनदा सुसत्या च तिलोत्तमा॥८३॥
अमेया विक्रमा क्रूरा सम्यक् शीला त्रिविक्रमा।
स्वस्तिर्हव्यवहा प्रीती रुक्मा धूम्रार्चिरंगदा॥८४॥
तपिनी तापिनी विश्वा भोगदा धारिणी धरा।
त्रिखण्डा रोधिनी वश्या सकला शब्दरूपिणी॥८५॥

बीजरूपा महामुद्रा वशिनी योगरूपिणी।
अनङ्गकुसुमाऽनङ्गमेखलाऽनङ्गरूपिणी ॥८६॥
अनङ्गमदनाऽनङ्गरेखानङ्गकुशेश्वरी ।
अनङ्गमालिनी कामेश्वरी सर्वार्थसाधिका॥८७॥
सर्वतन्त्रमयी सर्वमोदिन्यानन्दरूपिणी।
वज्रेश्वरी च जयिनी सर्वदुःखक्षयंकरी॥८८॥
षडङ्गयुवती योगे युक्ता ज्वालांशुमालिनी।
दुराशया दुराधारा दुर्जया दुर्गरूपिणी॥८९॥
दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा।
हंसेश्वरी त्रिलोकस्था शाकम्भर्यनुरागिणी॥९०॥
त्रिकोणनिलया नित्या परमामृतारञ्जिता।
महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी॥९१॥
त्वरिता भक्तिसंयुक्ता भक्तिवश्या सनातनी।
भक्तानन्दमयी भक्तभाविता भक्तवशंकरी॥९२॥
सर्वसौन्दर्यनिलया सर्वसौभाग्यशालिनी।
सर्वसंभोगभवना सर्वसौख्यानुरूपिणी॥९३॥
कुमारीपूजनरता कुमारीव्रतचारिणी।
कुमारीभक्तिसुखिनी कुमारीरूपधारिणी॥९४॥
कुमारीपूजकप्रीता कुमारीप्रीतिदप्रिया।
कुमारीसेवकासंगा कुमारीसेवकालया॥९५॥
आनन्दभैरवी बालभैरवी वटुकभैरवी।
श्मशानभैरवी कालभैरवी पुरभैरवी॥९६॥
महाभैरवपत्नी च परमानन्दभैरवी।
सुरानन्दभैरवी च उन्मादानन्दभैरवी॥९७॥
यज्ञानन्दभैरवी च तथा तरुणभैरवी।
ज्ञानानन्दभैरवी च अमृतानन्दभैरवी॥९८॥
महाभयंकरी तीव्रा तीव्रवेगा तपस्विनी।
त्रिपुरा परमेशानी सुन्दरी पुरसुन्दरी॥९९॥
त्रिपुरेशी पञ्चदशी पञ्चमी पुरवासिनी।
महासप्तदशी चैव षोडशी त्रिपुरेश्वरी॥१००॥
महांकुशस्वरूपा च महाचक्रेश्वरेश्वरी।
नवचक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी॥१०१॥

राजचक्रेश्वरी राज्ञी महात्रिपुरसुन्दरी।
सिन्दूरपूररुचिरा श्रीमत् त्रिपुरसुन्दरी॥१०२॥
सर्वाङ्गसुन्दरी रक्तारक्तवस्त्रोत्तरीयका।
यवा यावकसिन्दूररक्तचन्दनधारिणी॥१०३॥
यवा यावकसिन्दूररक्तचन्दनरूपधृक्।
चमरीबालकुटिला निर्मलश्यामकेशिनी॥१०४॥
वज्रमौक्तिकरत्नाढ्या किरीटकुण्डलोज्ज्वला।
रत्नकुण्डलसंयुक्ता स्फुरत् गण्डमनोरमा॥१०५॥
कुञ्जरेश्वरकुम्भोत्थ मुक्तरञ्जितनासिका।
मुक्ताविद्रुममाणिक्यहाराढ्यस्तनमण्डला ॥१०६॥
सूर्यकान्तेन्दुकान्ताढ्या स्पर्शाश्मगलभूषणा।
बीजपूरस्फुरद् बीजदन्तपंक्तिरनुत्तमा॥१०७॥
कामकोदण्डजाभग्ना भ्रूकटाक्षप्रवर्षिणी।
मातङ्गकुम्भवक्षोजा लसत्कनकदक्षिणा॥१०८॥
मनोज्ञा शष्कुलीकर्णा हंसीगतिविडम्बिनी।
पद्मरागाङ्गदद्योतद्दोश्चंतुष्कप्रकाशिनी ॥१०९॥
कर्पूरागरुकस्तूरि कुङ्कुमद्रवलेपिता।
विचित्ररत्नपृथिवी कल्पशाखितलस्थिता॥११०॥
रत्नदीपस्फुरत् रत्नसिंहासननिवासिनी।
षट्चक्रभेदनकरी परमानन्दरूपिणी॥१११॥
सहस्रदलपद्मान्ता चन्द्रमण्डलवर्तिनी।
ब्रह्मरूपा शिवक्रोडा नानासुखविलासिनी॥११२॥
हरविष्णुविरिञ्चेन्द्र गृहनायकसेविता।
शिवा शैवा च रुद्राणी तथैव शिवनादिनी॥११३॥
महादेवप्रिया देवी तथैवानङ्गमेखला।
डाकिनी योगिनी चैव तथोपयोगिनी मता॥११४॥
माहेश्वरी वैष्णवी च भ्रामरी शिवरूपिणी।
अलम्बुसा भोगवती क्रोधरूपा सुमेखला॥११५॥
गान्धारी हस्तिजिह्वा च इडा चैव शुभङ्करी।
पिङ्गला दक्षसूत्री च सुषुम्ना चैव गन्धिनी॥११६॥
भगात्मिका भगाधारा भगेशी भगरूपिणी।
लिङ्गाख्या चैव कामेशी त्रिपुरा भैरवी तथा॥११७॥

लिङ्गगीतिस्सुगीतिश्च लिङ्गस्था लिङ्गरूपधृक्।
लिङ्गमाला लिङ्गभवा लिङ्गालिङ्गा च पावकी॥११८॥
भगवती कौशिकी च प्रेमरूपा प्रियंवदा।
गृध्ररूपी शिवारूपा चक्रेशी चक्ररूपधृक्॥११९॥
आत्मयोनिः ब्रह्मयोनिः जगद्योनिरयोनिजा।
भगरूपा भगस्थात्री भगिनी भगमालिनी॥१२०॥
भगात्मिका भगाधारारूपिणी भगशालिनी।
लिङ्गाभिधायिनी लिङ्गप्रिया लिङ्गनिवासिनी॥१२१॥
लिङ्गस्था लिङ्गिनी लिङ्गरूपिणी लिङ्गसुन्दरी।
लिङ्गगीतिर्महाप्रीतिर्भगगीतिर्महासुखा ॥१२२॥
लिङ्गनामसदानन्दा भगनामसदागतिः।
भगनामसदानन्दा लिङ्गनामसदारतिः॥१२३॥
लिङ्गमालाकराभूषा भगमालाविभूषणा।
भगलिङ्गामृतवृता भगलिङ्गामृतात्मिका॥१२४॥
भगलिङ्गार्चनप्रीता भगलिङ्गस्वरूपिणी।
भगलिङ्गस्वरूपा च भगलिङ्गसुखावहा॥१२५॥
स्वयम्भूकुसुमप्रीता स्वयम्भूकुसुमार्चिता।
स्वयम्भूकुसुमप्राणा स्वयम्भूकुसुमोत्थिता॥१२६॥
स्वयम्भूकुसुमस्नाता स्वयम्भूपुष्पतर्पिता।
स्वयम्भूपुष्पघटिता स्वयम्भूपुष्पधारिणी॥१२७॥
स्वयम्भूपुष्पतिलका स्वयम्भूपुष्पचर्चिता।
स्वयम्भूपुष्पनिरता स्वयम्भूकुसुमाग्रहा॥१२८॥
स्वयम्भूपुष्पयज्ञेशा स्वयम्भूकुसुमालिका।
स्वयम्भूपुष्पनिचिता स्वयम्भूकुसुमार्चिता॥१२९॥
स्वयम्भूकुसुमादानलालसोन्मत्तमानसा ।
स्वयम्भूकुसुमानन्दलहरीस्निग्धदेहिनी ॥१३०॥
स्वयम्भूकुसुमाधारा स्वयम्भूकुसुमाकुला।
स्वयम्भूपुष्पनिलया स्वयम्भूपुष्पवासिनी॥१३१॥
स्वयम्भूकुसुमस्निग्धा स्वयम्भूकुसुमात्मिका।
स्वयम्भूपुष्पकरिणी स्वयम्भूपुष्पमालिका॥१३२॥
स्वयम्भूकुसुमन्यासा स्वयम्भूकुसुमप्रभा।
स्वयम्भूकुसुमज्ञाना स्वयम्भूपुष्पभोगिनी॥१३३॥

स्वयम्भूकुसुमोल्लासा स्वयम्भूपुष्पवर्षिणी।
स्वयम्भूकुसुमानन्दा स्वयम्भूपुष्पपुष्पिणी॥१३४॥
स्वयम्भूकुसुमोत्साहा स्वयम्भूपुष्परूपिणी।
स्वयम्भूकुसुमोन्मादा स्वयम्भूपुष्पसुन्दरी॥१३५॥
स्वयम्भूकुसुमाराध्या स्वयम्भूकुसुमोद्भवा।
स्वयम्भूकुसुमाव्यग्रा स्वयम्भूपुष्पपूर्णिता॥१३६॥
स्वयम्भूपूजकप्रज्ञा स्वयम्भूहोतृमात्रिका।
स्वयम्भूदातृरक्षिता स्वयम्भूभक्तभाविका॥१३७॥
स्वयम्भूकुसुमप्रीता स्वयम्भूपूजकप्रिया।
स्वयम्भूवन्दकाधारा स्वयम्भूनिन्दकान्तका॥१३८॥
स्वयम्भूप्रदसर्वस्वा स्वयम्भूप्रदपुत्रिणी।
स्वयम्भूप्रदसस्मेरा स्वयम्भूतशरीरिणी॥१३९॥
सर्वलोकोद्भभवप्रीता सर्वलोकोद्भवात्मिका।
सर्वकालोद्भवोद्भवा सर्वलोकोद्भवोद्भवा॥१४०॥
कुन्दपुष्पसमाप्रीतिः कुन्दपुष्पसमारतिः।
कुन्दगोलोद्भवप्रीता कुन्दगोलोद्भवात्मिका॥१४१॥
स्वयम्भूर्वा शिवा शक्ता पाविनी लोकपावनी।
कीर्तिर्यशस्विनी मेधा विमेधा सुरसुन्दरी॥१४२॥
अश्विनी कृत्तिका पुष्या तेजस्वी चन्द्रमण्डला।
सूक्ष्मा सूक्ष्मप्रदा सूक्ष्मा सूक्ष्मभयविनाशिनी॥१४३॥
वरदाऽभयदा चैव मुक्तिबन्धविनाशिनी।
कामुकी कामदा कान्ता कामाख्या कुलसुन्दरी॥१४४॥
सुखदा दुःखदा मोक्षा मोक्षादर्थप्रकाशिनी।
दुष्टादुष्टमती चैव सर्वकार्यविनाशिनी॥१४५॥
शुक्रधारा शुक्ररूपा शुक्रसिन्धुनिवासिनी।
शुक्रालया शुक्रभोगा शुक्रपूज्या सदारती॥१४६॥
शुक्रपूजा शुक्रदेहा शुक्रपूजकवत्सला।
शुक्रमूर्तिः शुक्रदेहा शुक्रपूजकपुत्रिणी॥१४७॥
शुक्रस्था शुक्रिणी शुक्रसंस्पृहा शुक्रसुन्दरी।
शुक्रस्नाता शुक्रकरी शुक्रसेव्यातिशुक्रिणी॥१४८॥
महाशुक्रा शुक्रभवा शुक्रवृष्टिविधायिनी।
शुक्राभिधेया शुक्रार्हा शुक्रवन्दकवन्दिता॥१४९॥

शुक्रानन्दकरी शुक्रसदानन्दविधायिनी।
शुक्रोत्साहा सदा शुक्रपूर्णा शुक्रमनोरमा॥१५०॥
शुक्रपूजकसर्वस्था शुक्रनिन्दकनाशिनी।
शुक्रात्मिका शुक्रसम्पत् शुक्राकर्षणकारिणी॥१५१॥
रक्ताशया रक्तभोगा रक्तपूजा सदारती।
रक्तपूज्या रक्तहोमा रक्तस्था रक्तवत्सला॥१५२॥
रक्तपूर्णा रक्तदेहा रक्तपूजकपुत्रिणी।
रक्ताख्या रक्तिनी रक्तसंस्पृहा रक्तसुन्दरी॥१५३॥
रक्ताभिदेहा रक्तार्हा रक्तवन्दकवन्दिता।
महारक्ता रक्तभवा रक्तवृष्टिविधायिनी॥१५४॥
रक्तस्नाता रक्तप्रीता रक्तसेव्यातिरक्तिनी।
रक्तानन्दकरी रक्तसदानन्दविधायिनी॥१५५॥
रक्तारक्ता रक्तपूर्णा रक्तसेव्यक्षिणी रमा।
रक्तसेवकसर्वस्वा रक्तनिन्दकनाशिनी॥१५६॥
रक्तात्मिका रक्तरूपा रक्ताकर्षणकारिणी।
रक्तोत्साहा रक्तव्यग्रा रक्तपानपरायणा॥१५७॥
शोणितानन्दजननी कल्लोलस्निग्धरूपिणी।
साधकान्तर्गता देवी पार्वती पापनाशिनी॥१५८॥
साधूनां हृदिसंस्थात्री साधकानन्दकारिणी।
साधकानां च जननी साधकप्रियकारिणी॥१५९॥
साधकप्रचुरानन्दसम्पत्तिसुखदायिनी ।
साधका साधकप्राणा साधकासक्तमानसा॥१६०॥
साधकोत्तमसर्वस्वा साधकाभक्तरक्तपा।
साधकानन्दसन्तोषा साधकारिविनाशिनी॥१६१॥
आत्मविद्या ब्रह्मविद्या परब्रह्मकुटुम्बिनी।
त्रिकूटस्था पञ्चकूटस्था सर्वकूटशरीरिणी॥१६२॥
सर्ववर्णमयी वर्णजपमालाविधायिनी।
इदं श्रीकालिकानाम्नां सहस्त्रं शिवभाषितम्॥१६३॥

फलश्रुतिः

गुह्यात्गुह्यतरं साक्षात्महापातकनाशनम्।
पूजाकाले निशीथे च सन्ध्ययोरुभयोरपि॥१॥

यह गुह्यात् गुह्यतर साक्षात् महापातक का नाश करनेवाला सहस्रनाम पूजाकाल में

अर्धरात्रि के समय तथा दोनों सन्ध्या के समय तथा मध्याह्न काल में पाठ करता है, उसके समस्त पातक नष्ट हो जाते हैं॥१॥

लभते गाणपत्यं स यः पठेत् साधकोत्तमः।
यः पठेत् पाठयेद्वापि शृणोति श्रावयेदपि॥२॥

जो साधकोत्तम इस सहस्रनाम का पाठ करता है अथवा पाठ कराता है, सुनता है तथा सुनाता है, वह गाणपत्य का लाभ करता है॥२॥

सर्वपापविनिर्मुक्तः स याति कालिकां पदम्।
श्रद्धयाऽश्रद्धया वापि यः कश्चिन्मानवः पठेत्॥३॥

इस सहस्रनाम का श्रद्धा या अश्रद्धा से जो कोई मानव पाठ करता है अथवा पाठ कराता है वह सभी पापों से छूटकर कालिका के लोक में वास करता है॥३॥

दुर्गादुर्गतरं तीर्त्वा स याति कालिकां पदम्।
बन्ध्या वा काकबन्ध्या वा मृतपुत्रा च याङ्गना॥४॥

दुर्गम दुर्गमतर भी दुस्तर कठिन काल को भी पार कर जाता है और कालिका पद को प्राप्त करता है। बन्ध्या हो या काकबन्ध्या हो या मृतपुत्रा हो या हीन अङ्गना हो॥४॥

श्रुत्वा स्तोत्रमिदं पुत्रान् लभन्ते चिरजीविनः।
यं यं कामयते कामं पठन् स्तोत्रमनुत्तमम्॥५॥

इस महास्तोत्र को पाठ करने मात्र से चिरञ्जीवी पुत्र प्राप्त करती है तथा जो-जो कामना करता हैं वह इस स्तोत्र के पाठ से प्राप्त करती है॥५॥

देवीवरप्रदानेन तं तं प्राप्नोति नित्यशः।
स्वयंभूकुसुमैः शुक्लैः सुगन्धी कुसुमान्वितैः॥६॥

सुगन्धित शुक्ल स्वयंभू कुसुम से युक्त करके जो साधक पाठ करता है वह देवी के वर को प्राप्त करके तत्तद् समस्त कामनाओं को नित्य ही प्राप्त करता है॥६॥

गुरुविष्णुमहेशानामभेदेन महेश्वरी।
समन्तात् भावयेन्मन्त्री महेशो नात्र संशयः॥७॥

गुरु ब्रह्म विष्णु महेश में केवल नाम भेद है इनका महेश्वरी के साथ अभेद मानते हुए जो भक्त ध्यान करता है, वह महेश हो जाता है। इसमें कोई संशय नहीं है॥७॥

स शाक्तः शिवभक्तो च स एव वैष्णवोत्तमः।
सम्पूज्य स्तौति यः कालीमद्वैतभावमावहन्॥८॥

जो अद्वैत भाव से काली का पूजन और स्तुति करता है, वही शाक्त है, वही शिवभक्त है, वही वैष्णवों में उत्तमोत्तम है।

देव्यानन्देन सानन्दो देवीभक्त्यैकभक्तिमान्।
स एव धन्यो यस्यार्थे महेशो व्यग्रमानसः॥९॥

देवी से अनन्य भक्ति करनेवाले भक्त पर देवी प्रसन्न होकर पुत्रवत् स्नेह करती है, वह भक्त धन्य होता है जो सदैव माहेश्वरी के ध्यान में सतत निमग्न रहता है, वह शिव-भक्ति में लीन होकर मुक्त हो जाता है।

कामयित्वा यथाकामं स्तवमेनमुदीरयेत्।
सर्वरोगैः परित्यक्तो जायते मदनोपमः॥१०॥

इस स्तवन से समस्त कामनाओं की पूर्ति हो जाती है, सभी रोगों का हरण हो जाता है और साधक कामदेव के समान हो जाता है।

चक्रं वास्तवमेनं वा धारयेदङ्गसङ्गतम्।
विलिख्य विधिवत् साधुः स एव कालिकातनुः॥११॥

इस प्रकार का चक्रों में ध्यान करते हुए अथवा धारण करते हुए विधिपूवक चक्र को धारण करता है, उसके शरीर में कालिका का वास हो जाता है॥११॥

देव्यै निवेदितं यद्यत् तस्यां स भक्षयेन्नरः।
दिव्यदेहधरो भूत्वा देव्याः पार्श्वधरो भवेत्॥१२॥

देवी को निवेदित करके जो कुछ भी भोजन करता है, वह दिव्य देह धारण करके शिव स्वरूप हो जाता है अर्थात् वह रुद्र शरीरवाला हो जाता है॥१२॥

नैवेद्यनिन्दकं दृष्ट्वा नृत्यन्ती योगिनीगणाः।
रक्तपानोद्यताः सर्वा मांसास्थिचर्व्वणोद्यताः॥१३॥

काली के नैवेद्य की निन्दा करनेवाले को देख कर योगिनीगण नृत्य करती हैं तथा उसके रक्त का पान करने के लिए सदैव उद्यत रहती हैं, उसके मांस-अस्थि का चर्वण करने के लिए हमेशा तैयार रहती हैं॥१३॥

तस्मान्निवेद्यं देव्यै यद् दृष्ट्वा श्रुत्वा च मानवः।
न निन्देत् मनसा वाचा कुष्ठव्याधिपराङ्मुखाः॥१४॥

इसलिए देवी को निवेदन करके, देख करके, सुन करके मानवों को मन-वचन से भी निन्दा नही करना चाहिए॥१४॥

आत्मानं कालिकात्मानं भावयन् स्तौति यः शिवाम्।
शिवोपमं गुरुं ध्यात्वा स एव श्रीसदाशिवः॥१५॥

जो अपने आत्मा में कालिका की भावना से ध्यान करता है, स्तुति करता है, शिव का गुरु रूप से ध्यान करता है वह सदा शिव हो जाता है॥१५॥

यस्यालये तिष्ठति नूनमेतत्
स्तोत्रं भवान्या लिखितं विधिज्ञैः।
गोरोचनालक्तककुङ्कुमाक्त-
कर्पूरसिन्दूरमधुद्रवेण॥१६॥

जिसके घर में विधिपूर्वक भवानी का यह स्तोत्र लिखकर, स्थापितकर गोराचन-आलक्त-कुंकुम-कर्पूर-सिन्दूर-मधु-द्रव्यादि से पूजा जाता है।।१६।।

न तत्र चोरस्य भयं न हास्यो
न वैरिभिर्नाऽशनिवह्निभीतिः।
उत्पातवायोरपि नाऽत्र शंका
लक्ष्मीः स्वयं तत्र वसेदलोला।।१७।।

उसके घर में चौरादि भय नही होता, न शत्रुओं, शन्यादि ग्रहों, अग्न्यादि का भय ही रहता है, वाय्वादि के उत्पात की शंका भी नही रहती है, लक्ष्मी स्वयं उस गृह में स्थिर रूप से वास करती हैं।।१७।।

स्तोत्रं पठेदेतदनन्तपुण्यम्,
देवीपदाम्भोजपरो मनुष्यः।
विधानपूजाफलमेव सम्यक्,
प्राप्नोति सम्पूर्णमनोरथोऽसौ।।१८।।

इस महास्तोत्र का पाठ और महादेवी के चरण का सेवन अनन्त पुण्य प्रदान करने वाला है। विधिपूर्वक पूजा करनेवाला पूजा का सम्पूर्ण फल प्राप्त करता है और उसके समस्त मनोरथों की पूर्ति हो जाती है।।१८।

मुक्ताः श्रीचरणारविन्दनिरताः स्वर्गामिनो भोगिनो,
ब्रह्मोपेन्द्रशिवात्मकार्चनरता लोकेऽपि संलेभिरे।
श्रीमत् शंकरभक्तिपूर्वकमहादेवीपदध्यायिनो,
मुक्तिर्भुक्तिमतिःस्वयंस्तुतिपराभक्तिःकरस्थायिनी।।

जो साधक भूतभावन शिवशङ्कर का महादेवी के साथ ध्यान करता है और देवी के श्रीचरण तथा ब्रह्मा-विष्णु-शिव के सेवा में सतत निरत रहता है, वह समस्त भोगों को भोग करके स्वर्ग गमन करता है। जो साधक देवी की पराभक्ति में निरत रहता है, वह देवी की कृपा से मुक्ति-भुक्ति दोनों प्राप्त करता है।

कालीमहाविद्यासहस्रनामस्तोत्रं परिपूर्णम्

◆

अमोघशिवकवचम्

विनियोगः—**अस्य श्रीशिवकवचस्तोत्रमन्त्रस्य ब्रह्मात्रऋषिः, अनुष्टुप्छन्दः, श्रीसदाशिव रुद्रो देवता, श्री ह्रीं क्लीं बीजं, ह्रीँ शक्तिः, वं कीलकं सदाशिवप्रीत्यर्थे शिवकवचस्तोत्रजपे पाठे विनियोगः।**

ऋष्यादिन्यासः—तत्तदङ्गों का अनामिका अङ्गुलि से अङ्गुष्ठ को मिलाकर स्पर्श करे।

ॐ श्री ह्रीं क्लीं ब्रह्मर्षये नमः शिरसि।

ॐ श्री ह्रीं क्लीं अनुष्टुप्छन्दसे नमः मुखे।

ॐ श्री ह्रीं क्लीं श्रीसदाशिवरुद्राय नमः हृदि।

ॐ श्री ह्रीं क्लीं ह्रौं बीजाय नमः गुह्ये।

ॐ श्री ह्रीं क्लीं ह्रीँ शक्तये नमः पादयोः।

ॐ श्री ह्रीं क्लीं वँ कीलकाय नमः नाभौ।

ॐ श्री ह्रीं क्लीं श्रीसदाशिवरुद्राय नमः सर्वाङ्गे।

करन्यासः—तत्तदङ्गों का अनामिका अङ्गुलि से अङ्गुष्ठ को मिलाकर स्पर्श करे।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्ज्वालामालिने सर्वशक्तिधाम्ने ईशानात्मने अङ्गुष्ठाभ्यां नमः।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्ज्वालामालिने नित्यतृप्तिधाम्ने तत्पुरुषात्मने तर्जनीभ्यां नमः।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्ज्वालामालिने अनादिशक्तिधाम्ने अघोरात्मने मध्यमाभ्यां नमः।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्ज्वालामालिने स्वतन्त्रशक्तिधाम्ने वामदेवात्मने अनामिकाभ्यां नमः।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्ज्वालामालिने अलुप्तशक्तिधाम्ने सद्योजातात्मने कनिष्ठिकाभ्यां नमः।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्ज्वालामालिने अनादिशक्तिधाम्ने सर्वात्मने करतलकरपृष्ठाभ्यां नमः।

अङ्गन्यासः—तत्तदङ्गों का अनामिका अङ्गुलि से अङ्गुष्ठ को मिलाकर स्पर्श करे।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्ज्वालामालिने सर्वशक्तिधाम्ने ईशानात्मने हृदयाय नमः।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्ज्वालामालिने नित्यतृप्तिधाम्ने तत्पुरुषात्मने शिरसे स्वाहा।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्ज्वालामालिने अनादिशक्तिधाम्ने अघोरात्मने शिखायै वषट्।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्ज्वालामालिने स्वतन्त्रशक्तिधाम्ने वामदेवात्मने कवचाय हुम्।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्वालामालिने अलुप्तशक्तिधाम्ने सद्योजातात्मने नेत्रत्रयाय वौषट्।

ॐ श्री ह्रीं क्लीं नमो भगवते ज्वलज्वालामालिने अनादिशक्तिधाम्ने सर्वात्मने अस्त्राय फट्।

शङ्करध्यानम्

वज्रदंष्ट्रं त्रिनयनं कालकण्ठमरिन्दमम्।
सहस्रकरमप्युग्रं वन्दे शम्भुमुमापतिम्॥

कठोर दाँतोंवाले, तीन नेत्र से युक्त, कण्ठ में विष तथा हजारों तेज उग्र किरणों से युक्त उमापति शम्भु की वन्दना करते है।

अथापरं सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रम्।
जयप्रदं सर्वविपद्विमोचनं वक्ष्यामि शैवं कवचं हितायते॥

समस्त पुराणों में गोपनीय, सभी पापों की समस्त राशी को नष्ट करनेवाले, परम पवित्र, जय प्रदान करनेवाला, सभी विपत्तियों से छुटकारा दिलानेवाला, भक्तों के हित के लिए अमोघकवच कहता हूँ।

ध्यान करने के बाद मनोयोग से कवच का पाठ करे।

कवचम्

नमस्कृत्य महादेवं विश्वव्यापीनमीश्वरम्।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम्॥१॥

विश्वव्यापी ईश्वर महादेव को नमस्कार है, यह शिवमय वर्म सभी मनुष्यों की रक्षा करता है॥१॥

शुचौ देशे समासीनो यथावत्कल्पितासनः।
जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम्॥२॥

शुद्ध होकर, शुद्ध स्थान में जाकर, शुद्ध आसन स्थापित करके, जितेन्द्रिय होकर, प्राणायाम करके, इस अव्यय शिवकवच का चिन्तन (पाठ) करना चाहिये॥२॥

हृत्पुण्डरीकान्तरसन्निविष्टं स्वतेजसा व्याप्तनभोऽवकाशम्।
अतीन्द्रियं सूक्ष्ममनन्तमाद्यं ध्यायेत्परानन्दमयं महेशम्॥३॥

हृदय में पुण्डरीक के तेज से सन्निविष्ट, अपने तेज से व्याप्त आकाश में शान्त, अतीन्द्रिय, सूक्ष्म-अनन्त और सबसे आदि परानन्दमय महेश्वर का ध्यान करता हूँ॥३॥

ध्यानावधूताखिलकर्मबन्धश्चिरं चिदानन्दनिमग्नचेताः।
षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम्॥४॥

समस्त कर्म के बन्धन से मुक्त करनेवाले, चिर स्थिर, चिदानन्द में निमग्न चित्त,

षड्क्षर के न्यास में समाहित आत्मरूप शिव कवच के द्वारा हमारी रक्षा करें॥४॥

मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे।
तन्नाम दिव्यं परमन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम्॥५॥

समस्त देवताओं के आत्मारूप शिवशङ्कर हमारी रक्षा करें, हम इस भयंकर संसार-रूपी कूप में गिरे हुए हैं, आपका दिव्य नाम जो परमन्त्र का मूल है उसे अपने कल्याण के लिए हृदय में ध्यान पूर्वक जप करता हूँ, जो सभी दुःखों को नष्ट करनेवाला है॥५॥

सङ्कल्पः—पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च शनिप्रीतये दधिमाषभक्तबलिदानकर्म करिष्ये।

ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये॥ शंय्योरभिस्रवन्तुनꣳ॥

ॐ भूर्भुवः स्वः यमप्रजापतिरूपाधिदेवताप्रत्यधिदेवतासहिताय शनैश्चराय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ भूर्भुवः स्वः यमप्रजापतिरूपाधिदेवताप्रत्यधिदेवतासहिताय शनैश्चराय देयबलये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

शनैश्चराय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय यमप्रजापतिरूपाधिदेवताप्रत्यधिदेवतासहिताय इमं सदीप दधिमाषभक्तबलिं समर्पयामि।

भो यम प्रजापति रूपाधिदेवताप्रत्यधिदेवतासहिताय शनैश्चर! इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन अधिदेवताप्रत्यधिदेवतासहिताय शनैश्चरः प्रीयतां न मम।

राहवे बलिदानम्—राहु के लिए बलिदान प्रदान करे।

सङ्कल्पः—पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च राहुप्रीतये दधिमाषभक्तबलिदानकर्म करिष्ये।

ॐ कयानश्चित्रऽआभुवदूतीसदावृधꣳसखा॥ कयाशचिष्ठयाऽवृता॥

ॐ भूर्भुवः स्वः कालसर्परूपाधिदेवताप्रत्यधिदेवतासहिताय राहवे नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ भूर्भुवः स्वः कालसर्परूपाधिदेवताप्रत्यधिदेवतासहिताय राहवे देयबलये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

राहवे साङ्गायसपरिवारायसायुधायसशक्तिकाय कालसर्परूपाधिदेवताप्रत्यधिदेवतासहिताय इमं सदीपदधिमाषभक्तबलिं समर्पयामि।

भो कालसर्परूपाधिदेवताप्रत्यधिदेवतासहिताय राहु! इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन अधिदेवताप्रत्यधिदेवतासहिताय राहुः प्रीयतां न मम।

केतवे बलिदानम्—केतु के लिए बलिदान प्रदान करे।

सङ्कल्पः—पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च केतुप्रीतये दधिमाषभक्तबलिदानकर्म करिष्ये।

ॐ केतुंकृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे।। समुषद्भिरजायथाः।।

ॐ भूर्भुवः स्वः ब्रह्मचित्रगुप्तरूपाधिदेवताप्रत्यधिदेवतासहिताय केतवे नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ भूर्भुवः स्वः ब्रह्मचित्रगुप्तरूपाधिदेवताप्रत्यधिदेवतासहिताय केतवे देयबलये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

केतवे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय ब्रह्मचित्रगुप्तरूपाधिदेवताप्रत्यधिदेवतासहिताय इमं सदीपदधिमाषभक्तबलिं समर्पयामि।

भो ब्रह्मचित्रगुप्तरूपाधिदेवताप्रत्यधिदेवतासहिताय केतु! इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन अधिदेवताप्रत्यधिदेवतासहिताय केतुः प्रीयतां न मम।

पञ्चलोकपालादिबलिदानम्

एकतन्त्रेण पञ्चलोकपालानां बलिदानम्—

सङ्कल्पः—पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्ण फलप्राप्त्यर्थं च पञ्चलोकपालानां प्रीतये दधिमाषभक्तबलिदानकर्म करिष्ये।

ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वा निधिपतिꣳहवामहेव्वसोमम।। आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम्।। ॐ अम्बेऽ अम्बिकेऽम्बालिकेनमानयतिकश्श्चन।। ससस्त्यश्श्वकःसुभद्द्रिकाङ्का म्पीलवासिनीम्।। ॐ व्वायोयेतेसहस्रिणोरथासस्तेभिरागहि।। नियुत्त्वान्त्सोमपीतये।। ॐ घृतंघृतपावानः पिबतव्वसांव्वसापावानःपिबन्तान्तरिक्षस्यहविरसिस्वाहा।। दिशःप्प्रदिशऽआदिशो व्विदिशऽउद्दिशोदिग्भ्यःस्वाहा।। ॐ यावांकशामधुमत्याश्श्विनासूनृतावती।। तयायज्ञं मिमिक्षताम्।।

ॐ भूर्भुवः स्वः पञ्चलोकपालाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ भूर्भुवः स्वः पञ्चलोकपालाय देयबलये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

पञ्चलोकपालाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि।

भो पञ्चलोकपाल! इमं बलिं गृह्णन्तु मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदाः भवन्तु।

अनेन बलिदानेन गणेशादिपञ्चलोकपालाः प्रीयन्तां न मम।

गणेशाय बलिदानम्—गणेश के लिए बलिदान प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्ण फलप्राप्त्यर्थं च गणेशप्रीतये दधिमाषभक्तबलिदानकर्म करिष्ये।**

ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वा निधिपतिꣳहवामहेव्वसोमम।। आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम्।।

ॐ भूर्भुवः स्वः गणेशाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ भूर्भुवः स्वः गणेशाय देयबलये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

गणेशाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि।

भो गणेश! इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन गणेशः प्रीयतां न मम।

दुर्गायै बलिदानम्—दुर्गा के लिए बलिदान प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः------नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च दुर्गाप्रीतये दधिमाषभक्तबलिदानकर्म करिष्ये।**

ॐ अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्श्चन।। ससस्त्यश्श्वकः सुभद्रिकाङ्काम्पीलवासिनीम्।।

ॐ भूर्भुवः स्वः दुर्गायै नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ भूर्भुवः स्वः दुर्गायै देयबलये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

दुर्गायै साङ्गयै सपरिवारायै सायुधायै सशक्तिकायै इमं सदीपदधिमाषभक्त बलिं समर्पयामि।

भो दुर्गा! इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन दुर्गा प्रीयतां न मम।

वायवे बलिदानम्—वायु के लिए बलिदान प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः ------प्रवरः------नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च वायुप्रीतये दधिमाषभक्तबलिदानकर्म करिष्ये।**

ॐ व्वायो॒येतैंसहु॒स्रिणो॒रथा॑सु॒स्तेभि॒राग॑हि।। नि॒युत्त्वा॒न्त्सोम॑पीतये।।

ॐ भूर्भुवः स्वः वायवे नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ भूर्भुवः स्वः वायवे देयबलये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

वायवे साङ्गय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि।

भो वायु! इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन वायुः प्रीयतां न मम।

आकाशाय बलिदानम्—आकाश के लिए बलिदान प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः ------प्रवरः------नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च आकाशप्रीतये दधिमाषभक्तबलिदानकर्म करिष्ये।**

ॐ घृ॒तंघृ॑तपावानःपिबत॒व्वसां॑व्वसापावानःपिबन्ता॒न्तरि॑क्षस्यहु॒विर॑सि॒स्वाहा॑।। दिशः॑ प्प्र॒दिश॑ऽआ॒दिशो॑व्वि॒दिश॑ऽउ॒द्दिशो॑दिग्ग्भ्यः॒स्वाहा॑।।

ॐ भूर्भुवः स्वः आकाशाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ भूर्भुवः स्वः आकाशाय देयबलये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

आकाशाय साङ्गय सपरिवाराय सायुधायस शक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि।

भो आकाश! इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन आकाशः प्रीयतां न मम।

अश्विनीकुमारेभ्यः बलिदानम्—अश्विनीकुमारों के लिए बलिदान प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च अश्विनौप्रीतये दधिमाषभक्तबलिदानकर्म करिष्ये।**

ॐ याव॒ांकशा॒मधुमत्याश्श्विनासूनृतावती।। तयाय॒ज्ञंमिमिक्षताम्।।

ॐ भूर्भुवः स्वः अश्विनीभ्यां नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ भूर्भुवः स्वः अश्विनीभ्यां देयबलये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

अश्विनीभ्यां साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि।

भो अश्विनीकुमारौ! इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदोभव।

अनेन बलिदानेन अश्विनीकुमारौ प्रीयेतां न मम।

वास्तुपुरुषाय बलिदानम्—वास्तुदेवता के लिए बलिदान प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामोऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च वास्तोस्पतिप्रीतये दधिमाषभक्तबलिदानकर्म करिष्ये।**

ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवोभवानः।। यत्त्वेमहेप्रतितन्नो जुषस्वशन्नोभवद्विपदेशंचतुष्पदे।।

ॐ भूर्भुवः स्वः वास्तोस्पतये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ भूर्भुवः स्वः वास्तोस्पतये देयबलये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

वास्तोस्पते साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि।

भो वास्तोस्पति! इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदोभव।

अनेन बलिदानेन वास्तोस्पते प्रीयतां न मम।

क्षेत्रपालाय बलिदानम्—क्षेत्रपाल के लिए बलिदान प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः**

-----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्ण फलप्राप्त्यर्थं च क्षेत्रपालप्रीतये दधिमाषभक्तबलिदानकर्म करिष्ये।

ॐ न॒हिस्प्पश॒मविदन्न॒न्न्यम॒स्म्माद्वैश्श्वान॒रात्पुरऽएतारम॒ग्ग्नेः॥ एमैनमवृधन्नमृता॒ऽअमर्त्त्यंवैश्श्वन॒रंक्षैत्रजित्त्यायदेवाः॥

नमो वै क्षेत्रपालस्त्वं भूतप्रेतगणैः सह।
पूजां बलिं गृहाणेमं सौम्यो भवतु सर्वदा॥१॥

भूतप्रेतगणों के साथ क्षेत्रपाल आपको नमस्कार है, इस पूजा तथा बलि को ग्रहण करके सदा के लिए सौम्य तथा प्रसन्न हो जायें॥१॥

पुत्रान्देहि धनंदेहि सर्वान्कामांश्च देहि मे।
आयुरारोग्यं मे देहि निर्विघ्नं कुरु सर्वदा॥२॥

हमारी समस्त कामनाओं की पूर्ति करके हमें पुत्र, धन, आरोग्यता प्रदान करें तथा सदा सर्वदा निर्विघ्न करें॥२॥

ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ भूर्भुवः स्वः क्षेत्रपालाय देयबलये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

क्षेत्रपालाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय मारीगण-भैरव-राक्षस-कूष्माण्ड-वेताल-भूतप्रेत-पिशाच-डाकिनी-शाकिनी-पिशाचिनी-ब्रह्मराक्षसगणसहिताय इमं सदीपदधिमाषभक्तबलिं समर्पयामि।

भो क्षेत्रपाल! इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन क्षेत्रपालः प्रीयतां न मम।

प्रार्थना—

बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा।
मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगाः खगाः॥१॥

आदित्य, अष्टवसु, मरुतादि गण,अश्विनी कुमार, रुद्र, सुपर्ण, पन्नग, खग सभी इस बलि को ग्रहण करें॥१॥

असुरा यातुधानाश्च पिशाचोरगराक्षसाः।
डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः॥२॥

असुर, यातुधान, पिशाच, राक्षसादि, डाकिनी, यक्ष, वेताल, योगिनी, पूतनादि, शिवायें इस बलि को ग्रहण करें॥२॥

जृम्भकाः सिद्धगन्धर्वाः सौम्या विद्याधरा नगाः।
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः॥३॥

जृम्भक, सिद्ध, गन्धर्वादि, सौम्य, विद्याधर, पर्वत, दिग्पाल, लोकपाल तथा जो हमारे जीवन में विघ्न करनेवाले हैं सभी इस प्रदत्त बलि को ग्रहण करें॥३॥

जगतां शान्तिकर्तारा ब्रह्माद्याश्च महर्षयः।
मा विघ्नं मा च मे पापं मा सन्तु परिन्थिनः॥४॥

शान्ति प्रदान करनेवाले ब्रह्मा तथा ऋषि-महर्षि हमारे जीवन में विघ्न न करें, हमारे पापों का शमन करें, हमें पापमार्ग में न जाने दें॥४॥

सौम्यो भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः।
बलिं गृह्णन्तु ते सत्यं पालयन्ति सदा मम॥५॥

इस बलि को सभी भूतप्रेतादि सौम्य होकर ग्रहण करें तथा नित्य सदा सर्वदा हमारा पालन करें॥५॥

भूतानि यानीह वसन्ति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम्।
अन्यत्र वासं परिकल्पयन्तु रक्षन्तु मां तानि सदैव चात्र॥६॥

इस भूतल पर वास करनेवाले जो भूतप्रेतादि गण हैं हमारे द्वारा विधिपूर्वक प्रदान की हुई पूजा तथा बलि को ग्रहण करें एवं अपना वासस्थान कहीं अन्यत्र बना लें तथा हमारा जीवन निर्विघ्न करें॥६॥

अब्राह्मण नापितादि कोई यजमान के मस्तक पर वामावर्त घुमाकर बलि को घर के बाहर चौराहे पर ले जाकर रख दे तथा आचार्यादि ब्राह्मण सपत्नीयजमान के मस्तक पर अधोलिखित मन्त्र से जल छिड़कें।

ॐ हिङ्काराय स्वाहा हिंकृताय स्वाहा क्रन्दते स्वाहाऽव क्रन्दाय स्वाहा प्प्रोथते स्वाहा प्रप्पोथाय स्वाहा गन्धाय स्वाहा घ्राताय निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहाऽसीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्प्रबुद्धाय स्वाहा व्विजृम्भमाणाय स्वाहा व्विचृत्ताय स्वाहा सङ्हानाय स्वाहोपस्थिताय स्वाहाऽयनाय स्वाहा प्प्रायणाय स्वाहा॥

बलिदान के बाद हाथ पैर धोकर पूर्णाहुति करे।

बलिदानविधिः परिपूर्णम्

●

पूर्णाहुतिः

सङ्कल्पः—पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च वरदनामाग्नौ पूर्णाहुतिं होष्यामि॥

ॐ पूर्णादर्व्विपरापतसुपूर्ण्णापुनरापत॥ व्वस्नेवव्विक्क्रीणावहाऽइषमूर्ज्जꣳसतक्रतो÷॥ पुर्णाहुत्यै नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ॐ समुद्द्रादूर्म्मिर्म्मधुमाँ२॥ऽउदारदुपाꣳशुनासमममृतत्त्वमानट्घृतस्यनामगुह्यं य्यदस्तिजिह्वादेवानामृतस्यनाभि÷॥ व्वयंनामप्प्रब्व्वामाघृतस्यास्म्मिन्यज्ञेधारयामानमोभिः॥ उपब्रह्माश्श्रृमवच्छस्यमानंचतु÷श्रृङ्गोऽवमीद्गौरऽएतत्॥ चत्त्वारिश्श्रृङ्गा त्रयोऽअस्यपादाद्द्वेशीर्षेसप्तहस्तासोऽअस्य॥ त्रिधाबद्धोव्वृषभोरोरवीतिमहोदेवोमर्त्त्यार२ँ॥ऽआविवेश॥ त्रिधाहितंपणिभिर्ग्गुह्यमानंगविदेवासोघृतमन्न्वविन्दन्॥ इन्द्रऽएकꣳसूर्य्यऽएकञ्जजानव्वेनादेकꣳस्वधयानिष्टतक्षुः॥ एताऽअर्षन्तिहृद्यात्समुद्द्राच्छतव्व्रजारिपुणानावचक्षे॥ घृतस्यधाराऽअभिचाकशीमिहिरण्ण्ययोव्वेतसोमध्ध्यऽआसाम्॥ सम्म्यक्स्रवन्तिसरितानधेनाऽअन्तर्हृदामनसापूयमानाः॥ एतेऽअर्षन्त्यूर्म्मयोघृतस्यमृगाऽइवक्षिपणोरीषमाणः॥ सिन्धोरिवप्प्राध्ध्वनेशूघनासोव्वातप्प्रमियःपतयन्तियह्वाः॥ घृतस्यधाराऽअरुषोनव्वाजीकाष्ठाभिन्दन्नूर्म्मिभिःपिन्न्वमानः॥ अभिप्प्रवन्तसमनेवयोषाःकल्ल्याण्ण्यःस्म्मयमानासोऽअग्ग्निम्॥ घृतस्यधाराःसमिधोनसन्त ताजुषाणोहर्य्यतिजातवेदाः॥ कन्न्याऽइववहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि॥ यत्रसोम÷सूयतेयत्रयज्ञोघृतस्यधाराऽअभितत्पवन्ते॥ अभ्यर्षतसुष्टुतिंगव्व्यमाजिमस्म्मासुभद्द्राद्द्रविणानिधत्त॥ इमंयज्ञंनयतदेवतानोघृतस्यधारामधुमत्पवन्ते॥ धामन्तेव्विश्श्वंभुवनमधिश्श्रितमन्तःसमुद्द्रेहृद्द्यन्तरायुषि॥ अपामनीकेसमिथेयऽआभृतस्तमश्यामममधुमन्तंतऽऊर्म्मिम्॥ पुनस्त्वाऽऽदित्यारुद्द्रावसवःसमिन्धतांपुनर्ब्रह्माणोव्वसुनीथयज्ञैः॥ घृतेनत्वंतन्न्वंव्वर्द्धयस्वसत्त्याःसन्तुयजमानस्यकामाः॥ मूर्द्धानंदिवोऽअरतिंपृथिव्व्यावैश्श्वानरमृतऽआजातमग्ग्निम्॥ कविꣳसम्म्राजमतिथिंजनानामासन्नापात्रंजनयन्तदेवाः॥ पूर्णादर्व्विपरापतसुपूर्ण्णापुनरापत॥ व्वस्नेवव्विक्क्रीणावहाऽइषमूर्ज्जꣳशतक्रतो÷स्वाहा॥

इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवते अग्नयेऽद्भ्यश्च न मम॥

पूर्णाहुति करने के बाद वसोर्द्धारा होम करे ।

पूर्णाहुतिहोमः परिपूर्णम्

वसोर्द्धाराहोमः

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणसाङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च वसोर्द्धारा होष्यामि।**

कुण्ड के ऊपर पूर्व की तरफ करके उसके ऊपर घृतपात्र रखकर नीचे यव मात्र छिद्र रखकर अग्नि के ऊपर स्रुव के मुख में सुवर्णनिर्मित जिह्वा बाँध कर वसोर्द्धारा छोड़े।

ॐ सप्ततेऽअग्नेसमिधःसप्तजिह्वाःसप्तऽऋषयःसप्तधामप्प्रियाणि॥ सप्तहोत्राःसप्तधात्त्वायजन्तिसप्तयोनीरापृणस्वघृतेनस्वाहा॥ शुक्रज्ज्योतिश्च्चचित्रज्ज्योतिश्च्चसत्यज्ज्योतिश्च्चज्ज्योतिष्मॉंश्च्च॥ शुक्रश्च्चऋतपाश्च्चात्यꣳहाः॥ ईदृङ्प्रतिसदृङ्॥ मितश्च्चसम्मितश्च्चसभराः॥ ऋतश्च्चसत्यश्च्चध्रुवश्च्चधरुणश्च्च॥ धर्त्ताचविधर्त्ताचविधारयः॥ ऋतजिच्चसत्यजिच्चसेनजिच्चसुषेणश्च्च॥ अन्तिमित्रश्च्चदूरेऽअमित्रश्च्चगणः॥ ईदृक्षासऽएतादृक्षासऽऊपुणःसदृक्षासःप्रतिसदृक्षासऽएतन॥ मितासश्च्चसम्मितासोनोऽअद्यसभरसोमरुतोयज्ञेऽअस्मिन्॥ स्वतवाँश्चप्रघासीचसान्तपनश्च्चगृहमेधीच॥ क्रीडीचशाकीच्चोज्जेषी॥ इन्द्रंदैवीर्विशोमरुतोऽनुवर्त्मानोगऽभवन्यथेन्द्रंदैवीर्विशोमरुतोऽनुवर्त्मानो गऽभवन्॥ एवमिमंयजमानंदैवीश्च्चविशोमानुषीश्च्चानुवर्त्मानोभवन्तु॥ इमꣳस्तनमूर्ज्जस्वन्तंधयापांप्रपीनमग्नेसरिरस्यमद्ध्ये॥ उत्संजुषस्वमधुमन्तमर्वन्त्समुद्रियꣳसदनमाविशस्व॥ घृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्श्रितोघृतम्वस्यधाम॥ अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम्॥ ॐ वसोःपवित्रमसिशतधारंवसोःपवित्रमसिसहस्रधारम्॥ देवस्त्वा सवितापुनातुवसोःपवित्रेणशतधरिणसुप्वा॥ ॐ कामधुक्षः स्वाहा॥

इदमग्नये वैश्वानराय न मम॥

अग्निप्रदक्षिणा—हाथ जोड़कर परिवार एवं अन्य सहयोगियों के साथ सपत्नीयजमान अग्नि की प्रदक्षिणा करे।

ॐ अग्नेनयसुपथारायेऽअस्मान्विश्श्वानिदेववयुननिविद्वान्॥ युयोद्ध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमऽउक्तिंविधेम॥

परिक्रमा करके यजमान अग्नि के पश्चिम दिशा में पूर्वमुख बैठे।

श्रीमहाविद्यापुरश्चरणे हवनकर्म परिपूर्णम्

●

हवनीयकुण्डभस्मधारणम्

आचार्य कुण्ड के ईशानकोण से भस्म लेकर, पहले आचार्य के सहित समस्त ब्राह्मण फिर यजमान के शरीर में भस्म अनुलेपन करे।

ॐ त्र्यायु॒षं जमदग्नेः। मन्त्र से ललाट पर भस्म लगाये।

ॐ कश्यपस्य त्र्यायुषम्। मन्त्र से ग्रीवा पर भस्म लगाये।

ॐ यद्देवेषु॒ त्र्यायु॒षम्। मन्त्र से दक्षिणबाहुमूल पर भस्म लगाये।

ॐ तन्नोऽअस्तु त्र्यायुषम्। मन्त्र से हृदय पर भस्म लगाये।

संस्रवप्राशनम्। प्रोक्षणीपात्र जल का यजमान को प्राशन अथवा घ्राण कराये।

आचमनम्। पश्चात् आचमन कराये।

पवित्राभ्याम् मार्जनम्। प्रणीतापात्रस्थित पवित्री से मार्जन करे।

अग्नैपवित्रप्रतिपत्तिः। पवित्री को अग्नि में प्रक्षेप करे।

भस्मधारणं परिपूर्णम्

●

विभिन्नदानादिसङ्कल्पः

ब्रह्मणे पूर्णपात्रदानम्—यजमान ब्रह्मा के पूर्णपात्र दान करे।

सङ्कल्पः—**पूर्वोच्चाारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ--गोत्रः ------प्रवरः------नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च इदं पूर्णपात्रं सदक्षिणं अमुकगोत्राय अमुकप्रवराय अमुकनामधेयब्रह्मणे तुभ्यमहं सम्प्रददे॥**

ब्रह्मा पूर्णपात्र ग्रहणकर बोले—**ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु।**

प्रणीतापात्र के जल से ब्रह्मा सपत्नीयजमान के उपर उपयमनकुशा से मार्जन करे।

ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्ते कृण्वन्तु भेषजम्।

उपयमनकुशा का अग्नि मे प्रक्षेपकर, ब्रह्मग्रन्थि को खोल दें।

यजमानाय श्रेयोदानम्—आचार्यादि ब्राह्मण यजमान के लिए श्रेयोदान करे।

सङ्कल्पः—**पूर्वोच्चाारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ--गोत्रः ------प्रवरः------नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च यजमानाय श्रेयो दानं करिष्ये॥**

सौमनस्यमस्तु। पुष्प प्रदान करे।

अक्षतं चारिष्टं चास्तु। अक्षत प्रदान करे।

भवन्नियोगेन मया अस्मिन् श्रीमहाविद्यापुरश्चरणकर्मणि यत्कृतम् आचार्यत्वं एभिर्ब्रह्मगाणपत्यसदस्योपद्रष्टाजापकादिभिर्ब्राह्मणैः सह यत्कृतं जपपाठाभिषेक-हवनादिकं च तेनोत्पन्नं यच्छ्रेयस्तत् साक्षतेन तुभ्यमहं सम्प्रददे। तेन श्रेयसा त्वं श्रेयोवान् भव।

यजमान बोले—**भवामि।**

श्रेयोदान के बाद आचार्यादि ब्राह्मणों को यजमान यज्ञकर्म की दक्षिणा (मुख्यदक्षिण) तुरन्त अवश्य दे दे, विलम्ब करने से प्रायश्चित्त होता है।

आचार्यादिब्राह्मणाय दक्षिणादानम्—यजमान आचार्य को दक्षिणा प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः------नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च आचार्यादिभ्यो ब्राह्मणेभ्यो विभज्य मनसोद्दिष्टां दक्षिणां दातुमहमुत्सृज्ये।।**

आचार्याय गोदानम्—यजमान आचार्य को गोदाननिमित्त निष्क्रयद्रव्य प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च इदं गोनिष्क्रयभूतं करोपस्थितद्रव्यं अमुकगोत्राय अमुकप्रवराय अमुकनामधेयब्राह्मणाय आचार्याय तुभ्यमहं सम्प्रददे।।**

ब्रह्मणे वृषभदानम्—यजमान ब्रह्मा को वृषभनिमित्त निष्क्रयद्रव्य प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च इदं वृषभनिष्क्रयभूतं करोपस्थितद्रव्यं-----गोत्राय------प्रवराय-----शर्मणे ब्राह्मणाय ब्रह्मणे तुभ्यमहं सम्प्रददे।।**

गाणपत्याय अश्वदानम्—यजमान गाणपत्य को अश्वनिमित्त निष्क्रयद्रव्य प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः------नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च इदं अश्वनिष्क्रयभूतं करोपस्थितद्रव्यं-----गोत्राय-----प्रवराय-----शर्मणे ब्राह्मणाय गाणपत्ये तुभ्यमहं सम्प्रददे।।**

उपद्रष्टाय गन्त्रीदानम्—यजमान उपद्रष्टा को गन्त्रीनिमित्त (गाड़ी) निष्क्रयद्रव्य प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः**

-----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च इदं गन्त्रीनिष्क्रयभूतं करोपस्थितद्रव्यं-----गोत्रः------प्रवरः-----शर्मणे उपद्रष्टात्वेन तुभ्यमहं सम्प्रददे।

सदस्याणां सुवर्णदानम्—यजमान सदस्यों को सुवर्णनिमित्त निष्क्रयद्रव्य प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च इदं सुवर्णनिष्क्रयभूतं करोपस्थितद्रव्यममुकामुकगोत्राणां अमुकामुकप्रवराणां अमुकामुकशर्मणेभ्यो ब्राह्मणेभ्यो विभज्यदातुमहं सम्प्रददे॥**

भूयसी दक्षिणदानम्—अन्य जन तथा सभी ब्राह्मणों को भूयसी दक्षिणा प्रदान करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणि न्यूनातिरिक्तदोषपरिहार्थं साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च इदं निष्क्रयभूतंकरोपस्थितद्रव्यं नानानामगोत्रेभ्यो नानाशर्मभ्यो नटनर्तकगायकेभ्यो दीनानाथेभ्यश्च यथाशक्तिभूयसी दक्षिणां विभ्यज्य दातुमहमुत्सृज्ये॥**

सङ्कल्प करके ब्राह्मणों तथा अन्य कन्याओं, बहनों तथा गरीब लोगों को भूयसी दक्षिणा प्रदान करे।

ब्राह्मणभोजनम्—यजमान कर्म की परिपूर्ति के लिए ब्राह्मणभोजन का सङ्कल्प करके भोजन कराये।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च यथासंख्यकान् ब्राह्मणान् भोजयिष्ये तेभ्यो ताम्बूल दक्षिणां च दास्ये।**

दानादिसङ्कल्पः परिपूर्णम्

●

आवाहितदेवतानामुत्तरपूजनम्

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य श्रीमहाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थञ्चावाहितदेवानामुत्तरपूजनं करिष्ये॥**

सङ्कल्प करके आवाहित देवताओं का यथोपचार उत्तरपूजन करे, पश्चात् प्रधानपीठसहित समस्तपीठों को दक्षिणा के सहित आचार्य को दान करे।

महागणपतिपूजनम्

हाथ में गन्धाक्षतपुष्प लेकर महागणपति का ध्यान करे।

ॐ ग॒णाना॑न्त्वाग॒णप॑तिꣳहवामहेप्प्रि॒याणा॑न्त्वाप्प्रि॒यप॑तिꣳहवामहेनिधी॒नान्त्वा॑ निधि॒प॑तिꣳहवामहेव्वसोमम॥ आहम॑जानिगर्ब्भ॒धमात्त्वम॑जासिगर्ब्भ॒धम्॥

ॐ भूर्भुवः स्वः ऋद्धिसिद्धिसहितायमहागणाधिपतये नमः ध्यायामि ध्यानार्थे उत्तरपूजनार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

महागौरीपूजनम्

हाथ में गन्धाक्षतपुष्प लेकर महागौरी का ध्यान करे।

ॐ अम्बे॒ऽअम्बि॒केऽम्बा॑लिके॒नमा॑नयति॒कश्श्च॒न॥ सस॑स्त्यश्श्व॒कःसुभद्रि॒काङ्का म्पीलवा॒सिनी॑म्॥

ॐ भूर्भुवः स्वः महागौर्यै नमः ध्यायामि ध्यानार्थे उत्तरपूजनार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

स्वस्तिकलशस्थदेवतानां पूजनम्

हाथ में गन्धाक्षतपुष्प लेकर स्वस्तिकलश के देवताओं का ध्यान करे।

ॐ तत्त्वा॑यामि॒ब्ब्रह्म॑णा॒व्वन्द॑मान॒स्तदाशा॑स्ते॒यज॑मानोह॒विर्ब्भिः॥ अहे॑डमानोव्वरुणे॒ हबो॒ध्युरु॑शꣳस॒मान॒ऽआयुः॒प्प्रमो॑षीः॥

ॐ भूर्भुवः स्वः स्वस्तिकलशस्थवरुणाद्यावाहितविष्णवादिदेवताभ्यो नमः ध्यायामि उत्तरपूजनार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

षोडशमातृकानां पूजनम्

हाथ में गन्धाक्षतपुष्प लेकर षोडशमातृकाओं का ध्यान करे।

गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥१॥
धृतिः पुष्टिस्तथा तुष्टिः आत्मनः कुलदेवताः।
गणेशेनाधिका ह्येता वृद्धौ पूज्यास्तु षोडश॥२॥

आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम।
निर्विघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपाः॥३॥

गौरी, पद्मा, शची, मेधा, सावित्री, विजया, जया, देवसेना, स्वधा, स्वाहा मातृकायें, लोकमातृकायें, धृति, पुष्टि, तुष्टि तथा अपने कुल के कुलदेवी गणेश के सहित पूजित होकर हमारे घर हमें आयु-आरोग्य-ऐश्वर्य सभी हमें हे मातायें! प्रदान करे तथा हमारे समस्त पूजा-अनुष्ठान को गणेश के सहित समस्त मातृकाएँ यज्ञ के सम्पूर्णफल के लिए निर्विघ्नता प्रदान करें।

ॐ भूर्भुवः स्वः गणेशसहितगौर्यादि आत्मनः कुलदेवतान्त आवाहितषोडश-मातृभ्यो नमः ध्यायामि उत्तरपूजनार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

सप्तघृतमातृकानां पूजनम्

हाथ में गन्धाक्षतपुष्प लेकर सप्तघृतमातृकाओं का ध्यान करे।

श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती।
माङ्गल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः॥१॥
यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः।
कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम्॥२॥

श्री, लक्ष्मी, धृति, मेधा, स्वाहा, प्रज्ञा तथा सरस्वती सप्तघृत मातृकायें मङ्गल कार्यों में सदैव पूजित होती हैं, अतः हे देवियों! अङ्ग के रूप में विधिपूर्वक पूजित होकर हमारे समस्त कार्यों को निर्विघ्नरूप से पूर्ण करानेवाली हों।

ॐ भूर्भुवः स्वः श्र्यादिसरस्वन्त्यन्तसप्तघृतमातृभ्यो नमः ध्यायामि उत्तरपूजनार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

सर्वतोभद्रमण्डलस्थदेवानां पूजनम्

ॐ ब्रह्म॑जज्ञा॒नम्प्र॑थ॒मम्पु॒रस्ता॒द्विसी॑म॒तꣳसु॒रुचो॑व्वे॒नऽआ॑वः॥ सबु॒द्धन्न्या॒ऽउप॒माऽअ॑स्यव्वि॒ष्ठाꣳस॒तश्च॒योनि॒मस॑तश्च॒व्विवः॥

ॐ भूर्भुवः स्वः ब्राह्माद्यावाहितसर्वतोभद्रमण्डलस्थदेवताभ्यो नमः ध्यायामि उत्तरपूजनार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

प्रधानकलशस्थदेवानामुत्तरपूजनम्

हाथ में गन्धाक्षतपुष्प लेकर प्रधानकलशस्थदेवताओं का ध्यान करे।

ॐ तत्त्वा॑यामि॒ब्ब्रह्म॑णा॒व्वन्द॑मान॒स्तदाशा॑स्ते॒यज॑मानोह॒विर्भिः॥ अहे॑डमानोव्वरुणे॒हबो॒ध्युरु॑शꣳस॒मान॒ऽआयु॒ꣳप्रमो॑षीः॥

ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः ध्यायामि उत्तरपूजनार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

महाविद्यामुत्तरपूजनम्

ध्यानम्—दोनों हाथ से पुष्प लेकर ध्यान करे।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो म आवह॥

हे जातवेदा अग्ने! आप सुवर्ण के समान पीतवर्णवाली, किञ्चित् हरितवर्णवाली, किञ्चित् हरिणी रूप धारण करनेवाली, सुवर्णमिश्रित रजत की माला धारण करनेवाली, सुन्दर वर्ण वाले चाँदी के समान श्वेतपुष्पों की माला धारण करनेवाली, चन्द्रमा के सदृश प्रकाशवाली, चन्द्रमा के समान सबको प्रसन्न करनेवाली, चञ्चलता हिरण्यमयी रूपवाली एवं हिरण्यमय ही जिसका शरीर है, ऐसी सुवर्णमयी लक्ष्मी को मेरे लिए आवाहन करता हूँ।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः ध्यानार्थे उत्तरपूजनार्थे पुष्पाणि समर्पयामि।

आसनम्—दोनों हाथ से अक्षत लेकर आसन ध्यान कर समर्पित करे।

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥

हे जातवेदा अग्निदेव! आप उन जगत् विख्यात एवं अनपगामिनी अर्थात् मुझको छोड़कर अन्यत्र न जानेवाली लक्ष्मी को मेरे लिए बुलाओ। मैं सुवर्ण, गौ, घोड़े और पुत्र-पौत्रादि को प्राप्त करने के लिए मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः आसनार्थे उत्तरपूजनार्थे अक्षतान् समर्पयामि।

पाद्यम्—दोनों हाथ से पाद्यपात्र लेकर समर्पित करे।

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥

जिन देवी के आगे घोड़े और बीच में रथ हैं अथवा जिनके आगे घोड़े जुटे हुए हैं ऐसे रथ में सवार, हाथियों के निनाद से जगत् को आनन्दित करनेवाली दीप्यमान एवं समस्त जनों को आश्रय देनेवाली लक्ष्मी को मैं अपने समीप बुलाता हूँ, दीप्यमान तथा सबकी आश्रयदाता लक्ष्मी का अपने घर में सर्वदा निवास करने के लिए मैं आवाहन करता हूँ।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे पादयोः पाद्यं समर्पयामि।

अर्घ्यम्—दोनों हाथ से अर्घ्यपात्र लेकर समर्पित करे।

ॐ कांसोऽस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मेस्थितां पद्मवर्णां तामिवोपह्वये श्रियम्॥

जिनका स्वरूप वाणी और मन का विषय न होने के कारण अवर्णनीय है तथा जो मन्दहास्ययुक्ता हैं, जो चारो ओर सुवर्ण से वेष्टित है एवं दयार्द्र हृदयवाली या समुद्र से उत्पन्न होने के कारण आर्द्र शरीरवाली होती हुई भी दीप्यमान हैं, अर्थात् जो लक्ष्मीजी दया से आर्द्र होते हुए तेज से देदीप्यमान है, स्वयं पूर्णकाम होने के कारण भक्तों के नानाविध मनोरथों को पूर्ण करनेवाली, कमल के ऊपर विराजमान तथा कमल के सदृश गृह में निवास करनेवाली, जगत्प्रसिद्ध लक्ष्मी को मैं अपने समीप बुलाता हूँ।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे अर्घ्यं समर्पयामि।

आचमनम्—दोनों हाथ से आचमनीयपात्र लेकर समर्पित करे।

ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मनेमिं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि॥

चन्द्रमा के सदृश प्रकाशवाली, प्रकृष्ट कान्तिवाली, अपनी कीर्ति से देदीप्यमान, स्वर्गलोक में इन्द्रादि देवताओं से सेवित, अतिदानशीला, कमल के मध्य में रहने वाली, सबकी रक्षा करनेवाली!, भक्तों को आश्रय देनेवाली, जगत्प्रसिद्ध लक्ष्मी को मैं प्राप्त करता रहूँ, हे लक्ष्मी! तुम्हारी कृपा से मेरी दरिद्रता नष्ट हो, अतः मैं तुम्हें स्वीकार करता हूँ अर्थात् तुम्हारा आश्रय लेता हूँ।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे आचमनार्थे गङ्गोदकं समर्पयामि।

स्नानीयम्—दोनों हाथ से स्नानीयपात्र लेकर समर्पित करे।

ॐ गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतम्।
तोयमेतत्सुखस्पर्शं स्नानार्थं प्रतिगृह्यताम्॥

गङ्गादि सभी तीर्थो से प्रार्थनापूर्वक मैं जल लाया हूँ, यह जल का स्पर्श सुख प्रदान करनेवाला है, इसे स्नान के लिए ग्रहण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे स्नानीयं जलं समर्पयामि।

पुनराचमनीयम्—दोनों हाथ से आचमनीय जल लेकर समर्पित करे।

ॐ कर्पूरेण सुगन्धेन सुरभिस्वादुशीतलम्।
तोयमाचमनीयार्थं देवीदं प्रतिगृह्यताम्॥

कर्पूर के समान सुगन्धित, दूध के समान धवल, स्वाद में शीतल जल आचमन के लिए प्रस्तुत है इस आचमनीय जल को देवि! ग्रहण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे पुनराचमनार्थे गङ्गोदकं समर्पयामि।

पयःस्नानम्—दोनों हाथ से पयःपात्र लेकर समर्पित करे।

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्।
पावनं यज्ञहेतुश्च पयःस्नानार्थमर्पितम्॥

कामधेनु गाय से उत्पन्न सभी को जीवन प्रदान करनेवाला, यज्ञ के लिए अति पवित्र दूध आपके स्नान के लिए समर्पित है।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे पयःस्नानं समर्पयामि।

दधिस्नानम्—दोनों हाथ से दधिपात्र लेकर समर्पित करे।

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देव! स्नानार्थं प्रतिगृह्यताम्॥

हे देव! दूध से उत्पन्न मधुर तथा अम्लयुक्त चन्द्रमा के समान धवल दही हम आपके स्नान के लिए लाये हैं, इस दही को ग्रहण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे दधिस्नानं समर्पयामि।

घृतस्नानम्—दोनों हाथ से घृतपात्र लेकर समर्पित करे।

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥

मक्खन से उत्पन्न सभी को सन्तोष प्रदान करनेवाला घी आपको स्नान के लिए प्रदान करता हूँ, इस घृत को ग्रहण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे घृतस्नानं समर्पयामि।

मधुस्नानम्—दोनों हाथ से मधुपात्र लेकर समर्पित करे।

पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्॥

पुष्प कणों से उत्पन्न सुन्दर स्वादवाला मधुर शहद, तेज और पुष्टि को प्रदान करने वाला, दिव्य शहद स्नान के लिए आपको समर्पित है।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे मधुस्नानं समर्पयामि।

शर्करास्नानम्—दोनों हाथ से शर्करापात्र लेकर समर्पित करे।

इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम्।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम्॥

इक्षुरस से उत्पन्न शर्करा शुभ पुष्टि प्रदान करनेवाली, सभी प्रकार के मल का अपहरण करनेवाली है, दिव्य स्नान के लिए इस शर्करा को ग्रहण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे शर्करास्नानं समर्पयामि।

पञ्चामृतस्नानम्—दोनों हाथ से पञ्चामृतपात्र लेकर समर्पित करे।

ॐ पयो दधि घृतं चैव मधुं च शर्करायुतम्।
पञ्चामृतं गृहाण त्वं स्नानार्थं प्रतिगृह्यताम्॥

दूध, दही, घी, मधु और शर्करा से युक्त पञ्चामृत दिव्य स्नान के लिए आपको समर्पित है, इस पञ्चामृत को ग्रहण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे मिलितपञ्चामृतस्नानं समर्पयामि।

शुद्धोदकस्नानम्—दोनों हाथ से जलपात्र लेकर समर्पित करे।

ॐ गङ्गा च यमुना चैव गोदावरी सरस्वती।
नर्मदा सिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम्॥

गङ्गा, यमुना, गोदावरी, सरस्वती, नर्मदा, सिन्धु तथा कावेरी दिव्य नदियों के दिव्य जल आपके स्नान के लिए समर्पित है, इस जल को ग्रहण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे शुद्धोदकस्नानं समर्पयामि

पुनराचमनीयम्—दोनों हाथ से आचमनीय जल लेकर समर्पित करे।

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तववृक्षोऽथविल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः॥

हे सूर्य के सदृश कान्तिवाली देवी! आपके तेज से वनस्पति विशेष बिना पुष्प के फल देने वाला एक वृक्ष उत्पन्न हुआ (आपके हाथ से विल्ववृक्ष उत्पन्न हुआ) उस विल्ववृक्ष का फल मेरे भीतर-बाहर की दरिद्रता को दूर करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे पुनराचमनार्थे गङ्गोदकं समर्पयामि।

वस्त्रोपवस्त्रनिवेदनम्—दोनों हाथ से वस्त्र लेकर समर्पित करे।

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतो सुराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥

हे लक्ष्मी! देवसखा अर्थात् श्रीमहादेव के सखा कुबेर या इन्द्रादि देवताओं की अग्नि मुझे प्राप्त हो अर्थात् मैं अग्नि की उपासना करूँ एवं मणि के साथ अर्थात् चिन्तामणि के

साथ, कुबेर के मित्र मणिभद्र के साथ या रत्नों के साथ, कीर्ति अर्थात् दक्षकन्या, कुबेर की कोशशाला के सदृश यश मुझे प्राप्त हो अर्थात् कुबेर का धन और यश दोनों ही मुझे मिले, मै इस सुन्दर राष्ट्र में उत्पन्न हुआ हूँ, अतः हे कुबेरदेव! आप यश और ऐश्वर्य मुझे प्रदान करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे वस्त्रोपवस्त्रं समर्पयामि, वस्त्रान्ते आचमनीयं समर्पयामि।

यज्ञोपवीतनिवेदनम्—दोनों हाथ से यज्ञोपवीत लेकर समर्पित करे।

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वा निर्णुद मे गृहात्॥

भूख तथा प्यासरूपी मल को धारण करनेवाली एवं लक्ष्मीजी की ज्येष्ठ बहन दरिद्रता का मै नाश करता हूँ, हे लक्ष्मी! आप मेरे घर से अनैश्वर्य तथा धनवृद्धि के सभी प्रतिबन्धक विघ्नों को दूर करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे यज्ञोपवीतं समर्पयामि, यज्ञोपवीतान्ते आचमनीयं समर्पयामि।

सुगन्धिद्रव्यसमर्पणम्—दोनों हाथ से सुगन्धिद्रव्य लेकर समर्पित करे।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिवोपह्वये श्रियम्॥

सुगन्धित पुष्प के अर्पण करने से प्राप्त करने योग्य, किसी से भी दबाने योग्य नहीं, धन-धान्यादि से सदा परिपूर्ण, गौ-अश्वादि पशुओं की समृद्धि को देनेवाली, समस्त प्राणियों की स्वामिनी तथा जगत्प्रसिद्ध लक्ष्मी को मैं अपने घर में बुलाता हूँ।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे गन्धानुलेपनं समर्पयामि।

अक्षतसमर्पणम्—दोनों हाथ से अक्षत लेकर समर्पित करे।

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥

हे लक्ष्मी! तुम्हारे प्रभाव से मानसिक इच्छा एवं सङ्कल्प, वाणी की सत्यता, गौ आदि पशुओं के रूप अर्थात् दुग्ध-दध्यादि एवं यव, ब्रीहि इत्यादि अन्नों के रूप अर्थात् भक्ष्य, भोज्य, चोष्य, लेह्य, चतुर्विध भोजयादि पदार्थो इन समस्त पदार्थो को प्राप्त करूँ। सम्पत्ति-यश मुझमें आश्रय लेकर रहे अर्थात् मै धनवान् कीर्तिमान् बनूँ।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे अलङ्करणार्थे अक्षतान् समर्पयामि।

पुष्पमालासमर्पणम्—दोनों हाथ से पुष्पमाला लेकर समर्पित करे।

ॐ कर्दमेन प्रजा भूता मयि सम्भव कर्दम!।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥

कर्दम नामक ऋषि-पुत्र से लक्ष्मी प्रकृष्ट पुत्रवाली हुई है। हे कर्दम! आप मुझमें अच्छी तरह वास करे। इतनी ही प्रार्थना नहीं है, अपितु कमल की माला धारण करनेवाली, सम्पूर्ण जगत् की माता लक्ष्मी को मेरे कुल में निवास कराओ।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे पुष्पमालां परिधापयामि।

दूर्वासमर्पणम्—दोनों हाथ से दूर्वा लेकर समर्पित करे।

दूर्वाङ्कुरान्सुहरितान् अमृतान्मङ्गलप्रदान्।
आनीतांस्तव पूजार्थं गृहाण गणनायक!॥

हरे-हरे दुर्वाङ्कुर जो अमृतत्व तथा मङ्गल प्रदान करनेवाले हैं आपके पूजा के लिए मैं लाया हूँ आप प्रसन्नतापूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे दुर्वाङ्कुरान् समर्पयामि।

नानापरिमलद्रव्यसमर्पणम्—दोनों हाथ सें अबीरबुक्का लेकर समर्पित करे।

ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले॥

जिस प्रकार कर्दम ऋषि की सन्तति (ख्याति) से लक्ष्मी का अवतार हुआ है, उसी प्रकार अन्य कल्प में भी समुद्र से चौदह रत्नों के बाद लक्ष्मी का आविर्भाव हुआ है। उसी प्रकार जल देवता स्निग्ध एवं मनोहर पदार्थों को उत्पन्न करे (पदार्थों की सुन्दरता लक्ष्मी ही है) लक्ष्मी के आनन्द, कर्दम, चिक्लीत और श्रीत चार पुत्र हैं। जिसमें हे चिक्लीत! तुम मेरे गृह मे निवास करो, केवल तुम ही नहीं, अपितु दिव्यगुणयुक्ता तथा सर्वाश्रयाभूता अपनी माता लक्ष्मी को भी मेरे घर में निवास कराओ।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे नानापरिमलद्रव्याणि समर्पयामि।

सिन्दूरसमर्पणम्—दोनों हाथ से सिन्दूर लेकर समर्पित करे।

ॐ सिन्दूरमरुणाभासं जवाकुसुमसन्निभम्।
पूजितोऽसि मया देवि! प्रसीद परमेश्वरि!॥

अरुणकालिक प्रकाश के समान आभावाला सिन्दूर तथा जवाकुसुम के सदृश वर्ण (रंग) वाले सिन्दूर से हे देवि! मुझ पर प्रसन्न हो तथा पूजित हों।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे सिन्दूराभरणं समर्पयामि। ततः नैवेद्यं पुरतः संस्थाप्य धूपदीपौ प्रज्वाल्य। सिन्दूरादि समर्पण करने के बाद देवता के सम्मुख नैवेद्य स्थापित करने के बाद धूप तथा घृतदीप प्रज्वलित करने के बाद सर्वप्रथम धूप निवेदन करने के बाद दीप निवेदन करे। दीप देवता को समर्पित किया जाता है, न कि चारो ओर घुमाया जाता है।

धूपसमर्पणम्—दोनों हाथ से धूपपात्र लेकर समर्पित करे।

ॐ दशाङ्गंगुग्गुलं धूपं चन्दनाऽगरुसंयुतम्।
समर्पितं मया भक्त्या महादेवि! प्रगृह्यताम्॥

दशाङ्ग, गुग्गुल, चन्दन तथा अगुरु जैसे गन्धों से युक्त धूप भक्तिपूर्वक हम समर्पित करते है हे महादेवि! इस धूप को ग्रहण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे धूपं समर्पयामि।

दीपसमर्पणम्—दोनों हाथ से दीपपात्र लेकर समर्पित करे।

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

हे जातवेदा अग्ने! आप मेरे घर में पुष्करिणी अर्थात् हाथियों के झुण्डाग्र से अभिषिच्यमाना, आर्द्रशरीरवाली, पुष्टि को देने वाली, पुष्टिस्वरूपा रक्त और पीतवर्ण वाली, कमल की माला धारणकर जगत् को प्रकाशित करनेवाली प्रकाशस्वरूपा लक्ष्मी को हमारे लिए प्रदान करो।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे दीपज्योतिं समर्पयामि।

नैवेद्यसमर्पणम्—दोनों हाथ से नैवेद्यपात्र लेकर समर्पित करे।

ॐ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्।
नैवेद्यं गृह्यतां देवि! भक्तिं मे ह्यचलां कुरु॥

चारों प्रकार का सुन्दर सुस्वादु षड्रसों से युक्त नैवेद्य हे देवी! भक्तिपूर्वक समर्पित करता हूँ ग्रहण करके अपने में हमारी भक्ति को अचल करो।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे नैवेद्यं समर्पयामि। ॐ प्राणाय स्वाहा। ॐ

अपानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ व्यानाय स्वाहा। मध्ये पानीयं जलं उत्तरापोशनं समर्पयामि।

करोद्वर्तनसमर्पणम्—दोनों हाथ से करोद्वर्तन लेकर समर्पित करे।

ॐ नानासुगन्धिद्रव्यञ्च चन्दनं रजनीयुतम्।
उद्वर्तनं मया दत्तं मातृकां प्रतिगृह्यताम्॥

विभिन्न प्रकार के सुगन्धित द्रव्य चन्दन तथा रजनी पुष्प से युक्त करोद्वर्तन हम प्रदान करते है, गणेशसहित मातृकाएँ प्रेमपूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः करोद्वर्तनार्थे चन्दनानुलेपनं समर्पयामि।

ताम्बूलादिसमर्पणम्—दोनों हाथ सें ताम्बूल लेकर समर्पित करे।

ॐ आर्द्रां यः करिर्णीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरणमयीं लक्ष्मीं जातवेदो म आवह॥

हे जातवेद अग्ने! आप मेरे घर में भक्तो पर सर्वदा दयार्द्रचित्त, समस्त भुवन जिनकी याचना करते हैं, दुष्टों को दण्ड देनेवाली, यष्टिवत् अवलम्बनीया, सुन्दर वर्णवाली, सुवर्ण स्वरूपा एवं सुवर्ण की माला धारण करनेवाली सूर्यज्वा अर्थात् जिस प्रकार सूर्य अपने प्रकाश और वृष्टि द्वारा जगत् का पालन-पोषण करता है उसी प्रकार लक्ष्मी ज्ञान और धन के द्वारा जगत् का पालनपोषण करती हैं, अतः प्रकाशस्वरूपा लक्ष्मी को हमारे लिए प्रदान करो।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे मुखशुद्ध्यर्थे पूङ्गीफलमेलालवङ्गादिसहितताम्बूलपत्राणि समर्पयामि।

फलादिसमर्पणम्—दोनों हाथ से फलपात्र लेकर समर्पित करे।

ॐ द्राक्षाखर्जूरकदली पनसाऽऽम्रं कपित्थकम्।
नारिकेलेक्षुजम्ब्यादि फलानि प्रतिगृह्यताम्॥

हे देव! द्राक्षा (किसमिस), खर्जूर (खजूर), कदली (केला), पनस (सिंघाड़ा), आम्र (आम), कपित्थ (कैथ), नारिकेल (नारियल), इक्षु (गन्ना), जम्बूफल (जामुन), फलों को आपके प्रसन्नता के लिए लाया हूँ, प्रेमपूर्वक ग्रहण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे ऋतुकालोद्भवफलानि समर्पयामि।

दक्षिणासमर्पणम्—दोनों हाथ से दक्षिणा लेकर समर्पित करे।

ॐ पूजाफलसमृद्ध्यर्थं तवाग्रे स्वर्णमीश्वरि!।
स्थापितं तेन मे प्रीता पूर्णान्कुरु मनोरथान्॥

पूजा के पूर्ण फल की समृद्धि के लिए स्वर्णमयी मुद्रा आपके सामने समर्पित भाव से स्थापित है, जिसे स्वीकार करके जिससे प्रसन्न मन होकर हमारे मनोरथ को पूर्ण करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे कृतायाः पूजायाः साद्‌गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।

नीराजनसमर्पणम्—दोनों हाथ से नीराजन लेकर घुमाये।

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम्।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव॥

कदली (केले के वृक्ष के) गर्भ से उत्पन्न कर्पूर प्रदीपित करके आपकी आरती हम करते हैं, जिसे देखकर आप प्रसन्न हों तथा हमारी समस्त कामनापूर्ति के लिए वर प्रदान करें।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे कर्पूरनीराजनं समर्पयामि।

परिक्रमासमर्पणम्—दोनों हाथ से पुष्प लेकर समर्पित करे।

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतिं गावो दास्योऽश्वां विन्देयं पुरुषानहम्॥

हे जातवेद अग्ने! आप मेरे यहाँ उस जगत्विख्यात् लक्ष्मी को, जो मुझे छोड़कर अन्यत्र कही न जानेवाली हों, उन लक्ष्मी को प्राप्त कराओ। जिन लक्ष्मी के द्वारा मैं सुवर्ण, उत्तम ऐश्वर्य, गौ, दासी, घोड़े, और पुत्र-पौत्रादि को प्राप्त करूँ, अर्थात् अचला लक्ष्मी को प्राप्त करूँ।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे प्रदक्षिणां समर्पयामि।

पुष्पाञ्जलिसमर्पणम्—दोनों हाथ से पुष्प लेकर समर्पित करे।

ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।
श्रियः पञ्चदर्थञ्च श्रीकामः सततं जपेत्॥

जो मनुष्य शुचिता को प्राप्तकर अर्थात् शुद्ध होकर लक्ष्मी की कामना से श्रद्धापूर्वक पवित्र मन और सावधान होकर प्रतिदिन अग्नि में गौ के घृत का होम करे और उसके साथ लक्ष्मीसूक्त तथा श्रीसूक्त के पूर्वोक्त पन्द्रह ऋचाओं का प्रतिदिन निरन्तर जप करता रहे।

ॐ भूर्भुवः स्वः साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः उत्तरपूजनार्थे मन्त्रपुष्पाञ्जलिं समर्पयामि।

श्रीमहाविद्यायामुत्तरपूजनं परिपूर्णम्

महाभैरवमुत्तरपूजनम्

हाथ में गन्धाक्षतपुष्प लेकर महाभैरव का ध्यान करे।

करकलितकपालः कुण्डली दण्डपाणिः,
तरुणतिमिरनीलो व्यालयज्ञोपवीती।
क्रतुसमयसपर्या विघ्नविच्छेदहेतुः,
जयति वटुकनाथः सिद्धिदः साधकानाम्॥

ॐ भूर्भुवः स्वः साङ्गाय सपरिवाराय सावरणाय सायुधाय सशक्तिकाय वटुकभैरवाय नमः ध्यायामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ग्रहमण्डलस्थदेवानामुत्तरपूजनम्

हाथ में गन्धाक्षतपुष्प लेकर ग्रहमण्डलस्थदेवताओं का ध्यान करे।

ॐ ग्रहाऽऊर्जाहुतयो॒व्यन्तोविप्रायमतिम्॥ तेषांविशिप्प्रियाणांव्वोऽहमिष मूर्ज्जꣳसमग्ग्रभमुपयामगृहीतोऽसीन्द्रायत्त्वाजुष्टंगृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वा जुष्टतमम्॥

ॐ भूर्भुवः स्वः सूर्याद्यनन्तान्तग्रहमण्डस्थदेवताभ्यो नमः ध्यायामि ध्यानार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

असंख्यातरुद्राणां पूजनम्

हाथ में गन्धाक्षतपुष्प लेकर असंख्यातरुद्र का ध्यान करे।

ॐ अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेऽअस्तुरुद्र रूपेभ्यः स्वाहा॥

ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः ध्यायामि ध्यानार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

नीराजनम् (आरती)—नवप्रदीप्त दीपकों के द्वारा सपरिवार नीराजन करे।

ॐ इ॒दꣳह॒विःप्र॒जननंमेऽअस्तु॒दशवीर॒ꣳसर्वगणꣳस्व॒स्तये॥ आ॒त्म॒सनिप्प्रजा॒ सनिपशु॒सनिलोक॒सन्न्यभय॒सनि॥ अ॒ग्निःप्प्र॒जांबहु॒लांमेकरो॒त्वन्नंपयो॒रेतोऽअ॒स्म्मासु धत्त॥ ॐ आरात्रि॒पार्थिवꣳ॒रजःपि॒तुरप्प्रायि॒धामभिः॥ दि॒वःसदाꣳसिबृह॒तीवि तिष्ठस॒ऽआत्त्वे॒षंव्वर्त्तते॒तमः॥

जय अम्बे गौरी, मैया जय श्यामा गौरी।
तुमको निशिदिन ध्यावत, हरि ब्रह्मा शिव जी॥१॥
ॐ जय अम्बे गौरी।
माँग सिन्दूर विराजत, टीको मृगमद को।
मैया टीको मृगमद को।

उज्ज्वल से दोउ नयना,
निर्मल से दोऊ नयना, चन्द्रवदन नीको॥२॥
ॐ जय अम्बे गौरी।
कनक समान कलेवर, रक्ताम्बर राजे।
मैया रक्ताम्बर राजे।
रक्त पुष्प गल माला,
लाल पुष्प गल माला, कण्ठन पर साजे॥३॥
ॐ जय अम्बे गौरी।
केहरि वाहन राजत, खड्ग खप्पर धारी।
मैया खड्ग खप्पर धारी।
सुर नर मुनि जन सेवत,
ऋषि जन मुनि जन सेवत, तिनके दुःख हारी॥४॥
ॐ जय अम्बे गौरी।
कानन कुण्डल शोभित, नासाग्रे मोती।
मैया नासाग्रे मोती।
कोटिक चन्द्र दिवाकर,
अगणित सूर्य प्रभाकर, राजत सम ज्योती॥५॥
ॐ जय अम्बे गौरी।
शुम्भ निशुम्भ विदारे, महिषा सुर घाती।
मैया महिषा सुर घाती।
धूम्र विलोचन नैना,
मधुर विलोचन नैना, निशिदिन मदमाती॥६॥
ॐ जय अम्बे गौरी।
चण्ड मुण्ड संहारे, शोणित बीज हरे।
मैया शोणित बीज हरे।
मधु कैटभ दोउ मारे,
मधु कैटभ संहारे, सुर भयहीन करे॥७॥
ॐ जय अम्बे गौरी।
ब्रह्माणी रुद्राणी, तुम कमला रानी।
मैया तुम कमला रानी।
आगम निगम बखानी,
वेद पुराण बखानी, तुम शिव पटरानी॥८॥

ॐ जय अम्बे गौरी।
चौंसठ योगिनि गावत, नृत्य करत भैरों।
मैया नृत्य करत भैरों।

बाजत ताल मृदङ्गा,
बाजत ढोल मृदङ्गा, अरु बाजत डमरू॥९॥
ॐ जय अम्बे गौरी।
तुम ही जग की माता, तुम ही हो भरता।
मैया तुम ही हो भरता।

भक्तन की दुःख हरता,
सन्तन की सुख करता, सुख सम्पति करता॥१०॥
ॐ जय अम्बे गौरी।
भुजा चार अति शोभित, वर मुद्रा धारी।
मैया वरद अभय धारी।

मन वांच्छित फल पावत,
मन इच्छित फल पावत, सेवत नर नारी॥११॥
ॐ जय अम्बे गौरी।
कंचन थाल विराजत, अगर कपुर बाती।
मैया धूप दीप बाती।

श्री माल केतु मे राजत,
विन्ध्याचल मे विराजत, कोटि रतन ज्योती॥१२॥
ॐ जय अम्बे गौरी।
माँ अम्बे जी की आरती, जो कोई नर गावें।
मैया जो कोई नर गावें।

कहत शिवानन्द स्वामी,
मन भजत हरिहर स्वामी, सुख सम्पति पावे॥१३॥
ॐ जय अम्बे गौरी।
जय अम्बे गौरी, मैया जय श्यामा गौरी।
तुमको निशिदिन ध्यावत, हरि ब्रह्मा शिव जी।
मैया हरि ब्रह्मा शिव जी।
कर्पूरगौरं करुणावतारं, संसारसारं भुजगेन्द्रहारम्।
सदावसन्तं हृदयारविन्दे, भवं भवानिसहितं नमामि॥
कदलीगर्भसम्भूतं, कर्पूरं तु प्रदीपितम्।
आरार्तिकमहं कुर्वे, पश्य मे वरदो भव॥

ॐ भूर्भुवः स्वः श्रीमहाविद्यायै नमः कर्पूरनीराजनं समर्पयामि॥

जलेन शीतलीकरणम्—पात्र में जल लेकर शीतलीकरण करे।

पात्रमध्ये स्थितं तोयं, भ्रामितं देवतोपरि।
अङ्गलग्नं मनुष्याणां, सर्वं पापं व्यपोहतु॥

पात्र में जल लेकर देवता के उपर चारो तरफ घुमाने के बाद यजमान के उपर छिड़कने से सभी पापों से छुटकारा मिल जाता है।

पुष्पैः देवाभिवन्दनम्, आरार्तिक्यग्रहणम्, हस्तौप्रच्छालनम्, पुष्पसंग्रहणम्, मन्त्रपुष्पाञ्जलिः। पुष्प से देवताओं का अभिनन्दन करके आरती ग्रहण करने के बाद दोनो हाथ धोकर दोनो हाथों में फूल लेकर पुष्पाञ्जलि बोलकर भगवती को तथा सभी देवताओं को समर्पित करे।

पुष्पाञ्जलिः—दोनों हाथों में पुष्प लेकर पुष्पाञ्जलि प्रदान करे।

ॐ य॒ज्ञेन॑य॒ज्ञम॑यजन्तदे॒वास्तानि॒धर्म्मा॑णिप्प्रथ॒मान्न्या॑सन्॥ तेह॒नाक॑म्ममहि॒मान॑ः सचन्तु॒यत्र॒पूर्व्वे॑साद्ध्या॒ःसन्ति॑दे॒वाः॥ ॐ राजाधिराजायप्रसह्यसाहिने नमो वयं वैश्रवणायकुर्महे समेकामान् कामकामायमह्यं कामेश्वरो वैश्रवणो ददातु॥ कुबेराय वैश्रवणाय महाराजाय नमः। ॐ स्वस्तिसाम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुषां तदपरार्धात् पृथिव्यै समुद्रपर्यन्तायाऽ एकराडिति॥ तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्याऽवसन् गृहे॥ आवीक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति॥

नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च।
पुष्पाञ्जलिर्मया दत्त गृहाण परमेश्वरि!॥

ॐ भूर्भुवः स्वः मण्डपस्थ आवाहितदेवतासहितायै साङ्गयै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाविद्यायै नमः मन्त्रपुष्पाञ्जलिं समर्पयामि।

पुष्पाञ्जलि प्रदान करने के बाद स्तुत्यादि पाठ कर अवश्य समर्पित करे।

स्तुतिपाठनिवेदनम्—सर्वप्रथम देवी पुष्पाञ्जलि स्तोत्र का पाठ करे।

देवीपुष्पाञ्जलिस्तोत्रम्

अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दिनुते,
गिरिवरविन्ध्यशिरोऽधिनिवासिनि विष्णुविलासिनि जिष्णुनुते।
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूतिकृते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥१॥
सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते,
त्रिभुवनपोषिणि शङ्करतोषिणि कल्मषमोषिणि घोषरते।

दनुजनिरोषिणि दुर्मदशोषिणि दुर्मुनिरोषिणि सिन्धुसुते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥२॥
अयि जगदम्ब! कदम्बवनप्रियवासिनि तोषिणि हासरते,
शिखरिशिरोमणितुङ्गहिमालयशृङ्गनिजालयमध्यगते।
मधुमधुरे मधुकैटभगञ्जिनि महिषविदारिणि रासरते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥३॥
अयि निजहुंकृतिमात्रनिराकृत धूम्रविलोचन-धूम्रशते,
समरविशोषितरोषितशोणित बीजसमुद्भव बीजलते।
शिव शिव शुम्भनिशुम्भमहाहवतर्पितभूतपिशाचरते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥४॥
अयि शतखण्ड विखण्डित रुण्ड वितुण्डित शुण्ड गजाधिपते,
निजभुजदण्ड निपातितचण्ड विपाटितमुण्ड भटाधिपते।
रिपुगजगण्डविदारणचण्ड पराक्रमशौण्ड मृगाधिपते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥५॥
धनुरनुषङ्ग रणक्षणसङ्ग परिस्फुरदङ्ग नटत्कटते,
कनकपिशङ्ग पृषत्कनिषङ्ग रसद्भटशृङ्गहताबटुके।
हतचतुरङ्ग बलत्क्षितिरङ्ग घटद्बहुरङ्ग रटद्बटुके,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥६॥
अयि रणदुर्मद शत्रुवधाद्धुर दुर्धरनिर्भर शक्तिवृते,
चतुरविचार धुरीणमहाशय दूतकृतप्रमथाधिपते।
दुरित-दुरीह-दुराशय-दुर्मति-दानवदूत-दुरन्तगते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥७॥
अयि शरणागत-वैरिवधू-जनवीरवराभव-दायिकरे,
त्रिभुवनमस्तक-शूलविरोधि-शिरोधिकृतामल-शूलकरे।
दुमिदुमितामर-दुन्दुभिनाद-मुहुर्मुखरीकृत-दिङ्गनिकरे,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥८॥
सुरललना-ततथेयितथेयितथाभिनयोत्तर-नृत्त्यरते,
कृतकुकुथा-कुकुथोदि-डदाडिक-तालकूतुहल-गानरते।
धुधुकुट-धूधुट-धिन्धिमितध्वनि-धीरमृदङ्ग-निनादरते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥९॥
जय जय जाप्यजये जयशब्द-परस्तुति-तत्पर विश्वनुते,
झणझण-झिंझिम-झिंकृत-नूपुर-शिञ्जित-मोहित-भूतपते।

नटितनटार्ध-नटीनटनायक नाटननाटित-नाट्यरते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥१०॥
अयि सुमनः सुमनः सुमनः सुमनः सुमनोरम कान्तियुते,
श्रितरजनी-रजनी-रजनी-रजनी-रजनीकर-वक्त्रभृते।
सुनयन-विभ्रमर-भ्रमर-भ्रमर-भ्रमर-भ्रमराधिपते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥११॥
महित-महाहव-मल्लमतल्लिक-वल्लित-रल्लित-भल्लिरते,
विरचितवल्लिकपालिक-पल्लिक-झिल्लितभिल्लिकवर्गवृते।
श्रुतकृतफुल्ल-समुल्ल-सितारुण-तल्लज-पल्लव-सल्ललिते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥१२॥
अयि सुदतीजन लालस-मानस-मोहन-मन्थर-राजसुते,
अविरलगण्डगलन्मदनेदुरमत्तमतङ्गजराजगते।
त्रिभुवनभूषण भूतकलानिधि रूपपयोनिधिराजसुते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥१३॥
कमलदलामल-कोमलकान्ति-कलाकलितामल-भालतले,
सकलविलास-कलानिलय-क्रमकेलि-चलत्कलहंसकुले।
अलिकुलसङ्कुल-कुन्तलमण्डल-मौलिमिलद्-बकुलालिकुले,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥१४॥
करमुरलीरव-वर्जित-कूजित-लज्जितकोकिल-मञ्जुमते,
मिलित-मिलिन्द-मनोहर-गुञ्जित-रञ्जित-शैलनिकुञ्जगते।
निजगणभूत-महाशबरीगण-रङ्गणसम्भृत-केलिरते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥१५॥
कटितटपीतदुकूलविचित्रमयूखतिरस्कृतचण्डरुचे,
जितकनकाचलमौलिमदोर्जितगर्जितकुञ्जरकुम्भकुचे।
प्रणतसुराऽसुरमौलि-मणिस्फुरदंशु-लसन्नखचन्द्ररुचे,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥१६॥
विजितसहस्रकरैकसहस्रकरैकसहस्रकरैकनुते,
कृतसुरतारकसङ्गरतारकसङ्गरतारकसूनुनुते।
सुरथसमाधि-समानसमाधि-समानसमाधि-सुजाप्यरते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥१७॥
पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं सुशिवे,
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत्।

तव पदमेव परं पदमस्त्विति शीललयो मम किं न शिवे,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥१८॥
कनकलसत्कलशीकजलैरनुषिञ्चति तेऽङ्गणरङ्गभुवम्,
भजति स किं न शचीकुचकुम्भनटीपरिरम्भसुखानुभवम्।
तव चरणं शरणं करवाणि सुवाणि पथं मम देहि शिवम्,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥१९॥
तव विमलेन्दुकलं वदनेन्दुमलं कलयन्ननुकूलयते,
किमु पुरुहूतपुरीन्दुमुखी सुमुखीभिरसौ विमुखीक्रियते।
मम तु मतं शिवमानधने भवती कृपया किमु न क्रियते,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥२०॥
अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे,
अयि जगतो जननीति यथाऽसि मयाऽसि तथाऽनुमतासि रमे।
यदुचितमत्र भवत्पुरगं कुरु शाम्भवि देवि दयां कुरु मे,
जय जय हे महिषासुरमर्दिनि! रम्यकपर्दिनि! शैलसुते॥२१॥
स्तुतिमिमां स्तिमितः सुसमाधिना नियमतो यमतोऽनुदिनं पठेत्।
परमया रमया स निषेव्यते परिजनोऽरिजनोऽपि च तं भजेत्॥२२॥

देव्यापुष्पाञ्जलीस्तोत्रं परिपूर्णम्

अपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो,
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथा।
न जाने मुद्रास्ते तदपि च न जाने विलपनं,
परं जाने मातस्त्वदनुशरणं क्लेशहरणम्॥१॥
विधेरज्ञानेन द्रविणविरहेणाऽलसतया,
विधेयाऽशक्यत्वात् तव चरणयोर्या च्युतिरभूत्।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे,
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥२॥
पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः,
परं तेषां मध्ये विरलतरलोऽहं तव सुतः।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे,
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥३॥

जगन्मातर्मातस्तव चरणसेवा न रचिता,
न वा दत्तं देवि! द्रविणमपि भूयस्तव मया।
तथाऽपि त्वं स्नेहं मयि निरुपमं यत् प्रकुरुषे,
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥४॥
परित्यक्ता देवा विविधविधसेवाकुलतया,
मया पञ्चाशीतेरधिकमपनीते तु वयसि।
इदानी चेन्मातस्तव यदि कृपा नाऽपि भविता,
निरालम्बो लम्बोदरजननि कं यामि शरणम्॥५॥
श्वपाको जल्पाको भवति मधुपाकोपमगिरा,
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं,
जनः को जानीते जननि जपनीयं जपविधौ॥६॥
चिताभस्मालेपो गरलमशनं दिक्पटधरो,
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः।
कपाली भूतेशो भजति जगदीशैकपदवीम्,
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम्॥७॥
न मोक्षस्याऽऽकांक्षा भवविभववाञ्छापि च न मे,
न विज्ञानापेक्षा शशिमुखि सुखेच्छाऽपि न पुनः।
अतस्त्वां संयाचे जननि जननं यातु मम वै,
मृडानी रुद्राणी शिव शिव भवानीति जपतः॥८॥
नाऽऽराधितासि विधिना विविधोपचारैः,
किं रुक्षचिन्तनपरैर्नकृतं वचोभिः।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे,
धत्से कृपामुचितमम्ब! परं तवैव॥९॥
आपत्सुमग्नःस्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि।
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति॥१०॥
जगदम्ब!विचित्रमत्र किं परिपूर्णाकरुणाऽस्तिचेन्मयि।
अपराधपरम्परापरं न हि माता समुपेक्षते सुतम्॥११॥
मत्समः पातकी नास्ति पापाघ्नी त्वत्समा न हि।
एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु॥१२॥

देव्यापराधक्षमापनस्तुतिपाठं परिपूर्णम्

भवानीस्तुतिः

न तातो न माता न बन्धुर्न दाता, न पुत्रो न पुत्री न भृत्यो न भर्ता।
न जाया न विद्या न वृत्तिर्ममैव, गतिस्त्वं गतिस्त्वं त्वमेका भवानि॥१॥
भवाब्धावपारे महादुःखभीरुः, पपात प्रकामी प्रलोभी प्रमत्तः।
कुसंसारपाशप्रबद्धः सदाऽहं, गतिस्त्वं गतिस्त्वं त्वमेका भवानि॥२॥
न जानामि दानं न च ध्यान योगं, न जानामि तन्त्रं न च स्त्रोत्रमन्त्रम्।
न जानामि पूजां न च न्यासयोगं, गतिस्त्वं गतिस्त्वं त्वमेका भवानि॥३॥
न जानामि पुण्यं न जानामि तीर्थं न जानामि मुक्तिं लयं वा कदाचित्।
न जानामि भक्तिं व्रतं वाऽपि मातः, गतिस्त्वं गतिस्त्वं त्वमेका भवानि॥४॥
कुकर्मी कुसङ्गी कुबुद्धिः कुदासः कुलाचारहीनः दुराचारलीनः।
कुदृष्टिः कुवाक्यप्रबन्धः सदाऽहं गतिस्त्वं गतिस्त्वं त्वमेका भवानि॥५॥
प्रजेशं रमेशं महेशं सुरेशं, दिनेशं निशीथेश्वरं वा कदाचित्।
न जानामि चाऽन्यत्सदाऽहं शरण्ये, गतिस्त्वं गतिस्त्वं त्वमेकाभवानि॥६॥
विवादे विषादे प्रमादे प्रवासे, जले चाऽनले पर्वते शत्रुमध्ये।
अरण्ये शरण्ये सदा मां प्रपाहि, गतिस्त्वं गतिस्त्वं त्वमेका भवानि॥७॥
अनाथो दरिद्रो जरारोगयुक्तो, महाक्षीणदीनः सदा जाड्यवक्त्रः।
विपत्तौ प्रविष्टः प्रणष्टः सदाऽहं, गतिस्त्वं गतिस्त्वं त्वमेका भवानि॥८॥

श्रीभवानीस्तुतिः परिपूर्णम्

◆

देवीस्तुतिः

नमस्ते शरण्ये शिवे सानुकम्पे, नमस्ते जगद्व्यापिके विश्वरूपे।
नमस्ते जगद्वन्द्यपादारविन्दे, नमस्ते जगत्तारिणी त्राहि दुर्गे॥१॥
नमस्ते जगच्चिन्त्यमानस्वरूपे, नमस्ते महायोगिनि ज्ञानरूपे।
नमस्ते नमस्ते सदानन्दरूपे, नमस्ते जगत्तारिणी त्राहि दुर्गे॥२॥
अनाथस्य दीनस्य तृष्णातुरस्य, भयार्तस्य भीतस्य बुद्धस्य जन्तोः।
त्वमेका गतिर्देवि निस्तारकर्त्री, नमस्ते जगत्तारिणी त्राहि दुर्गे॥३॥
अरण्ये रणे दारुणे शत्रुमध्येऽनले सागरे प्रान्तरे राजगेहे।
त्वमेका गतिर्देवि निस्तारनौका, नमस्ते जगत्तारिणी त्राहि दुर्गे॥४॥
अपारे महादुस्तरेऽत्यन्तघोरे, विपत्सागरे मज्जतां देहभाजां।
त्वमेका गतिर्देवि निस्तारहेतुः, नमस्ते जगत्तारिणी त्राहि दुर्गे॥५॥
नमश्चण्डिके चण्डदुर्दण्डलीला, समुत्खण्डिता-खण्डिताशेषशत्रो।
त्वमेका गतिर्देवि निस्तारबीजं, नमस्ते जगत्तारिणी त्राहि दुर्गे॥६॥

त्वमेवाघभावाधृता सत्यवादीः, न जाता जितक्रोधनात्क्रोधनिष्ठा।
इडा पिङ्गला त्वं सुषुम्ना च नाडी, नमस्ते जगत्तारिणी त्राहि दुर्गे॥७॥
नमो देवि दुर्गे शिवे भीमनादे, सरस्वत्यरुन्धत्यमोघस्वरूपे।
विभूतिः शचीकालरात्रिःसति त्वं, नमस्ते जगत्तारिणी त्राहि दुर्गे॥८॥
शरणमसि सुराणां सिद्धविद्याधराणां,
मुनि-मनुज-पशूनां दस्युभिस्त्रासितानां।
नृपतिगृहगतानां व्याधिभिः पीडितानां,
त्वमसि शरणमेका देवि दुर्गे प्रसीद॥९॥

फलश्रुतिः

इदं स्तोत्रं मया प्रोक्तमापदुद्धारहेतुकम्।
त्रिसन्ध्यमेकसन्ध्यं वा पठनाद् घोरसंकटात्॥१०॥
मुच्यते नाऽत्र सन्देहो भुवि स्वर्गे रसातले।
सर्वं वा श्लोकमेकं वा यः पठेद् भक्तिमान् सदा॥११॥
स सर्वं दुष्कृतं त्यक्त्वा प्राप्नोति परमं पदम्।
पठनादस्य देवेशि किं न सिध्यति भूतले॥१२॥
स्तवराजमिमं देवि संक्षेपात् कथितं मया॥

अनेन स्तुतिपाठाख्येन श्रीदुर्गादेवताप्रीयतां न मम।

उत्तरपूजनं परिपूर्णम्

●

आवाहितदेवतानां विसर्जनम्

स्तुत्यादि पाठ करने के बाद, देवी के सहित समस्त देवताओं को अपने-अपने लोक पधारने के लिए प्रार्थना कर, ब्राह्मणों, कुमारियों तथा सुवासिनियों को भोजन कराकर दक्षिणादि से सन्तुष्ट कर आशीर्वाद ग्रहण करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः ------प्रवरः------नामाऽहं कृतस्य महाविद्यापुरश्चरणकर्माङ्गत्वेन आवाहितदेवतानां उत्थापनं विसर्जनं करिष्ये।**

संकल्प करके सानुनय अग्नि तथा आवाहित समस्त देवताओं का यथोपचार पुष्पाक्षतादि से पूजन करके देवताओं तथा अग्नि को स्वस्वलोकगमनार्थ विदाकर कर्म का विसर्जन करे।

ॐ उत्तिष्ठब्ब्रह्मणस्पतेदेवययन्तस्त्वेमहे॥ उपप्प्रयन्तुमरुत÷सुदानवऽइन्द्रप्प्राशूर्ब्भ

वा॒सचा॥ ॐ यज्ञंगच्छयज्ञपतिंगच्छस्वांयोनिंगच्छस्वाहा॥ एषतेयज्ञोयज्ञपतेसह सूक्तवाकᳪसर्व्ववीरस्तंजुषस्वस्वाहा॥

यान्तु देवगणाः सर्वे पूजामादाय मामिकीम्।
इष्टकामसमृद्ध्यर्थं पुनरागमनाय च॥१॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर।
यत्र ब्रह्मादयो देवा तत्र गच्छ हुताशन॥२॥

प्रार्थना—हाथ में फूल लेकर प्रार्थना करे।

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥१॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥२॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः॥३॥
यत्पादपङ्कजस्मरणात् यस्य नाम जपादपि।
न्यूनं कर्म भवेत् पूर्णं तं वन्दे साम्बमीश्वरम्॥४॥

ॐ विष्णवे नमः॥ ॐ विष्णवे नमः॥ ॐ विष्णवे नमः॥
ॐ साम्बसदाशिवाय नमः॥ ॐ साम्बसदाशिवाय नमः॥
ॐ साम्बसदाशिवाय नमः॥

अनेन यथाशक्तिकृतेन महाविद्यापुरश्चरणकर्मणा श्रीमहाविद्याप्रीयतां न मम।

आवाहितदेवतानां विसर्जनम्

●

आचार्याय प्रधानपीठादिदानम्

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः------नामाऽहं कृतस्य महाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थञ्च इमानि सोपष्करसहितानिप्रधानपीठादीनि अमुकगोत्रः अमुकप्रवरः अमुकनामाचार्याय तुभ्यमहं सम्प्रददे।**

समस्त ब्राह्मणों के सहित आचार्य सपरिवार यजमान का रुद्रकलश तथा प्रधानकलश के जल को एकत्र कर अभिषेक करे।

आचार्याय प्रधानपीठादिदानं परिपूर्णम्

●

सपरिवारयजमानस्य अभिषेकः

सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः॥१॥
प्रद्युम्नश्चाऽनिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा॥२॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा॥३॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धाक्रियामतिः।
बुद्धिर्लज्जावपुः शान्तिः कान्तिस्तुष्टिश्च मातरः॥४॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः।
आदित्यश्चन्द्रमाभौमो बुध जीव सिताऽर्कजाः॥५॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः।
देवदानवगन्धर्वाः यक्षराक्षसपन्नगाः॥६॥
ऋषयो मुनयो गावो देवमातर एव च।
देवपत्न्यो द्रुमा नागा दैत्याश्चाऽप्सरसां गणाः॥७॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च।
औषधानि च रत्नानि कालस्यावयवाश्च ये॥८॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एते त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये॥९॥

ॐ पयः पृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः॥ पयस्वतीःप्प्रदिशः सन्तुमह्यम्॥ ॐ पञ्चनद्यःसरस्वतीमपियन्तिसस्रोतसः॥ सरस्वतीतुपञ्चधासो देशेभवत्सरित्॥ ॐ व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्त्थोव्वरुणस्यऽ ऋतसदन्न्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद॥ ॐ पुनन्तुमा देवजनाःपुनन्तुमनसाधियः॥ पुनन्तुव्विश्वाभूतानिजातवेदःपुनीहिमा॥ ॐ देवस्यत्वा सवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्यांपूष्णोहस्ताब्भ्याम्॥ सरस्वत्यैव्वाचोयन्तुर्यन्त्रितयै दधामिबृहस्प्पतेष्ट्वासाम्म्राज्येनाभिषिञ्चाम्यसौ॥ ॐ देवस्यत्वासवितुःप्प्रसवे श्श्विनोर्ब्बाहुब्भ्यांपूष्णोहस्ताब्भ्याम्॥ सरस्वत्यैव्वाचोयन्तुर्यन्त्रेणाग्ग्नेःसाम्म्राज्येना भिषिञ्चामि॥ ॐ देवस्यत्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्यांपूष्णोहस्ताब्भ्याम्॥ अश्श्विनोभैषज्ज्येनतेजसेब्रह्मवर्चसायाभिषिञ्चामि॥ सरस्वत्यैभैषज्ज्येनव्वीर्यायान्नाद्याया भिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेऽभिषिञ्चामि॥ ॐ विश्श्वानिदेव सवितर्द्दुरितानिपरासुव॥ यद्भद्रंतन्नऽआसुव॥ धामच्छदग्ग्निरिन्द्रोब्ब्रह्मादेवोबृहस्प्पतिः॥ सचेतसोव्विश्श्वेदेवायज्ञंप्रावन्तनःशुभे॥ त्वंय्यविष्ठदाशुषोनॄःपाहिशृणुधीगिरः॥ रक्षा

तोकमुतत्क्मना॥ ॐ अन्नपतेऽन्नस्यनोदेह्यनमीवस्यंशुष्मिणः॥ प्रप्रदातारंतारिष ऊर्जंनोधेहिद्विपदेचतुष्पदे॥ ॐ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवीशान्तिरापꣳ शान्तिरोषधयꣳ शान्तिः॥ वनस्पतयꣳशान्तिर्विश्वेदेवाःशान्तिर्ब्ब्रह्मशान्तिꣳ सर्व्वꣳशान्तिꣳशान्तिरेवशान्तिꣳसामाशान्तिरेधि॥ यतोयतः समीहसे ततो नोऽअभयङ्कुरु॥ शन्नःकुरुप्प्रजाब्भ्योभयन्नꣳप्पशुब्भ्यः॥ सुशान्तिर्भवतु॥

ब्रह्मामुरारिस्त्रिपुरान्तकारी भानुः शशीः भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु॥

छायापात्रदानम्—कांस्यपात्र में घृत भरकर उसमें द्रव्य डालकर मुख अवलोकन का संकल्प करे।

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य महाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं सर्वारिष्टविनाशार्थं चाज्यावेक्षणं करिष्ये॥**

ॐ रूपेणवोरूपमब्भ्यागांतुथोवोव्विश्ववेदाव्विभजतु॥ ऋतस्यपथाप्प्रेतचन्द्र दक्षिणाव्विस्वःपश्श्यव्युन्तरिक्षंयतस्वसदस्यैः॥

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ---गोत्रः -----प्रवरः-----नामाऽहं कृतस्य महाविद्यापुरश्चरणकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं इदमवलोकितं कांस्यपात्रस्थितमाज्यं सदक्षिणां मृत्युञ्जयदैवतं मृत्युञ्जयदेवताप्रीतये सर्वारिष्टविनाशार्थञ्च अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

संकल्प करके यजमान ब्राह्मण को आज्यपात्र दे दे। ब्राह्मण आज्यपात्र ग्रहणकर **स्वस्ति वाढय** बोलकर यजमान को आशीर्वाद प्रदान करे।

अपराधक्षमापनम्

आवाहनं न जानामि न जानामि विसर्जनम्।
पूजां चैव न जानामि क्षमस्व परमेश्वर॥१॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे॥२॥
जपच्छिद्रं तपच्छिद्रं यच्छिद्रं शान्तिकर्मणि।
सर्वं भवतु मेऽच्छिन्द्रं ब्राह्मणानां प्रसादतः॥३॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया।
दासोऽयमिति मां मत्त्वा क्षमस्व परमेश्वर॥४॥
ज्ञानतोऽज्ञानतो वापि यन्न्यूनमधिकं कृतम्।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर॥५॥

कर्मणा मनसा वाचा महाविद्यार्चनं मया कृता।
तेन तुष्टिं समासाद्य प्रसीद परमेश्वर॥६॥

यजमानरक्षाबन्धनम्—आचार्य यजमान के दाहिने हाथ में रक्षा बाँधें।

ॐ यदाबध्नन्दाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमानाः॥ तन्मऽआबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम्॥

यजमानपत्नीरक्षाबन्धनम्—आचार्य यजमानपत्नी को रक्षा बाँधें।

ॐ तंपत्नीभिरनुगच्छेमदेवाःपुत्त्रैर्ब्भ्रातृभिरुतवाहिरण्यैः॥ नाकंगृब्भ्णानाः सुकृतस्यलोकेतृतीयेपृष्ठेऽअधिरोचनेदिवः॥

यजमानतिलकः—आचार्य यजमान को सपरिवार तिलक करे।

ॐ युञ्जन्तिब्ब्रध्नमरुषञ्चरन्तम्परितस्थुषः॥ रोचन्तेरोचनादिवि॥ युञ्जन्त्यस्य काम्म्याहरीव्विपक्षसारथे॥ शोणाधृष्णूनृवाहसा॥ ॐ स्वस्तिनऽइन्द्रोवृद्धश्श्रवाꣳ स्वस्तिनःपूषाव्विश्श्ववेदाꣳ॥ स्वस्तिनस्ताक्ष्र्योऽअरिष्टनेमिꣳस्वस्तिनोबृहस्प्पतिर्द्दधातु॥

यजमान-आशीर्वादः—आचार्य यजमान को आशीर्वाद स्वरूप फलादि प्रदान करे।

ॐ पुनस्त्वाऽऽदित्त्यारुद्द्रावसवःसमिन्धतांपुनर्ब्ब्रह्माणोव्वसुनीथयज्ञैः॥ घृतेनत्वंतन्वं व्वर्द्धयस्वसत्त्याःसन्तुयजमानस्यकामाः॥

श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥१॥
शान्तिरस्तु शिवं चास्तु शुभं चास्तु धनं तथा।
ऋद्धिरस्तु वृद्धिरस्तु ब्राह्मणानां प्रसादतः॥२॥
अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः।
निर्धनाः सधनाः सन्तु जीवन्तु शरदां शतम्॥३॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव॥४॥

यजमानपत्नि आशीर्वादः—आचार्य यजमानपत्नी को आशीर्वादस्वरूप फलादि प्रदान करे।

ॐ अनाधृष्टपुरस्तादग्नेराधिपत्यऽआयुर्म्मेदाःपुत्रवतीदक्षिणतऽइन्द्रस्याधिपत्त्येप्प्रजांमेदाःसुषदापश्चाद्देवस्यसवितुराधिपत्त्येचक्षुर्म्मेदाऽआश्श्रुतिरुत्तरतोधातुराधिपत्त्येरायस्पोषंमेदाः॥ व्विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्त्यऽओजोमेदा व्विश्श्वाब्भ्योमानाष्ट्राब्भ्यस्प्पाहिमनोरश्श्वासि॥

श्रीमहाविद्यापुरश्चरणं परिपूर्णम्

परिशिष्टभाग १

महाविद्यायाः मातृकाया होमसामग्रीः

अयुग्मछद्म पुष्प (छितवन), उदुम्बर समिधा, अपामार्ग (चिचिडि), खदिर (खैर), पाकड, वट, पीपल, पलाश, मदार समिधा, कुश, दुर्वा, चमेली, विल्वपत्र, मदार का पर्ण, पलाश पुष्प, तिल, माष वटक (उर्द का बडा), धान्य चूर्ण (चावल का आटा), गोधूम चूर्ण (गेंहूँ का आटा), सैन्धव (सेन्धा नमक), कदली फल (केला), माष समिधा (उर्द की लकड़ी), यव (जौ)।

ब्राह्मण वरण-सामग्री

समस्त ब्राह्मणों के लिए वरण-सामग्री संख्यानुसार—

धोती, कुर्त्ता, बनियान, डुपट्टा या शाल, गमछा, लोटा, थाली, गिलास, आसन, आचमनी, अर्घा, तष्टा, जपमाली, रुद्राक्ष की माला ।

पूजनादि सामग्री

देवता को समर्पित करने की सामग्री—तांबे का कलश ढक्कन सहित १, भगवती के लिए साड़ी १, साया १, ब्लाउज , सुहाग पिटारी, धूप, दीप, पान, सोपाड़ी, सुगन्धि द्रव्य, पञ्चामृत, पञ्चगव्य, अन्य विविध द्रव्य।

अथ महाविद्यायाः मातृकाहोमः

नवकोणं लिखेद्यन्त्रं वह्निबीजेन संयुतम्।
तस्योपरि न्यसेत् पात्रं पूजां कृत्वा सुमन्त्रितः॥

अयुग्मछद्मपुष्पेण होमं कुर्यात् विचक्षणः। कं स्वाहा। उदुम्बरसमिधेन खं स्वाहा अपामार्गेण गं स्वाहा। खदिरेण घं स्वाहा प्लक्षेण ङं स्वाहा। न्यग्रोधेन चं स्वाहा अश्वत्थेन छं स्वाहा। पलाशेन जं स्वाहा अर्केण झं स्वाहा। आम्रेण ञं स्वाहा। कुशेन टं स्वाहा। दूर्वाया ठं स्वाहा। माषया डं स्वाहा। विल्वपत्रेण ढं स्वाहा। अर्कपत्रेण णं स्वाहा। पलाशपुष्पेण तं स्वाहा। तिलैः थं स्वाहा। वटकेन दं स्वाहा। तण्डुलचूर्णेन धं स्वाहा। गोधूमचूर्णेन नं स्वाहा। माषसमिधेन यं स्वाहा। माषेण रं स्वाहा। यवेन लं स्वाहा। लवणेन वं स्वाहा। गुडेन शं स्वाहा। सर्षपेण षं स्वाहा। माषेण सं स्वाहा। तिलेन हं स्वाहा। गुडेन क्षं स्वाहा। लवणेन यं स्वाहा। मत्सेन कं स्वाहा। माषेण बं स्वाहा। सर्षपेण भं स्वाहा। जम्बीर-समिधेन मं स्वाहा। यवपायसघृतैः सर्वभूतपिशाचं निःसारय निःसारय मारय मारय भक्षय भक्षय स्वाहा। ॐ ह्रीं ह्रीं ह्रीं सर्वभूतपिशाचं छिन्धि छिन्धि स्वादय स्वादय स्वाहा। ॐ रुँ रुँ रुँ सर्वभूतपिशाचं मारय मारय स्वाहा। ॐ हैं हैं हैं सर्वभूतपिशाचमुच्चाटयोच्चाटय स्वाहा।ॐ हूँ हूँ हूँ सर्वभूतपिशाचं मोहय मोहय

निःसारय निःसारय स्वाहा। ॐ अँ स्वाहा। ॐ आँ स्वाहा। ॐ इँ स्वाहा। ॐ ईँ स्वाहा। ॐ उँ स्वाहा। ॐ ऊँ स्वाहा। ॐ ऋँ स्वाहा। ॐ ॠँ स्वाहा। ॐ ऌँ स्वाहा। ॐ ॡँ स्वाहा। ॐ एँ स्वाहा। ॐ ऐँ स्वाहा। ॐ ओँ स्वाहा। ॐ औँ स्वाहा। ॐ अँ स्वाहा। ॐ अः स्वाहा। सर्वभूत-पिशाचं निःसारय निःसारय स्वाहा। ॐ महाविद्यायै नमः॥

महाविद्याप्रयोगः

विनियोगः—ॐ अस्यश्रीमहाविद्यास्तोत्रमालामहामन्त्रस्य अर्यमात्रृषिः, गायत्रीजगतीछन्दांसि, श्रीसदाशिवदेवता, महाशिवप्रीत्यर्थे मनोवांछितसिद्ध्यर्थे जपे पाठे विनियोगः।

ॐ महाविद्यां प्रवक्ष्यामि महादेवेन निर्मिताम्।
चिन्तितां ज्ञानरूपेण मनोहृदयनन्दिनीम॥
उत्तमां सर्वविद्यानां सर्वभूतवशंकरी॥

ॐ कुलकरी श्रेयस्सकरी इष्टकरी पुष्टिकरी प्रजाकरी सर्वशत्रुक्षयकरी उत्साहबलवर्द्धिनी सर्वशत्रुग्रहोच्चाटिनी पुत्रपौत्रादिवर्द्धिनी एकाहिकं द्व्याहिकं त्र्याहिकं चातुर्थिकं पाञ्चाह्निकं षाष्ठहिकं साप्ताहिकं अष्टाहिकं सार्धमासिकं साम्वत्सरिकं वैजयन्तिकं वातिकं पैत्तिकं श्लेष्मायिकेतियकागन्तुककुष्ठरोग-पाण्डुरोग-मुखरोग-जठररोग-प्रमेहशूलविसूचिकाक्षयविस्फोटकादिविनाशनाय स्वाहा। ॐ वेतालज्वर-ज्वराग्निज्वर-भूतज्वर-प्रेतज्वर-पिशाचज्वर-ब्रह्मराक्षस-ज्वर-दृष्टिज्वर-विस्फोटकज्वर-पिड़ितज्वर-मासार्धज्वर-मातृप्रयोगादिविनाशनाय स्वाहा। ॐ अक्षशूल-कक्षशूल-कुक्षिशूल-कर्णशूल-गलशूल-दन्तशूल-गण्डशूल-शिरश्शूल-शिरोऽर्धशूल-पादशूल-पादार्द्धशूल-प्राणशूल-सर्वाङ्गशूल-विनाशनाय स्वाहा। ॐ सर्वव्याधिविनाशनाय स्वाहा। ॐ सर्वशत्रूविनाशनाय स्वाहा। ॐ सर्वस्फोटक क्लेशविनाशनाय स्वाहा। ॐ आत्मरक्षा-परमात्मरक्षा-प्रत्यङ्गरक्षा-शीतरक्षा-परगतिवायुरक्षा तेषां सकलबध्नामि। ॐ हूँ हूँ हूँ हरदेहिनी स्वाहा। ॐ इन्द्रदेहिनी स्वाहा। ॐ ईश्वर ब्रह्मदण्डं प्रहरदण्डेति हिलि हिलि मायादण्डं नित्यं विश्रामय विश्रामय। रागिणी हंसिनी शूलिनी गारुड़ी रक्ष रक्ष स्वाहा।ॐ ह्रां ह्रीं ह्रूं हैं हौं हं ह्रः स्वाहा। गायत्री पुष्पधारिणी उल्कामुखी गजमुखी रुद्रमङ्गशिरो धारिणी गं गणेशाय नमः। ॐ ब्रह्मणे नमः। ॐ विष्णवे नमः। ॐ शिवाय नमः। ॐ सूर्याय नमः। ॐ सोमाय नमः। ॐ मङ्गलाय नमः। ॐ बुधाय नमः। ॐ बृहस्पतये नमः। ॐ शुक्राय नमः। ॐ शनैश्चराय नमः। ॐ राहवे नमः। ॐ केतवे नमः। ॐ महाशान्तिकभूतप्रेतपिशाचब्रह्मराक्षसवेतालसर्ववृश्चिकभय-विनाशनाय स्वाहा। ॐ असिकुशलकराय वारय भुशुण्डिपालभूतप्रेतग्रहव्याघ्रादि

मृगान् बध्नामि ।सर्व मायां बध्नामि। ॐ सर्वबलं बध्नामि। ॐ बन्धनं कुरु कुरु स्वाहा ॐ पञ्चयोजनविस्तीर्णं रुद्रो वसति मण्डलं कुरु कुरु स्वाहा।

ॐ कँ स्वाहा। ॐ कँ कँ स्वाहा। ॐ खँ स्वाहा। ॐ खँ खँ स्वाहा। ॐ गँ स्वाहा। ॐ गँ गँ स्वाहा। ॐ घँ स्वाहा। ॐ घँ घँ स्वाहा। ॐ ङँ स्वाहा। ॐ ङँ ङँ स्वाहा। ॐ चँ स्वाहा। ॐ चँ चँ स्वाहा। ॐ छँ स्वाहा। ॐ छँ छँ स्वाहा। ॐ जँ स्वाहा। ॐ जँ जँ स्वाहा। ॐ झँ स्वाहा। ॐ झँ झँ स्वाहा। ॐ ञँ स्वाहा। ॐ ञँ ञँ स्वाहा। ॐ टँ स्वाहा। ॐ टँ टँ स्वाहा। ॐ ठँ स्वाहा। ॐ ठँ ठँ स्वाहा। ॐ डँ स्वाहा। ॐ डँ डँ स्वाहा। ॐ ढँ स्वाहा। ॐ ढँ ढँ स्वाहा। ॐ णँ स्वाहा। ॐ णँ णँ स्वाहा। ॐ तँ स्वाहा। ॐ तँ तँ स्वाहा। ॐ थँ स्वाहा। ॐ थँ थँ स्वाहा। ॐ दँ स्वाहा। ॐ दँ दँ स्वाहा। ॐ धँ स्वाहा। ॐ धँ धँ स्वाहा। ॐ नँ स्वाहा। ॐ नँ नँ स्वाहा। ॐ पँ स्वाहा। ॐ पँ पँ स्वाहा। ॐ फँ स्वाहा। ॐ फँ फँ स्वाहा। ॐ बँ स्वाहा। ॐ बँ बँ स्वाहा। ॐ भँ स्वाहा। ॐ भँ भँ स्वाहा। ॐ मँ स्वाहा। ॐ मँ मँ स्वाहा। ॐ यँ स्वाहा। ॐ यँ यँ स्वाहा। ॐ रँ स्वाहा। ॐ रँ रँ स्वाहा। ॐ लँ स्वाहा। ॐ लँ लँ स्वाहा। ॐ वँ स्वाहा। ॐ वँ वँ स्वाहा। ॐ शँ स्वाहा। ॐ शँ शँ स्वाहा। ॐ षँ स्वाहा। ॐ षँ षँ स्वाहा। ॐ सँ स्वाहा। ॐ सँ सँ स्वाहा। ॐ हँ स्वाहा। ॐ हँ हँ स्वाहा। ॐ लँ स्वाहा। ॐ लँ लँ स्वाहा। ॐ क्षँ स्वाहा। ॐ क्षँ क्षँ स्वाहा।

ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिकभूतप्रेतपिशाचब्रह्मराक्षसवेतालसर्ववृश्चिकभयनाशनाय स्वाहा। ॐ नमो भगवते महेन्द्रदिग्दिशायां ऐरावतारूढं वज्रहस्तं स्वपरिवारसहितं दिग्देवताधिपतिमैन्द्रमण्डलं बध्नामि स्वाहा। पूर्वदिशायां वज्रको नाम राक्षसस्तस्य वज्रकस्याऽष्टादशकोटिसहस्रस्य पिशाचस्य दिशां बध्नामि स्वाहा। इन्द्रमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्रूं फट् स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिकभूतप्रेतपिशाचब्रह्मराक्षसवेतालसर्ववृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते अग्निदिग्दिशायां मृगारूढं शक्तिहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं अग्निमण्डलं बध्नामि स्वाहा। अग्निदिशायां अग्निज्वालोनामराक्षसस्तस्याऽग्निज्वालस्य अष्टादशकोटिसहस्रस्य पिशाचस्य दिशां बध्नामि स्वाहा। अग्निमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्रूं फट् स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिकभूतप्रेतपिशाचब्रह्मराक्षसवेताल सर्ववृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते दक्षिणदिग्दिशायां महिषारूढं दण्डहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं बध्नामि स्वाहा। दक्षिणदिशायां

एकपिङ्गलिको नाम राक्षसस्तस्यैकपिङ्गलिकस्य अष्टादशकोटिसहस्रस्य पिशाचस्य दिशां बध्नामि स्वाहा। यममण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूं फट् स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिकभूतप्रेतपिशाचब्रह्मराक्षसवेतालसर्ववृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते नैर्ऋत्यदिग्दिशायां प्रेतारूढं खड्गहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं नैर्ऋत्यमण्डलं बध्नामि स्वाहा। नैर्ऋत्यदिशायां मरीचिकोनामराक्षसस्तस्य मरीचिकस्य अष्टादशकोटिसहस्रस्य पिशाचस्य दिशां बध्नामि। नैर्ऋत्यमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूं फट् स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिकभूतप्रेतपिशाचब्रह्मराक्षसवेतालसर्ववृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते पश्चिमदिग्दिशायां मकरारूढं पाशहस्तस्वपरिवारसहितं दिग्देवताधिपतिं वरुणमण्डलं बध्नामि स्वाहा। ॐ पश्चिमदिशायां मकरो नाम राक्षसस्तस्य मकरस्य अष्टादशकोटिसहस्रस्य पिशाचस्य दिशां बध्नामि। पश्चिममण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूं फट् स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिक भूतप्रेतपिशाचब्रह्मराक्षसवेतालसर्ववृश्चिक भय विनाशनाय स्वाहा। ॐ नमो भगवते वायव्यदिग्दिशायां मृगारूढं धनुर्हस्तं स्वपरिवार सहितं दिग्देवताधिपतिं वायव्यमण्डलं बध्नामि स्वाहा। ॐ वायव्यदिशायां तक्षको नाम राक्षसस्तस्य तक्षकस्य अष्टादशकोटिसहस्रस्य पिशाचस्य दिशां बध्नामि। वायव्यमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य फट् स्वाहा। ॐ अस्त्राय फट् स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिकभूतप्रेतपिशाचब्रह्मराक्षसवेतालसर्ववृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते उत्तरदिग्दिशायां नरारूढं गदाहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं कुबेरमण्डलं बध्नामि स्वाहा। ॐ हिमवन्नगोत्तरदिशायां महाभीमो नाम राक्षसस्तस्य महाभीमस्य अष्टादशकोटिसहस्रस्य पिशाचस्य दिशां बध्नामि स्वाहा। उत्तरदिशां बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य फट् स्वाहा। ॐ अस्त्राय फट् स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिक भूतप्रेतपिशाचब्रह्मराक्षसवेतालसर्ववृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते ईशानदिग्दिशायां वृषारूढं शूलहस्तं स्वपरिवार सहितं दिग्देवताधिपतिं ईशानमण्डलं बध्नामि स्वाहा। ॐ ईशानदिशायां भैरवो नाम राक्षसस्तस्य भैरवस्य अष्टादशकोटिसहस्रस्य पिशाचस्य दिशां बध्नामि स्वाहा। ईशानमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य फट् स्वाहा। ॐ अस्त्राय फट् स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिकभूतप्रेतपिशाचब्रह्मराक्षस

वेतालसर्ववृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते ऊर्ध्वब्रह्मदिग्दिशायां हंसारूढं ब्रह्मास्त्रहस्तं परिवारसहितं दिग्देवताधिपतिं ब्रह्ममण्डलं बध्नामि स्वाहा। ॐ उर्ध्वदिशायां ब्रह्मरूपो नाम राक्षसस्तस्य ब्रह्मरूपस्य अष्टादशकोटिसहस्रस्य पिशाचस्य दिशां बध्नामि स्वाहा। उर्ध्वमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य फट् स्वाहा। ॐ अस्त्राय फट् स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिकभूतप्रेतपिशाचब्रह्मराक्षसवेतालसर्ववृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते अधःअनन्तदिग्दिशायां लोष्ठनागारूढं चक्रहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं अनन्तकालाग्निमण्डलं बध्नामि स्वाहा। ॐ अनन्तदिशायां अनन्तरूपो नाम राक्षसस्तस्य अष्टादशकोटिसहस्रस्य पिशाचस्य दिशां बध्नामि स्वाहा। अनन्तमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य फट् स्वाहा। ॐ अस्त्राय फट् स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिकभूतप्रेतपिशाचब्रह्मराक्षसवेतालसर्ववृश्चिकभयविनाशनाय स्वाहा। ॐ शिखां मे क्लीं रक्षतु ब्रह्माणी ॐ ह्लां ह्लीं ह्लूं व्रीं क्लीं बूं ह्लूं फट् स्वाहा। ॐ शिरो मे रक्षतु माहेश्वरी ॐ ह्लां ह्लीं ह्लूं व्रीं क्लीं बूं ह्लूं फट् स्वाहा। ॐ उदरं मे रक्षतु रुद्राणी ॐ ह्लां ह्लीं ह्लूं व्रीं क्लीं बूं ह्लूं फट् स्वाहा। ॐ कटिं मे रक्षतु चामुण्डा ॐ ह्लां ह्लीं ह्लूं व्रीं क्लीं बूं ह्लूं फट् स्वाहा। ॐ पादौ मे रक्षतु महालक्ष्मी ॐ ह्लां ह्लीं ह्लूं व्रीं क्लीं बूं ह्लूं फट् स्वाहा। ॐ भुजौ मे ह्लीँ कौमारी रक्षतु। ॐ ह्लां ह्लीं ह्लूं व्रीं क्लीं बूं ह्लूं फट् स्वाहा। ॐ जङ्घे मे रक्षतु नारसिंहि ॐ ह्लां ह्लीं ह्लूं व्रीं क्लीं बूं ह्लूं फट् स्वाहा। ॐ नमो भगवते रुद्राय भैरवाय गणेश्वराय दुर्गायै महाशान्तिकभूतप्रेतपिशाचब्रह्मराक्षसवेतालसर्ववृश्चिकभयविनाशनाय स्वाहा।

परिणामे महाविद्यां महादेवस्य सन्निधौ।
एकविंशतिवारेण पठित्वा सिद्धिमाप्नुयात्॥१॥
स्त्रियो वा पुरुषो वाऽपि पापं भस्मं समाचरेत्।
दुष्टानां मारणं चैव सर्वग्रहनिवारणम्॥२॥
सर्वकार्येषु सिद्धिः स्यात् प्रेतशान्तिर्विशेषतः॥

श्रीमहाभैरवीतन्त्रे महाविद्यास्तोत्रं परिपूर्णम्

●

परिशिष्टभाग २

सप्रयोगमहाविद्यास्तोत्रम्

विनियोग:—ॐ अस्यश्रीमहाविद्यास्तोत्रमालामहामन्त्रस्य अर्यमाऋषिः, गायत्री छन्दः, श्रीसदाशिवकालिकादेवता, क्रीँ बीजं, ह्रीँ शक्तिः, ह्रूँ कीलकं, श्रीसदाशिवकालिकादेवता च प्रीत्यर्थे जपे पाठे विनियोगः।

उद्यच्छीतांशुरश्मिद्युतिचयसदृशीं फुल्लपद्मोपविष्टां,
वीणानागेन्द्रशंखाऽऽयुधपरशुधरां दोर्भिरीड्यैश्चतुर्भिः।
मुक्ताहारांशुनानामणियुतहृदयां सिन्धुपात्रं वहन्तीं,
वन्देऽभीड्यां भवानीं प्रहसितवदनां साधकेष्टप्रदात्रीम्॥

ॐ कुलकरीं गोत्रकरीं धनकरीं पुष्टिकरीं वृद्धिकरीं हलाकरीं सर्वशत्रुक्षयकरीं उत्साहकरीं बलवर्द्धिनीं सर्ववज्रकायारचितां सर्वग्रहोच्चाटिनीं पुत्रपौत्राऽभिवर्द्धिनीं आयुरारोग्यैश्वर्याभिवर्द्धिनीं सर्वभूतस्तम्भिनीं द्राविणीं मोहिनीं सर्वाकर्षिणीं सर्वलोकवशङ्करीं सर्वराजवशङ्करीं सर्वयन्त्र-मन्त्र-तन्त्रप्रभेदिनीं एकाहिकं द्वयाहिकं त्र्याहिकं चातुर्थिकं पाञ्चाह्निकं साप्ताहिकं अर्धमासिकं मासिकं षाण्मासिकं साम्वत्सरिकं वैजयन्तिकं पैत्तिकं वातिकं श्लैष्मिकं सान्निपातिकं कुष्ठरोग-मुखरोग-गण्डरोग-प्रमेहरोग-जिगररोग-समस्त-उदररोग-शुल्कविषक्षयकरीं-विस्फोटकादि-विनाशनाय स्वाहा। प्रेतादिज्वर-वेतालादिज्वर-रात्रिज्वर-दिवसज्वर-अग्निज्वर-प्रत्यग्निज्वर-राक्षसज्वर-पिशाचज्वर-ब्रह्मराक्षसज्वर-प्रस्वेदज्वर-विषमज्वर-त्रिपुरज्वर-मायाज्वर-अभिचारिकज्वर-दृष्टिज्वर-वृष्टिज्वर-स्मरादिज्वरप्रयोगादि-विनाशनाय स्वाहा। ॐ सर्वव्याधिविनाशनाय स्वाहा। ॐ सर्वशत्रुविनाशनाय स्वाहा। अक्षिशूल-कुक्षिशूल-कर्णशूल-घ्राणशूल-उदरशूल-गलशूल-गण्डशूल-दन्तशूल-पादशूल-पादार्द्धशूलविनाशनाय स्वाहा। ॐ सर्वव्याधिविनाशनाय स्वाहा। ॐ सर्वशत्रुविनाशनाय स्वाहा। ॐ सर्वस्फोटकसर्वक्लेशविनाशनाय स्वाहा। ॐ आत्मरक्षा-परमात्मरक्षा-मित्ररक्षा-अग्निरक्षा-प्रत्यग्निरक्षा-परगतिवातोरक्षा तेषां सकलबन्धाय स्वाहा। ॐ हरदेहिनी स्वाहा। ॐ इन्द्रदेहिनी स्वाहा। ॐ स्वस्यब्रह्म-दण्डं विश्रामय। ॐ विश्रामय विष्णुदण्डम्। ॐ ज्वर-ज्वरेश्वरकुमार दण्डम्। ॐ हिलि मिलि मायादण्डम्। ॐ नित्यं नित्यं विश्रामय विश्रामय वारुणी शूलिनी गारुड़ी रक्ष स्वाहा।

गङ्गादिपुलिने जाता पर्वते च वनान्तरे।
रुद्रस्य हृदये जाता विद्याऽहं कामरूपिणी॥

ज्वल ज्वल देहस्य देहेन सकललौहपिङ्गिलि कटिमपुरि किलि किलि महादण्डं कुमारदण्डं नृत्य नृत्य विष्णुवन्दित हंसिनी शङ्खिनी चक्रिणी गदिनी शूलिनी रक्ष रक्ष स्वाहा।

ॐ ह्रँ स्वाहा। ॐ ह्रँ ह्रँ स्वाहा। ॐ ह्राँ स्वाहा। ॐ ह्राँ ह्राँ स्वाहा। ॐ ह्रीँ स्वाहा। ॐ ह्रीँ ह्रीँ स्वाहा। ॐ ह्रूँ स्वाहा। ॐ ह्रूँ ह्रूँ स्वाहा। ॐ ह्रैँ स्वाहा। ॐ ह्रैँ ह्रैँ स्वाहा। ॐ ह्रौँ स्वाहा। ॐ ह्रौँ ह्रौँ स्वाहा। ॐ ह्रः स्वाहा। ॐ ह्रः ह्रः स्वाहा। ॐ क्रँ स्वाहा। ॐ क्रँ क्रँ स्वाहा। ॐ क्राँ स्वाहा। ॐ क्राँ क्राँ स्वाहा। ॐ क्रीँ स्वाहा। ॐ क्रीँ क्रीँ स्वाहा। ॐ क्रूँ स्वाहा। ॐ क्रूँ क्रूँ स्वाहा। ॐ क्रैँ स्वाहा। ॐ क्रैँ क्रैँ स्वाहा। ॐ क्रौँ स्वाहा। ॐ क्रौँ क्रौँ स्वाहा। ॐ क्रः स्वाहा। ॐ क्रः क्रः स्वाहा। ॐ अँ स्वाहा। ॐ अँ अँ स्वाहा। ॐ आँ स्वाहा। ॐ आँ आँ स्वाहा। ॐ इँ स्वाहा। ॐ इँ इँ स्वाहा। ॐ ईँ स्वाहा। ॐ ईँ ईँ स्वाहा। ॐ उँ स्वाहा। ॐ उँ उँ स्वाहा। ॐ ऊँ स्वाहा। ॐ ऊँ ऊँ स्वाहा। ॐ ॠँ स्वाहा। ॐ ॠँ ॠँ स्वाहा। ॐ लृँ स्वाहा। ॐ लृँ लृँ स्वाहा। ॐ लॄँ स्वाहा। ॐ लॄँ लॄँ स्वाहा। ॐ एँ स्वाहा। ॐ एँ एँ स्वाहा। ॐ ऐँ स्वाहा। ॐ ऐँ ऐँ स्वाहा। ॐ ओँ स्वाहा। ॐ ओँ ओँ स्वाहा। ॐ औँ स्वाहा। ॐ औँ औँ स्वाहा। ॐ अँ स्वाहा। ॐ अँ अँ स्वाहा। ॐ अः स्वाहा। ॐ अः अः स्वाहा। ॐ कँ स्वाहा। ॐ कँ कँ स्वाहा। ॐ खँ स्वाहा। ॐ खँ खँ स्वाहा। ॐ गँ स्वाहा। ॐ गँ गँ स्वाहा। ॐ घँ स्वाहा। ॐ घँ घँ स्वाहा। ॐ ङँ स्वाहा। ॐ ङँ ङँ स्वाहा। ॐ चँ स्वाहा। ॐ चँ चँ स्वाहा। ॐ छँ स्वाहा। ॐ छँ छँ स्वाहा। ॐ जँ स्वाहा। ॐ जँ जँ स्वाहा। ॐ झँ स्वाहा। ॐ झँ झँ स्वाहा। ॐ ञँ स्वाहा। ॐ ञँ ञँ स्वाहा। ॐ टँ स्वाहा। ॐ टँ टँ स्वाहा। ॐ ठँ स्वाहा। ॐ ठँ ठँ स्वाहा। ॐ डँ स्वाहा। ॐ डँ डँ स्वाहा। ॐ ढँ स्वाहा। ॐ ढँ ढँ स्वाहा। ॐ णँ स्वाहा। ॐ णँ णँ स्वाहा। ॐ तँ स्वाहा। ॐ तँ तँ स्वाहा। ॐ थँ स्वाहा। ॐ थँ थँ स्वाहा। ॐ दँ स्वाहा। ॐ दँ दँ स्वाहा। ॐ धँ स्वाहा। ॐ धँ धँ स्वाहा। ॐ नँ स्वाहा। ॐ नँ नँ स्वाहा। ॐ पँ स्वाहा। ॐ पँ पँ स्वाहा। ॐ फँ स्वाहा। ॐ फँ फँ स्वाहा। ॐ बँ स्वाहा। ॐ बँ बँ स्वाहा। ॐ भँ स्वाहा। ॐ भँ भँ स्वाहा। ॐ मँ स्वाहा। ॐ मँ मँ स्वाहा। ॐ यँ स्वाहा। ॐ यँ यँ स्वाहा। ॐ रँ स्वाहा। ॐ रँ रँ स्वाहा। ॐ लँ स्वाहा। ॐ लँ लँ स्वाहा। ॐ वँ स्वाहा। ॐ वँ वँ स्वाहा। ॐ शँ स्वाहा। ॐ शँ शँ स्वाहा। ॐ षँ स्वाहा। ॐ षँ षँ स्वाहा। ॐ सँ स्वाहा। ॐ सँ सँ स्वाहा। ॐ हँ स्वाहा। ॐ हँ हँ स्वाहा। ॐ लँ स्वाहा। ॐ लँ लँ स्वाहा। ॐ क्षँ स्वाहा। ॐ क्षँ क्षँ स्वाहा।

ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ दुर्गे महाशक्ति भूत-प्रेत-पिशाच-राक्षस-ब्रह्मराक्षस-सर्व-वेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमः शिवाय स्वाहा। ॐ सूँ सूर्याय स्वाहा। ॐ सोँ सोमाय स्वाहा। ॐ मँ मंगलाय स्वाहा। ॐ बुँ बुधाय स्वाहा। ॐ बृँ

बृहस्पतये स्वाहा। ॐ शुँ शुक्राय स्वाहा। ॐ शँ शनैश्चराय स्वाहा। ॐ राँ राहवे स्वाहा। ॐ कँ केतवे स्वाहा। ॐ महाशान्तिक भूत-प्रेत-पिशाच-राक्षस-ब्रह्मराक्षस-वेताल-वृश्चिकभय विनाशनाय स्वाहा। ॐ सिंह-शार्दूल-गजेन्द्र-ग्राह-व्याघ्रादि-मृगान् बध्नामि स्वाहा। ॐ गतिं बध्नामि स्वाहा। ॐ आज्ञां बध्नामि स्वाहा। ॐ सर्वं बध्नामि स्वाहा। ॐ सर्वजन्तुं बध्नामि स्वाहा। ॐ बन्ध बन्ध मोचनं कुरु कुरु स्वाहा।

दिग्बन्धनम्

ॐ नमो भगवते महेन्द्रदिग्दिशायां ऐरावतारूढं वज्रहस्तं स्वपरिवारसहितं दिग्देवताधिपतिमैन्द्रमण्डलं बध्नामि स्वाहा। ॐ ऐन्द्रमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिक-भूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते अग्निदिग्दिशायां मृगारूढं शक्तिहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं अग्निमण्डलं बध्नामि स्वाहा। ॐ अग्निमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षस-ब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते दक्षिणदिग्दिशायां महिषारूढं कृष्णवर्णं दण्डहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं बध्नामि स्वाहा। ॐ यममण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभय-विनाशनाय स्वाहा। ॐ नमो भगवते नैर्ऋत्यदिग्दिशायां प्रेतारूढं खड्गहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं नैर्ऋत्यमण्डलं बध्नामि स्वाहा। ॐ नैर्ऋत्यमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते पश्चिमदिग्दिशायां मकरारूढं पाशहस्तस्वपरिवारसहितं दिग्देवताधिपतिं वरुणमण्डलं बध्नामि स्वाहा। ॐ वरुणमण्डलं बन्ध बन्ध रक्ष

रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते वायव्यदिग्दिशायां मृगारूढं धनुर्हस्तं स्वपरिवारसहितं दिग्देवताधिपतिं वायव्यमण्डलं बध्नामि स्वाहा। ॐ वायव्यमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभय विनाशनाय स्वाहा। ॐ नमो भगवते उत्तरदिग्दिशायां नरारूढं गदाहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं कुबेरमण्डलं बध्नामि स्वाहा। ॐ कुबेरमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते ईशानदिग्दिशायां वृषारूढं शूलहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं ईशानमण्डलं बध्नामि स्वाहा। ॐ ईशानमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिक भूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते उर्ध्वब्रह्मदिग्दिशायां हंसारूढं ब्रह्मास्त्रहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं ब्रह्ममण्डलं बध्नामि स्वाहा। ॐ ब्रह्ममण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते अधोअनन्तदिग्दिशायां लोष्ठनागारूढं चक्रहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं अनन्तकालाग्निमण्डलं बध्नामि स्वाहा। ॐ अनन्तकालाग्निमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा।

ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते विष्णुदिशायां गरुड़ारूढं गदाहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं विष्णुमण्डलं बध्नामि स्वाहा। ॐ विष्णुमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्लाँ ह्लीँ ह्लूँ ह्लैँ ह्लौँ ह्लः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते पातालदिशायां कूर्मारूढं लोष्ठभागं कुपरिघहस्तं स्वपरिवारसहितं दिग्देवताधिपतिं पातालमण्डलं बध्नामि स्वाहा। ॐ पातालमण्डलं बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ ह्लाँ ह्लीँ ह्लूँ ह्लैँ ह्लौँ ह्लः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा।

दिग्पिशाचानां बन्धनम्

ॐ पूर्वदिशायां वज्रको नाम राक्षसस्तस्य वज्रकस्याऽष्टादशकोटिसहस्रपिशाचस्य दिशां बध्नामि स्वाहा। पूर्वदिशायां पिशाचानां दिशां बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूँ अस्त्राय फट् स्वाहा। ॐ ह्लाँ ह्लीँ ह्लूँ ह्लैँ ह्लौँ ह्लः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ अग्निदिशायां अग्निज्वालो नाम राक्षसस्तस्याऽग्निज्वालस्य अष्टादशकोटिसहस्रपिशाचस्य दिशां बध्नामि स्वाहा। अग्निदिशायां पिशाचानां दिशां बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूँ अस्त्राय फट् स्वाहा। ॐ ह्लाँ ह्लीँ ह्लूँ ह्लैँ ह्लौँ ह्लः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षस बेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ दक्षिणदिशायां एकपिङ्गलिको नाम राक्षसस्तस्यैकपिङ्गलिकस्य अष्टादशकोटिसहस्रपिशाचस्य दिशां बध्नामि स्वाहा। दक्षिणदिशायां पिशाचानां दिशां बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूँ अस्त्राय फट् स्वाहा। ॐ ह्लाँ ह्लीँ ह्लूँ ह्लैँ ह्लौँ ह्लः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे

महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ नैर्ऋत्यदिशायां मरीचिको नाम राक्षसस्तस्य मरीचिकस्य अष्टादशकोटिसहस्रपिशाचस्य दिशां बध्नामि स्वाहा। नैर्ऋत्यदिशायां पिशाचानां दिशां बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूँ अस्त्राय फट् स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ पश्चिमदिशायां मकरो नाम राक्षसस्तस्य मकरस्य अष्टादशकोटिसहस्रपिशाचस्य दिशां बध्नामि स्वाहा। पश्चिमदिशायां पिशाचानां दिशां बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूँ अस्त्राय फट् स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ वायव्यदिशायां तक्षको नाम राक्षसस्तस्य तक्षकस्य अष्टादशकोटिसहस्रपिशाचस्य दिशां बध्नामि स्वाहा। वायव्यदिशायां पिशाचानां दिशां बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूँ अस्त्राय फट् स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ उत्तरदिशायां महाभीमो नाम राक्षसस्तस्य महाभीमस्य अष्टादशकोटिसहस्रपिशाचस्य दिशां बध्नामि स्वाहा। उत्तरदिशायां पिशाचानां दिशां बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूँ अस्त्राय फट् स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ ईशानदिशायां भैरवो नाम राक्षसस्तस्य भैरवस्य अष्टादशकोटिसहस्रपिशाचस्य दिशां बध्नामि स्वाहा। ईशान-दिशायां पिशाचानां दिशां बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूँ अस्त्राय फट् स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाच-राक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा।

ॐ ऊर्ध्वदिशायां ब्रह्मरूपो नाम राक्षसस्तस्य ब्रह्मरूपस्य अष्टादशकोटिसहस्रपिशाचस्य दिशां बध्नामि स्वाहा। ऊर्ध्वदिशायां पिशाचानां दिशां बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूँ अस्त्राय फट् स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ अधोदिशायां नाग रूपो नाम राक्षसस्तस्य नागरूपस्य अष्टादशकोटिसहस्रपिशाचस्य दिशां बध्नामि स्वाहा। अधोदिशायां पिशाचानां दिशां बन्ध बन्ध रक्ष रक्ष माचल माचल माक्रम्य माक्रम्य स्वाहा। ॐ हूँ अस्त्राय फट् स्वाहा। ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः स्वाहा। ॐ क्राँ क्रीँ क्रूँ क्रैँ क्रौँ क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ दुर्गे महाशान्तिकभूतप्रेतपिशाचराक्षसब्रह्मराक्षसबेतालवृश्चिकभयविनाशनाय स्वाहा। ॐ शिखायां मे ऐँ ब्रह्माणी रक्षतु। ॐ ह्राँ ह्रीँ व्रीँ ब्लीँ क्षौँ हुँ फट् स्वाहा। ॐ शिरो मे ह्रीँ वैष्णवी रक्षतु। ॐ ह्राँ ह्रीँ व्रीँ ब्लीँ क्षौँ हुँ फट् स्वाहा। ॐ ललाटे मे क्लीँ माहेश्वरी रक्षतु। ॐ ह्राँ ह्रीँ व्रीँ ब्लीँ क्षौँ हुँ फट् स्वाहा। ॐ भुजौ मे ह्रीँ कौमारी रक्षतु। ॐ ह्राँ ह्रीँ व्रीँ ब्लीँ क्षौँ हुँ फट् स्वाहा। ॐ उदरे मे ह्रीँ ऐन्द्री रक्षतु। ॐ ह्राँ ह्रीँ व्रीँ ब्लीँ क्षौँ हुँ फट् स्वाहा। ॐ जङ्घे मे ह्रीँ वाराही रक्षतु। ॐ ह्राँ ह्रीँ व्रीँ ब्लीँ क्षौँ हुँ फट् स्वाहा। ॐ पादौ मे ह्रीँ नारसिंहि रक्षतु। ॐ ह्राँ ह्रीँ व्रीँ ब्लीँ क्षौँ हुँ फट् स्वाहा। ॐ सर्वाङ्गं मे क्रीँ चामुण्डे रक्षतु। ॐ ह्राँ ह्रीँ व्रीँ ब्लीँ क्षौँ हुँ फट् स्वाहा।

परिणामे महाविद्यां महादेवस्य सन्निधौ।
एकविंशतिवारेण पठित्वा सिद्धिमाप्नुयात्॥१॥
स्त्रियो वा पुरुषो वाऽपि पापं भस्मं समाचरेत्।
दुष्टानां मारणं चैव सर्वग्रहनिवारणम्॥२॥
सर्वकार्येषु सिद्धिः स्यात् प्रेतशान्तिर्विशेषतः॥

सर्वमन्त्रकीलनम्

ॐ उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्।
नृसिंहं भीषणं भद्रं मृत्योर्मृत्युं नमाम्यहम्॥३॥
अष्टोत्तरशतमभिमन्त्र्य जलं पाययेत्॥

महाविद्यामन्त्रः

ॐ ह्रूँ श्रीँ ह्रीँ वज्रवैरोचनीये हुँ हुँ फट् स्वाहा ऐँ।

ध्यानम्

चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम्।
महाभीमां करालास्यां सिद्धविद्याधरैर्युताम्॥१॥
मुण्डमालावलीकीर्णां मुक्तकेशीं स्मिताननाम्।
एवं ध्यायेन्महादेवीं सर्वकामार्थसिद्धये॥२॥

शिव उवाच

दुर्लभं तारिणीमार्गं दुर्लभं तारिणीपदम्।
मन्त्रार्थं मन्त्रचैतन्यं दुर्लभं शवसाधनम्॥३॥
श्मशानसाधनं योनिसाधनं ब्रह्मसाधनम्।
क्रियासाधनकं भक्तिसाधनं मुक्तिसाधनम्॥४॥
तव प्रसादाद् देवेशि! सर्वाः सिध्यन्ति सिद्धयः।
नमस्ते चण्डिके चण्डि! चण्डमुण्डविनाशिनी!॥५॥
नमस्ते कालिके! कालमहाभयविनाशिनी!।
शिवे रक्ष जगद्धात्रि! प्रसीद हरवल्लभे!॥६॥
प्रणमामि जगद्धात्रीं जगत्पालनकारिणीम्।
जगत् क्षोभकरी विद्यां जगत्सृष्टिविधायिनीम्॥७॥
करालां विकटां घोरां मुण्डमालाविभूषिताम्।
हरार्चितां हराराध्यां नमामि हरवल्लभाम्॥८॥
गौरीं गुरुप्रियां गौरवर्णालङ्कारभूषिताम्।
हरप्रियां महामायां नमामि ब्रह्मपूजिताम्॥९॥
सिद्धां सिद्धेश्वरीं सिद्धविद्याधरगणैर्युताम्।
मन्त्रसिद्धिप्रदां योनिसिद्धिदां लिङ्गशोभिताम्॥१०॥
प्रणमामि महामायां दुर्गां दुर्गतिनाशिनीम्।
उग्रामुग्रमयीमुग्रतारामुग्रगणैर्युताम् ॥११॥
नीलां नीलघनश्यामां नमामि नीलसुन्दरीम्।
श्यामाङ्गीं श्यामघटितां श्यामवर्णविभूषिताम्॥१२॥
प्रणमामि जगद्धात्रीं गौरीं सर्वार्थसाधिनीम्।
विश्वेश्वरीं महाघोरां विकटां घोरनादिनीम्॥१३॥
आद्यामाद्या गुरोराद्यामाद्यनाथप्रपूजिताम्।
श्रीदुर्गां धनदामन्नपूर्णां पद्मां सुरेश्वरीम्॥१४॥
प्रणमामि जगद्धात्रीं चन्द्रशेखरवल्लभाम्।
त्रिपुरासुन्दरीं बालामबलागणभूषिताम्॥१५॥

शिवदूतीं शिवाराध्यां शिवध्येयां सनातनीम्।
सुन्दरीं तारिणीं सर्वशिवागणविभूषिताम्॥१६॥
नारायणीं विष्णुपूज्यां ब्रह्मविष्णुहरप्रियाम्।
सर्वसिद्धिप्रदां नित्यामनित्यगुणवर्जिताम्॥१७॥
सगुणां निर्गुणां ध्येयामर्चितां सर्वसिद्धिदाम्।
दिव्यां सिद्धिप्रदां विद्यां महाविद्यां महेश्वरीम्॥१८॥
महेशभक्तां माहेशीं महाकालप्रपूजिताम्।
प्रणमामि जगद्धात्रीं शुम्भासुरविमर्दिनीम्॥१९॥
रक्तप्रियां रक्तवर्णां रक्तबीजविमर्दिनीम्।
भैरवी भुवनां देवीं लोलजिह्वां सुरेश्वरीम्॥२०॥
चतुर्भुजां दशभुजां अष्टादशभुजा शुभाम्।
त्रिपुरेशीं विश्वनाथप्रियां विश्वेश्वरीं शिवाम्॥२१॥
अट्टहासां अट्टहासप्रियां धूम्रविनाशिनीम्।
कमलां छिन्नभालां च मातङ्गीं सुरसुन्दरीम्॥२२॥
षोडशीं विजयां भीमां धूम्रां च बगलामुखीम्।
सर्वसिद्धिप्रदां सर्वविद्यामन्त्रविशोधिनीम्॥२३॥
प्रणमामि जगत्तारां सारां च मन्त्रसिद्धये।
इत्येवं च वरारोहं स्तोत्रं सिद्धिकरं परम्॥२४॥
पङ्गित्वा मोक्षमाप्नोति सत्यं वै गिरिनन्दिनि!।
कुजवारे चतुर्दश्यां अमायां जीववासरे॥२५॥
शुक्रे निशिगते स्तोत्रं पठित्वा मोक्षमाप्नुयात्।
त्रिपक्षे मन्त्रसिद्धिः स्यात् स्तोत्रपाठाद्धि शङ्करि!॥२६॥
चतुर्दश्यां निशाभागे शनिभौमदिने तथा।
निशामुखे पठेत् स्तोत्रं मन्त्रसिद्धिमवाप्नुयात्॥२७॥
केवलं स्तोत्रपाठाद्धि मन्त्रसिद्धिरनुत्तमा।
जागर्ति सततं चण्डी स्तोत्रपाठाद् भुजङ्गिनी॥२८॥

मुण्डमालातन्त्रे महाविद्यास्तोत्रं परिपूर्णम्

महाविद्याकवचम्

भैरव उवाच

शृणु देवि! प्रवक्ष्यामि कवचं सर्वसिद्धिदम्।
आद्याया महाविद्यायाः सर्वाभीष्टफलप्रदम्॥१॥
कवचस्य ऋषिर्देवि! सदाशिव इतीरितः।
छन्दोऽनुष्टुब्देवता च महाविद्या प्रकीर्तिता॥२॥
धर्मार्थकाममोक्षाणां विनियोगश्च साधने।
ऐँकारः पातु शीर्षे मां कामबीजं तथा हृदि॥३॥
रमाबीजं सदा पातु नाभौ गुह्ये च पादयोः।
ललाटे सुन्दरी पातु उग्रा मां कण्ठदेशतः॥४॥
भगमाला सर्वगात्रे च लिङ्गे चैतन्यरूपिणी।
पूर्वे मां पातु वाराही ब्रह्माणी दक्षिणे तथा॥५॥
उत्तरे वैष्णवी पातु चेन्द्राणी पश्चिमेऽवतु।
माहेश्वरी च आग्नेय्यां नैर्ऋत्ये कमला तथा॥६॥
वायव्यां पातु कौमारी चामुण्डा ह्रीँशकेऽवतु।
इदं कवचमज्ञात्वा महाविद्यां च यो जपेत्॥७॥
न फलं जायते तस्य कल्पकोटिशतैरपि॥

ॐ शान्तिः॥ ॐ शन्तिः॥ ॐ शान्तिः॥

रुद्रयामले महाविद्याकवचं परिपूर्णम्

●

परिशिष्ट भाग ३

पूजन सामग्री सूची

रोली—१०० ग्रा०
मौली—१ वण्डल बड़ारील
अबीर—१०० ग्रा०
बुक्का—१० ग्रा०
कपूर—१०० ग्रा०
लवङ्ग—२५ ग्रा०
इलायची—२५ ग्रा०
चावल खड़ा—५ कि०ग्रा०
रङ्ग(लाल, हरा, पीला, काला)—१० ग्रा० प्रत्येक
दियासलाई—१बण्डल
धूपबत्ती—५ बण्डल
यज्ञोपवीत—४० पीस
घी—३ कि०ग्रा०
शहद—१०० ग्रा०
चीनी—१०० ग्रा०
रुई—५० ग्रा०
इत्र—१० मि०ग्रा०
गुलाब जल—१०० मि०ग्रा०
पीली सरसों—१० ग्रा०
पञ्चरत्न—८ पुड़िया
सप्तमृत्तिका—८ पुड़िया
सर्वौषधी—८ पुड़िया
जौ—१०० ग्रा०
शतावरी—५० ग्रा०
सुपाड़ीबड़ी—१.५ कि०ग्रा०
पञ्चमेवा—५०० ग्रा०
गरिगोला—१ नग
नारियल पानी वाला—१२ नग
मेंहदी—१०० ग्रा०
हल्दी—१०० ग्रा०

कालीमिर्च—१०० ग्रा०
पाँच रङ्ग का ध्वजा—१ नग
लाल रङ्ग का ध्वजा—२ नग
हरे रङ्ग का ध्वजा—२ नग
काले रङ्ग का ध्वजा—२ नग
पीले रङ्ग का ध्वजा—२ नग
पलास का पत्तल—१० नग
कालाउर्द—५०० ग्रा०
तिल का तेल—५०० ग्रा०
सफेद कपड़ा—५ मी०
लाल कपड़ा—१ मी०
धोती सूती—१ नग
गमछा—१० नग
साड़ी-साया-ब्लाउज—१ सेट
सुहाग पिटारी—१ नग
कलश बड़ा मिट्टी का ढ़क्कनसहित—१ नग
कलश छोटा मिट्टी का ढ़क्कनसहित—२ नग
कसोरा—२५ नग
दीया—१०० नग
दोना—१०० नग
पूर्णपात्र—१ नग
चरुपात्र—१ नग
चौकी—२ नग
पाटा—३ नग
दूध—१०० ग्रा०
दही—१०० ग्रा०
पान का पत्ता—२५ पीस प्रतिदिन
फल—१० नग
मीठा—१ कि०ग्रा०
माला—२५ नग

फूल—५०० ग्रा०
दूर्वा—१ मुट्ठा
तुलसी—१० नग
विल्वपत्र—५० नग
आम्रपल्लव—३ नग
कुशा—१०० नग
गोबर—५० ग्रा०
गोमुत्र—५० ग्रा०

हवन सामग्री—

काला तिल—२ कि०ग्रा०
सफेद तिल—५०० ग्रा०
पीला सरसों—५०० ग्रा०
राई—५०० ग्रा०
कमलगट्टा—१०० ग्रा०
गुगुल—१०० ग्रा०
लोहबान—१०० ग्रा०
लाल चन्दन का चूरा—१०० ग्रा०
सफेद चन्दन का चूरा—१०० ग्रा०
सेंधा नमक चूरा—५०० ग्रा०
धान का लावा—१०० ग्रा०
पञ्चमेवा—१०० ग्रा०
धत्तुर फल का बीज—१०० ग्रा०
मदार का पत्ता—१०० नग
मदार की लकड़ी—१०८ नग
आम की लकड़ी—१० कि०ग्रा०
बेर की लकड़ी—१० कि०ग्रा०
लाल चिचिडि की लकड़ी—१० कि०ग्रा०
पीपल की लकड़ी—५ कि०ग्रा०
गाय की गोहरी—१०० नग
गुलर की लकड़ी—१०८ नग
पलास की लकड़ी—१०८ नग
पलास का फूल—१०८ नग
वट की लकड़ी—१०८ नग
छितवन का फूल—१०८ नग
पाकड़ की लकड़ी—१०८ नग
खैर की लकड़ी—१०८ नग
उर्द का बड़ा बिना नमक का—१०८ नग
चावल का आटा—१०० ग्रा०
गेंहू का आटा—१०० ग्रा०
केला—१२ नग
सरसों की लकड़ी—१०८ नग
नीम्बु की लकड़ी—१०८ नग
उर्द की लकड़ी—१०८ नग
जौ की लकड़ी—१०८ नग
खोआ—१ कि० ग्रा०
गाय का दूध—२ ली०

तन्त्रशास्त्र के महत्वपूर्ण ग्रन्थ-मूल संस्कृत एवं हिन्दी टीका सहित

- तन्त्रसार : परमहंस मिश्र (1-2 भाग)
- कुलार्णवतन्त्रम् : परमहंस मिश्र
- नित्योत्सव : (श्रीविद्याविमर्शकसद्ग्रन्थ) परमहंस मिश्र
- त्रिपुरारहस्यम् : (ज्ञान एवं महात्म्य खण्ड) जगदीशचन्द्र मिश्र (1-2 भाग)
- तन्त्रालोक : राधेश्याम चतुर्वेदी (1-5 भाग)
- स्वच्छन्दतन्त्रं : राधेश्याम चतुर्वेदी (1-2 भाग)
- नेत्रतन्त्रम् : राधेश्याम चतुर्वेदी
- कामाख्यातन्त्रम् : राधेश्याम चतुर्वेदी
- महाकालसंहिता : (कामकला-कालीखण्ड) राधेश्याम चतुर्वेदी
- महाकालसंहिता : (गुह्यकाली-खण्ड) राधेश्याम चतुर्वेदी (1-5 भाग)
- [illegible]मलम् : सुधाकर मालवीय (1-2 [illegible]
- [illegible]तिलकम्-सुधाकर मालवीय [illegible]
- [illegible]दधि : सुधाकर मालवीय
- [illegible]त्रम् : कपिलदेवनारायण [illegible]
- [illegible]तन्त्रम्-कपिलदेवनारायण [illegible]
- [illegible]णतन्त्रम् : कपिलदेवनारायण
- [illegible]लाविलास : श्यामाकान्त द्वि[illegible]
- [illegible]स्यारहस्यम् : श्यामाकान्त द्वि[illegible]
- स्पन्दकारिका : श्यामाकान्त द्विवेदी
- सर्वोल्लासतन्त्रम् : एस. खण्डेलवाल
- नीलसरस्वतीतन्त्रम् : एस. खण्डेलवाल
- भूतडामरतन्त्रम् : एस. खण्डेलवाल
- सिद्धनागार्जुनतन्त्रम् : एस. खण्डेलवाल
- अन्नदाकल्पतन्त्रम् : एस. खण्डेलवाल
- त्रिपुरार्णवतन्त्रम् : एस. खण्डेलवाल
- विज्ञानभैरव : बापूलाल अँजना
- श्रीविद्यार्णवतन्त्रम् । कपिलदेवनारायण (1-5 भाग सम्पूर्ण)
- देवीरहस्यम् : (रुद्रयामलतन्त्रोक्तम्) कपिलदेवनारायण (1-2 भाग)
- स्वर्णतन्त्र : भाषा टीका
- महानिर्वाणतन्त्रम् : कपिलदेवनारायण
- बृहत्तन्त्रसार : कपिलदेवनारायण (1-2 भाग)
- सौन्दर्यलहरी : लक्ष्मीधरी टीका सहित सुधाकर मालवीय
- सिद्धसिद्धान्तपद्धति : द्वारकादास शास्त्री
- आगमतत्त्वविलास : एस.एन.खण्डेलवाल (1-4 भाग सम्पूर्ण)
- राधातन्त्रम् : एस.एन. खण्डेलवाल
- सौभाग्यलक्ष्मीतन्त्रम् एस.एन.खण्डेलवाल

◆◆◆

तंत्र विषयक महत्त्वपूर्ण शास्त्रीय ग्रन्थ

- **श्रीविद्या-साधना** : (श्रीविद्या-उपासना का साङ्गोपाङ्ग शास्त्रीय विवेचन) (1-2 भाग सम्पूर्ण)
- **भारतीय शक्ति-साधना** : (शक्ति-विज्ञानः स्वरूप एवं सिद्धान्त का शास्त्रीय विवेचन)
- **ब्रह्मास्त्रविद्या एवं बगलामुखी-साधना** : (महाविद्याबगला-उपासना का शास्त्रीय विवेचन)
- **काश्मीर शैवदर्शन एवं स्पन्दशास्त्र** : (शिवसूत्र, शक्तिसूत्र एवं स्पन्दसूत्र के सन्दर्भ में)
- **मुद्राविज्ञान एवं साधना** : (नित्यकर्मीय एवं तान्त्रिक मुद्राओं का सचित्र एवं शास्त्रीय विवेचन)

◆◆◆

श्रीविद्यारण्ययतिप्रणीतं

श्रीविद्यार्णवतन्त्रम्

साधनात्मकभाषाभाष्योपेतम्

भाषाभाष्यकार-श्रीकपिलदेवनारायण

(1-5 भाग सम्पूर्ण)

◆◆◆

चौखम्बा सुरभारती प्रकाशन-वाराणसी

तन्त्रशास्त्र के महत्वपूर्ण ग्रन्थ-मूल संस्कृत एवं हिन्दी टीका सहित

- **तन्त्रसार** : परमहंस मिश्र (1-2 भाग)
- **कुलार्णवतन्त्रम्** : परमहंस मिश्र
- **नित्योत्सव** : (श्रीविद्याविमर्शकसद्ग्रन्थ) परमहंस मिश्र
- **त्रिपुरारहस्यम्** : (ज्ञान एवं महात्म्य खण्ड) जगदीशचन्द्र मिश्र (1-2 भाग)
- **तन्त्रालोक** : राधेश्याम चतुर्वेदी (1-5 भाग)
- **स्वच्छन्दतन्त्रं** : राधेश्याम चतुर्वेदी (1-2 भाग)
- **नेत्रतन्त्रम्** : राधेश्याम चतुर्वेदी
- **कामाख्यातन्त्रम्** : राधेश्याम चतुर्वेदी
- **महाकालसंहिता** : (कामकला-कालीखण्ड) राधेश्याम चतुर्वेदी
- **महाकालसंहिता** : (गुह्यकाली-खण्ड) राधेश्याम चतुर्वेदी (1-5 भाग)
- **रुद्रयामलम्** : सुधाकर मालवीय (1-2 भाग)
- **शारदातिलकम्**-सुधाकर मालवीय (1-2 भाग)
- **मन्त्रमहोदधि** : सुधाकर मालवीय
- **लक्ष्मीतन्त्रम्** : कपिलदेवनारायण (1-2
- **तन्त्रराजतन्त्रम्**-कपिलदेवनारायण (1-2
- **महानिर्वाणतन्त्रम्** : कपिलदेवनारायण
- **कामकलाविलास** : श्यामाकान्त द्विवेदी
- **वरिवस्यारहस्यम्** : श्यामाकान्त द्विवेदी
- **स्पन्दकारिका** : श्यामाकान्त द्विवेदी
- **सर्वोल्लासतन्त्रम्** : एस. खण्डेलवाल
- **नीलसरस्वतीतन्त्रम्** : एस. खण्डेलवाल
- **भूतडामरतन्त्रम्** : एस. खण्डेलवाल
- **सिद्धनागार्जुनतन्त्रम्** : एस. खण्डेलवाल
- **अन्नदाकल्पतन्त्रम्** : एस. खण्डेलवाल
- **त्रिपुरार्णवतन्त्रम्** : एस. खण्डेलवाल
- **विज्ञानभैरव** : बापूलाल अँजना
- **श्रीविद्यार्णवतन्त्रम्** । कपिलदेवनारायण (1-5 भाग सम्पूर्ण)
- **देवीरहस्यम्** : (रुद्रयामलतन्त्रोक्तम्) कपिलदेवनारायण (1-2 भाग)
- **स्वर्णतन्त्र** : भाषा टीका
- **महानिर्वाणतन्त्रम्** : कपिलदेवनारायण
- **बृहत्तन्त्रसार** : कपिलदेवनारायण (1-2 भाग)
- **सौन्दर्यलहरी** : लक्ष्मीधरी टीका सहित सुधाकर मालवीय
- **सिद्धसिद्धान्तपद्धति** : द्वारकादास शास्त्री
- **आगमतत्त्वविलास** : एस.एन.खण्डेलवाल (1-4 भाग सम्पूर्ण)
- **राधातन्त्रम्** : एस.एन. खण्डेलवाल
- **सौभाग्यलक्ष्मीतन्त्रम्** एस.एन.खण्डेलवाल

तंत्र विषयक महत्त्वपूर्ण शास्त्रीय ग्रन्थ

- **श्रीविद्या-साधना** : (श्रीविद्या-उपासना का साङ्गोपाङ्ग शास्त्रीय विवेचन) (1-2 भाग सम्पूर्ण)
- **भारतीय शक्ति-साधना** : (शक्ति-विज्ञानः स्वरूप एवं सिद्धान्त का शास्त्रीय विवेचन)
- **ब्रह्मास्त्रविद्या एवं बगलामुखी-साधना** : (महाविद्याबगला-उपासना का शास्त्रीय विवेचन)
- **काश्मीर शैवदर्शन एवं स्पन्दशास्त्र** : (शिवसूत्र, शक्तिसूत्र एवं स्पन्दसूत्र के सन्दर्भ में)
- **मुद्राविज्ञान एवं साधना** : (नित्यकर्मीय एवं तान्त्रिक मुद्राओं का सचित्र एवं शास्त्रीय विवेचन)

श्रीविद्यारण्ययतिप्रणीतं

श्रीविद्यार्णवतन्त्रम्

साधनात्मकभाषाभाष्योपेतम्

भाषाभाष्यकार-श्रीकपिलदेवनारायण

(1-5 भाग सम्पूर्ण)

चौखम्बा सुरभारती प्रकाशन-वाराणसी